# Shrimad VidyaranyasvAmivirachitah Anubhutiprakashah

# શ્રીમદ્વિદ્યારણ્યસ્વામિવિરચિતઃ અનુભૂતિપ્રકાશઃ

## Document Information

Text title : Anubhutiprakashah

File name : anubhUtiprakAshaH.itx

Category : upanishhat, upaniShat, vedAnta

Location : doc_upanishhat

Author : Swami VidyAranya

Proofread by : Rama Sivaraman, Suvarna Sudagoni, Preeti Bhandare

Latest update : February 19, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 19, 2026

*sanskritdocuments.org*

Shrimad VidyaranyasvAmivirachitah Anubhutiprakashah

# શ્રીમદ્વિદ્યારણ્યસ્વામિવિરચિતઃ અનુભૂતિપ્રકાશઃ

શ્રીગણેશાય નમઃ ।

## અનુક્રમણિકા


અધ્યાયઃ. નામ (શ્લોકસઙ્ખ્યા)

૧. ઐતરેયોપનિષદ્વિવરણો નામ પ્રથમોઽધ્યાયઃ । (૧૦૮)

૨. તૈત્તિરીયકવિદ્યાપ્રકાશો નામ દ્વિતીયોઽધ્યાયઃ । (૧૫૦)

૩. છાન્દોગ્યોપનિષદિ શ્વેતકેતુવિદ્યાપ્રકાશો નામ તૃતીયોઽધ્યાયઃ । (૧૪૦)

૪. છાન્દોગ્યે સનત્કુમારવિદ્યાપ્રકાશો નામ ચતુર્થોઽધ્યાયઃ । (૯૦)

૫. છાન્દોગ્યે પ્રજાપતિવિદ્યાપ્રકાશોઽનામ પઞ્ચમોઽધ્યાયઃ । (૧૦૦)

૬. મુણ્ડકોપનિષદ્વિવરણો નામ ષષ્ઠોઽધ્યાયઃ । (૧૦૦)

૭. પ્રશ્નોપનિષદ્વિવરણં નામ સપ્તમોઽધ્યાયઃ । (૧૦૦)

૮. કૌષીતકીશાખા વિવરણે ઇન્દ્રપ્રતર્દનસંવાદો નામ અષ્ટમોઽધ્યાયઃ । (૧૦૦)

૯. કૌષીતકીશાખોપનિષદ્વિવરણો નામ નવમોઽધ્યાયઃ । (૭૫)

૧૦. મૈત્રાયણીયશાખાવિવરણો નામ દશમોઽધ્યાયઃ । (૧૫૦)

૧૧. કઠવલ્લીવિવરણો નામ એકાદશોઽધ્યાયઃ । (૧૨૦)

૧૨. શ્વેતાશ્વતરવિવરણો નામ દ્વાદશોઽધ્યાયઃ । (૧૨૦)

૧૩. બૃહદારણ્યકે કાણ્વવિદ્યાપ્રકાશો નામ ત્રયોદશોઽધ્યાયઃ । (૩૦૨)

૧૪. અજાતશત્રુવિદ્યાપ્રકાશો નામ ચતુર્દશોઽધ્યાયઃ । (૧૨૦)

૧૫. બૃહદારણ્યોપનિષદિ મૈત્રેયીવિદ્યાપ્રકાશો નામ પઞ્ચદશોઽધ્યાયઃ । (૧૦૩)

૧૬. બૃહદારણ્યકે મધુવિદ્યાપ્રકાશો નામ ષોડશોઽધ્યાયઃ । (૫૦)

૧૭. આશ્વલાયનાદિમુનિબોધાખ્યો નામ સપ્તદશોઽધ્યાયઃ । (૩૧૦)

૧૮. જનકવિદ્યાપ્રકાશો નામાષ્ટાદશોઽધ્યાયઃ । (૩૨૪)

૧૯. તલવકારવિદ્યાપ્રકાશો નામૈકોનવિંશોઽધ્યાયઃ । (૧૦૦)

૨૦. દેવવિદ્યાખ્યો નૃસિંહતાપિનીવિવરણો નામ વિંશોઽધ્યાયઃ । (૧૫૬)

(કુલસઙ્ખ્યા ૨૮૧૮)

॥ અથ શ્રીવિદ્યારણ્યવિરચિત ઉપનિષત્તાત્પર્યરૂપોઽનુભૂતિપ્રકાશઃ પ્રારભ્યતે ॥

॥ હરિઃ ૐ ॥

## ૧. ઐતરેયોપનિષદ્વિવરણો નામ પ્રથમોઽધ્યાયઃ ।

ઐતરેયેણ સમ્પ્રોક્તા દ્વિતીયારણ્યકાન્તગા ।
બ્રહ્મવિદ્યા સુવિસ્પષ્ટં બાલબોધાય તન્યતે ॥ ૧.૧॥

આત્મૈવ સૃષ્ટેઃ પ્રાગાસીન્નામરૂપવિવર્જિતઃ ।
સોઽપ્યેક એવ નાન્યોઽસ્તિ જડં ચાન્યન્ન વિદ્યતે ॥ ૧.૨॥

માયાં તુ પ્રકૃતિં વિદ્યાન્માયિનં મહેશ્વરમ્ ।
ઇતિ શ્રુત્યન્તરે પ્રોક્તા માયા નાસ્ત્યત્ર તત્ત્વતઃ ॥ ૧.૩॥

નિસ્તત્ત્વં વ્યવહારાર્હમનૃતં બાલયક્ષવત્ ।
બાલો યક્ષં પ્રકલ્પ્યાસ્માદ્બિભેતિ વ્યાઘ્રતો યથા ॥ ૧.૪॥

વસ્તુતત્ત્વં જડં કિઞ્ચિન્નાન્યદસ્ત્યાત્મવસ્તુનઃ ।
અદ્વયાનન્દરૂપાત્મા તદા સુપ્તાવિવ સ્થિતઃ ॥ ૧.૫॥

નિસ્તત્વાપિ જગદ્ભાન્તિં માયા નિદ્રેવ કલ્પયેત્ ।
નિર્વિકારોઽપ્યસાવાત્મા માયાવૃત્ત્યા વ્યચારયત્ ॥ ૧.૬॥

સ વિચાર્યાખિલાન્ લોકાન્ સૃષ્ટ્વા પાલકસૃષ્ટયે ।
કૃત્વા વિરાટ્તનું છિદ્રેષ્વથ તદ્દેવતા વ્યધાત્ ॥ ૧.૭॥

સમુદ્રતુલ્યે દેહેઽસ્મિન્દેવતાઃ પતિતાસ્તથા ।
તં દેહં ક્ષુત્પિપાસાભ્યાં યોજયામાસ સ પ્રભુઃ ॥ ૧.૮॥

અન્નભોગાયાત્મદેહાન્ગવાશ્વપુરુષાદિકાન્ ।
સૃષ્ટ્વા પ્રાવેશયત્તત્ર દેવતાસ્તા યથાયથમ્ ॥ ૧.૯॥

ઈશોઽસાધારણં સ્થાનમપશ્યન્ ક્ષુત્પિપાસયોઃ ।
પ્રાવેશયદ્દેવતાસુ તદ્ભોગાત્તે ચ તૃપ્યતઃ ॥ ૧.૧૦॥

અન્ને સૃષ્ટે ભોક્તૃવર્ગો હ્યજિઘૃક્ષત્તદિન્દ્રિયૈઃ ।
તત્ર વાગાદયોઽશક્તાસ્તદપાનો ગૃહીતવાન્ ॥ ૧.૧૧॥

જીવાભાવે વૃથા સર્વમિત્યાલોચ્ય પરેશ્વરઃ ।
શિરોમધ્યં વિદાર્યાત્ર પ્રાવિશજ્જીવરૂપતઃ ॥ ૧.૧૨॥

પ્રાણાનાં ધારકઃ કર્તા ચેતનો જીવ ઉચ્યતે ।
આનખાગ્રમહઙ્કારશ્ચિદ્વ્યાપ્તશ્ચેતનોઽભવત્ ॥ ૧.૧૩॥

અન્તઃકરણભાગૌ દ્વાવહઙ્કારો મનસ્તથા ।
વૃક્ષસ્ય મૂલમગ્રં ચ યથાભાગૌ તથેક્ષ્યતામ્ ॥ ૧.૧૪॥

ચિદ્બિમ્બપ્રતિબિમ્બાભ્યાં યુક્તોઽહઙ્કાર એવ તુ ।
ચેતનાપ્રાણભૃત્તસ્ય હૃન્નિષ્ઠં કરણં મનઃ ॥ ૧.૧૫॥

તસ્ય હૃત્કણ્ઠનેત્રેષુ પ્રચારવશતોઽભવત્ ।
સુપ્તિઃ સ્વપ્નો જાગરશ્ચ સોઽયં સંસાર ઈરિતઃ ॥ ૧.૧૬॥

સ્વપ્નઃ સ્વકાલ એવાસ્તિ નાન્યદા સુપ્તિજાગરૌ ।
તથૈવેતિ સ્વપ્નસામ્યાત્ત્રયઃ સ્વપ્ના ઉદીરિતાઃ ॥ ૧.૧૭॥

અધ્યારોપો માયિકોઽયમુક્તોઽથાસાવપોહ્યતે ।
અધ્યારોપાપવાદાભ્યાં નિષ્પ્રપઞ્ચં પ્રપઞ્ચ્યતે ॥ ૧.૧૮॥

સ સંસારીશ્વરો જાત ઈશ્વરાનુગ્રહાત્પુનઃ ।
પૃથિવ્યાદીનિ ભૂતાનિ યથાશાસ્ત્રં વ્યચારયત્ ॥ ૧.૧૯॥

પરમાત્મન ઉત્પન્નં જગદાત્મૈવ નેતરત્ ।
મૃદો જાતો ઘટો યદ્વન્મૃદ્વસ્ત્વેવ તથેક્ષ્યતામ્ ॥ ૧.૨૦॥

ઘટઃ શરાવ ઇત્યાદિ વિકારાણાં મૃદઃ પૃથક્ ।
તત્ત્વં નાસ્તિ પ્રતીતે તુ નામરૂપે પ્રકલ્પિતે ॥ ૧.૨૧॥

પ્રતિબિમ્બભ્રમો નીરાદ્યુપાધિવશતો યથા ।
સન્નિવેશોપાધિતોઽયં તથા કુમ્ભાદિવિભ્રમઃ ॥ ૧.૨૨॥

ભ્રાન્તિઃ સોપાધિકોપાધિનિવૃત્ત્યૈવ નિવર્તતે ।
ન બોધાત્તેન ભાસન્તે જાનતોઽપિ ઘટાદયઃ ॥ ૧.૨૩॥

પૃથગ્દ્રવ્યસ્વરૂપઃ સન્ સમવેતો ઘટો મૃદિ ।
ઇત્યાહુસ્તાર્કિકાસ્તત્તુ ન દ્વૈગુણ્યપ્રસઙ્ગતઃ ॥ ૧.૨૪॥

મૃદ્ભાભારાદ્ઘટભારાચ્ચ ગુરુત્વં દ્વિગુણં ભવેત્ ।
તથાલઙ્કારકર્તા સ્યાત્કૃતી હેમાદિવૃદ્ધિતઃ ॥ ૧.૨૫॥

ન સન્નિવેશમાત્રેણ પૃથગ્દ્રવ્યત્વસમ્ભવઃ ।
શયનોત્થાનગમનૈઃ ન પુત્રે બહુપુત્રતા ॥ ૧.૨૬॥

તસ્માત્કાર્યં ન વસ્તુ સ્યાત્કારણવ્યતિરેકતઃ ।
કિન્તુ કારણ એવૈતદનૃતં ભાસતે મૃષા ॥ ૧.૨૭॥

અર્થક્રિયાનૃતેઽપ્યસ્તિ સ્થાણૌ ચોરભયેક્ષણાત્ ।
તતોઽનૃતા ઘટાદ્યાઃ સ્યુર્ભાન્તુ કુર્વન્તુ વા ક્રિયામ્ ॥ ૧.૨૮॥

સન્નિવેશોપાધિહાને ગચ્છત્યેવ ઘટાદિધીઃ ।
વિવેકિનાં તુ વસ્તુત્વં ઘટાદીનાં નિવર્તતે ॥ ૧.૨૯॥

ઘટઃ શરાવ ઇત્યેવં વાચૈવારભ્યતે વૃથા ।
મૃત્તિકેત્યેવ સત્યં સ્યાન્ન તુ સત્યં ઘટાદિકમ્ ॥ ૧.૩૦॥

એવમાત્મન ઉત્પન્નં પૃથિવ્યાદ્યપિ નાત્મનઃ ।
પૃથગ્વસ્ત્વસ્તિ કિન્ત્વાત્મન્યારોપાત્પ્રતિભાસતે ॥ ૧.૩૧॥

સદ્વસ્તુ હ્યાત્મનસ્તત્ત્વં તસ્મિન્ભૂમ્યાદિકલ્પનાત્ ।
પૃથિવ્યાદીનિ સન્તીતિ ભાસન્તે તત્તદિન્દ્રિયૈઃ ॥ ૧.૩૨॥

ઇન્દ્રિયોપાધિકા ભ્રાન્તિરક્ષરોધાન્ન ભાસતે ।
ઇત્યેતદ્વિશદીકર્તું યોગો વેદેષુ વર્ણ્યતે ॥ ૧.૩૩॥

સદાત્મનઃ પૃથગ્ભૂતમસદ્ભૂમ્યાદિ તેન તત્ ।
ભાત્વક્ષૈઃ કાર્યકૃદ્વાઽસ્તુ મિથ્યૈવ સ્યાદ્ઘટાદિવત્ ॥ ૧.૩૪॥

ઈદૃગ્વિવેકદૃષ્ટ્યેદં જગદાત્મૈવ નેતરત્ ।
એવં સત્યાત્મનોઽન્યત્કિં વસ્તુતોઽસ્તીતિ શઙ્ક્યતે ॥ ૧.૩૫॥

અદ્વયાનન્દરૂપાત્મા સૃષ્ટેઃ પૂર્વમભૂદ્યથા ।
તથૈવાદ્યાપિ સમ્પન્નો બુદ્ધ્યા સમ્યગ્વિવેચિતઃ ॥ ૧.૩૬॥

ઇત્થં સર્વાત્મકં બ્રહ્મ વિવિચ્ય પુનરપ્યસૌ ।
એતમેવ સ્વમાત્માનં બ્રહ્મત્વેન વ્યલોકયત્ ॥ ૧.૩૭॥

અહઙ્કારશ્ચ ચિચ્છાયા મિથ્યા ભૂમ્યાદિવત્તતઃ ।
ચિદાત્મકોઽવશિષ્ટોઽયં જીવો બ્રહ્મૈવ નેતરઃ ॥ ૧.૩૮॥

યથાશાસ્ત્રં વિવિચ્યેત્થં પ્રત્યગ્દૃષ્ટ્યા ચિદાત્મનઃ ।

સાક્ષાચ્ચકાર બ્રહ્મત્વં જીવઃ શાન્ત્યાદિસંયુતઃ ॥ ૧.૩૯॥

ઇદમિત્યપરોક્ષેણ દદર્શેતિ વિવક્ષયા ।
ઇદન્દ્રનામાભૂજ્જ્ઞાની વૈયાકરણદૃષ્ટિતઃ ॥ ૧.૪૦॥

તમિન્દ્ર ઇત્યાહુરન્યે નામ્નઃ પારોક્ષ્યસિદ્ધયે ।
પૂજ્યસ્ય દેવપિત્રાદેઃ પરોક્ષં નામ હિ પ્રિયમ્ ॥ ૧.૪૧॥

પરમેશ્વરરૂપત્વાદપીન્દ્રત્વમિહોચિતમ્ ।
સમાપ્તા બ્રહ્મવિદ્યેયમુત્તમસ્યાધિકારિણઃ ॥ ૧.૪૨॥

વિરક્તસ્યોક્તબોધઃ સ્યાદ્વૈરાગ્યં દોષદર્શનાત્ ।
જન્મૈવ પ્રથમો દોષસ્તદ્બીભત્સા નિરૂપ્યતે ॥ ૧.૪૩॥

સ્વર્ગાદ્વા નરકાદ્વાયં વૃષ્ટિદ્વારાન્નસંસ્થિતઃ ।
પ્રવિશ્ય પિતરં તત્ર ગર્ભો ભવતિ રેતસિ ॥ ૧.૪૪॥

તદ્રેતઃ પિતૃદેહસ્થં સર્વાઙ્ગેભ્યઃ સમુત્થિતમ્ ।
પિતુઃ સ્વદેહો ગર્ભાખ્યદેહશ્ચેતિ વપુર્દ્વયમ્ ॥ ૧.૪૫॥

સ્ત્રિયાં સિઞ્ચતિ તદ્રેતસ્તત્પુત્રોત્પાદનં પિતુઃ ।
પુત્રરૂપેણ તજ્જન્મ પિતુરાદ્યં સ્વયં કૃતમ્ ॥ ૧.૪૬॥

યોષિદ્યોનિં પ્રવિશ્યાયં યોષિદ્ગર્ભે સ્ફુટીભવેત્ ।
યોષિદ્વીર્યેણ પુષ્ટોઽસૌ તદ્દેહેનૈકતાં વ્રજેત્ ॥ ૧.૪૭॥

અન્યથૈનાં સ્ત્રિયં હન્યાદ્ગુલ્મવ્યાધિવદાન્તરઃ ।
સ્વાઙ્ગવન્ન હિનસ્ત્યેનાં ગર્ભં રક્ષતિ સા તતઃ ॥ ૧.૪૮॥

ગર્ભરૂપં ભર્તૃદેહં યતઃ સા પાલયત્યતઃ ।
સાપિ ભર્ત્રા પાલનીયા તદિષ્ટાન્નાદિવસ્તુભિઃ ॥ ૧.૪૯॥

ગર્ભો વિણ્મૂત્રયોઃ સ્થિત્વા દશમે માસિ જાયતે ।
પિતા સ્વાત્મધિયા પુત્રં સંસ્કરોતિ યથાવિધિ ॥ ૧.૫૦॥

પિતુર્દ્વિતીયં તજ્જન્મ પુત્રરૂપેણ સંસ્થિતમ્ ।
સ્વોદરાદ્દારજઠરાદપિ જન્મદ્વયં ક્રમાત્ ॥ ૧.૫૧॥

પતિર્જાયાં વિશત્યાદૌ ગર્ભો ભૂત્વા સ્વમાતરમ્ ।
જાયૈવ માતા સમ્પન્નેત્યહો સંસારકષ્ટતા ॥ ૧.૫૨॥

લૌકિકં વૈદિકં સર્વં પુત્રેઽવસ્થાપ્ય તત્પિતા ।
મૃતો દેહાન્તરે પિત્રોરન્યયોર્વિશતિ સ્વયમ્ ॥ ૧.૫૩॥

પુત્રરૂપેણ યજન્મદ્વયં પૂર્વમુદીરિતમ્ ।
તદપેક્ષં તૃતીયં તજ્જન્મ સ્યાદ્દેહધારિણઃ ॥ ૧.૫૪॥

સ્વોદરં દારજઠરં તથા પિત્રન્તરોદરમ્ ।
ત્રય આવસથા ઇત્થં જન્તોઃ સર્વસ્ય જન્મને ॥ ૧.૫૫॥

જન્માનિ યોનિલક્ષાણાં જન્તુશ્ચતુરશીતિષુ ।
ઉત્તમાધમરૂપાણિ પ્રાપ્નોત્યેવં પુનઃ પુનઃ ॥ ૧.૫૬॥

દુષ્ટત્વં જન્મનઃ પ્રોક્તં સ્પષ્ટં રોગાદિ દુષ્ટતા ।
વિરક્તો બુદ્ધતત્ત્વસ્તુ મુચ્યતે વામદેવવત્ ॥ ૧.૫૭॥

પૂર્વજન્મનિ બોધેન સ્વમુક્તિં ચાબ્રવીદૃચા ।
ગર્ભસ્થો વામદેવોઽયં પ્રતિબન્ધવિવર્જિતઃ ॥ ૧.૫૮॥

જન્મન્યતીતે વેદાન્તં શ્રુત્વાપ્યેષ ન બુદ્ધવાન્ ।
બલિના પ્રતિબદ્ધત્વાત્કર્મણા જન્મહેતુના ॥ ૧.૫૯॥

ગર્ભે પ્રવિશ્ય તત્કર્મ વિનષ્ટં પ્રતિબન્ધકમ્ ।
નવમે માસિ સંસ્મૃત્ય શ્રવણં પ્રતિબુદ્ધવાન્ ॥ ૧.૬૦॥

વિદ્વાન્ ભૂત્વા સમુત્પન્નો જીવન્મુક્તોઽભવત્તદા ।
શરીરમાત્મનો ભિન્નં મિથ્યૈવેત્યવગચ્છતિ ॥ ૧.૬૧॥

ઇયન્તં કાલમેતસ્મિન્ ભ્રાન્ત્યા દેહે નિમગ્નવાન્ ।
બોધેન દેહાદુત્ક્રમ્યોત્કૃષ્ટોઽભૂજ્જીવતાં ત્યજન્ ॥ ૧.૬૨॥

જીવત્વેઽપગતે તસ્ય શિષ્યતે પરમાત્મતા ।
સ એવ સ્વર્ગતુલ્યોઽભૂદિન્દ્રિયાવિષયત્વતઃ ॥ ૧.૬૩॥

પરોક્ષોઽપિ વિમૂઢાનાં વિદ્વદ્ભિરવલોક્યતે ।
સર્વેઽપિ વિષયાનન્દાઃ પ્રાપ્તા દૃષ્ટે નિજાત્મનિ ॥ ૧.૬૪॥

આત્માનન્દસમુદ્રસ્ય વિપ્લુષો વિષયોત્થિતાઃ ।
આત્મન્યન્તર્ભવન્ત્યન્તે સમુદ્રે બિન્દવો યથા ॥ ૧.૬૫॥

આત્મન્યાનન્દમજ્ઞાત્વા વિષયે સુખવિભ્રમાત્ ।
ભોક્તુમિચ્છતિ તલ્લાભાદ્ધીરાત્મન્યુપશામ્યતિ ॥ ૧.૬૬॥

આત્માનન્દં ક્ષણં ભુક્ત્વા પુનર્ભ્રાન્ત્યા બહિર્વ્રજેત્ ।
વિવેકિધીર્નિજાનન્દં ભુઙ્ક્તે તત્સ્થૈવ સર્વદા ॥ ૧.૬૭॥

વિષયે દુઃખજાતં યત્તદ્વીક્ષ્યાપક્ષપાતતઃ ।
શક્યો બોદ્ધું નિજાનન્દો બુધ્યન્તે હિ વિવેકિનઃ ॥ ૧.૬૮॥

વામદેવોઽખિલાનન્દાનાપ્યાત્મન્યમૃતોઽભવત્ ।
દેહપ્રાણવિયોગાખ્યા મૃતિશ્ચિદ્વસ્તુનો ન હિ ॥ ૧.૬૯॥

ઇત્થં સંસારદુષ્ટત્વં પુરુષાર્થં ચ બોધતઃ ।
શ્રુત્વા વિરક્તા બોધાર્થં મીમાંસન્તે મુમુક્ષવઃ ॥ ૧.૭૦॥

અહં પશ્યામ્યહં વચ્મીત્યાત્માનં સર્વદા વયમ્ ।
ઉપાસ્મહે યોગિવન્દ્યં કોઽસૌ મૂર્ધ્નિ પ્રવિષ્ટવાન્ ॥ ૧.૭૧॥

માયાવી શુદ્ધચિદ્વાત્મા કતરઃ સૃષ્ટિતઃ પુરા ।
બુભુત્સન્તે દ્વયોસ્તત્ત્વં જીવાત્મપરમાત્મનોઃ ॥ ૧.૭૨॥

જીવસ્ય ચેતનત્વેન ચૈતન્યં ચિન્ત્યતામિદમ્ ।
ચક્ષુરાદિવિશિષ્ટં તચ્છુદ્ધં વા તત્ત્વમસ્ય કિમ્ ॥ ૧.૭૩॥

ચક્ષુઃશ્રોત્રે ઘ્રાણજિહ્વે ત્વક્ચ ધીન્દ્રિયપઞ્ચકમ્ ।
રૂપશબ્દૌ ગન્ધરસૌ સ્પર્શશ્ચવિષયાઃ ક્રમાત્ ॥ ૧.૭૪॥

વાક્પાણિપાદપાયૂપસ્થાઃ કર્મેન્દ્રિયપઞ્ચકમ્ ।
ભાષણાદાનગમનવિસર્ગાનન્દકાઃ ક્રિયાઃ ॥ ૧.૭૫॥

ગોલકાનિ દશૈતેષામક્ષ્યાદીનિ સ્ફુટાનિ હિ ।
જ્ઞાનક્રિયાશક્તિરૂપમિન્દ્રિયં ગોલકસ્થિતમ્ ॥ ૧.૭૬॥

પ્રાણોઽપાનસ્સમાનશ્ચોદાનવ્યાનૌ ચ વાયવઃ ।
હૃદ્ગુદે નાભિકણ્ઠૌ ચ દેહશ્ચૈષુ વસન્તિ તે ॥ ૧.૭૭॥

શ્વાસાધોગતિવૃત્તી દ્વે વપુષ્યન્નસમીકૃતિઃ ।
ઉદ્ગારાદિર્દેહબલં પઞ્ચ વાયુક્રિયા ઇમાઃ ॥ ૧.૭૮॥

અહઙ્કર્તા વપુર્વ્યાપ્ય જડં ચેતનતાં નયેત્ ।
મનોઽન્તર્હૃદ્યવસ્થાય વૃત્તીઃ કામાદિકાઃ સૃજેત્ ॥ ૧.૭૯॥

જ્ઞાનેન્દ્રિયાણિ પઞ્ચાત્ર તથા કર્મેન્દ્રિયાણ્યપિ ।

વાયવઃ પઞ્ચ કર્તા ચ મનઃ સપ્તદશં સ્મૃતમ્ ॥ ૧.૮૦॥

સોઽયં સપ્તદશસ્તોમો લિઙ્ગદેહઃ સ્વયોનિષુ ।
સર્વાસુ સંસરત્યસ્ય વિનાશો મોક્ષ ઉચ્યતે ॥ ૧.૮૧॥

અજ્ઞાનકલ્પિતો દેહસ્તત્ત્વજ્ઞાનેન નશ્યતિ ।
જ્ઞાનોત્પત્તિર્વિચારેણ તસ્માદાત્મા વિચાર્યતે ॥ ૧.૮૨॥

યેન પશ્યત્યસાવાત્મા યઃ પશ્યતિ સ વા ભવેત્ ।
દ્રષ્ટા પશ્યતિ બોધેન ચાક્ષુષેણ તયોસ્તુ કઃ ॥ ૧.૮૩॥

શ‍ૃણોતિ યેન યઃ શ્રોતા તયોરિત્યાદિ યોજ્યતામ્ ।
ચૈતન્યમસ્તિ કરણે કર્તરીત્યત્ર ચિન્ત્યતે ॥ ૧.૮૪॥

બહૂનિ કરણાન્યેષુ બોધા દૃષ્ટ્યાદિનામકાઃ ।
બહવઃ કર્તૃબાહુલ્યમપિ દ્રષ્ટ્રાદિભેદતઃ ॥ ૧.૮૫॥

કરણાનાં ચ કર્તૃણાં ભેદઃ સ્યાચ્ચક્ષુરાદિકે ।
બાહ્યે યથા તથૈવાન્તઃ શરીરેઽપ્યવગમ્યતામ્ ॥ ૧.૮૬॥

કર્ત્રુપાધિરહઙ્કારો વાચ્યો હૃદયશબ્દતઃ ।
કરણં સ્યાન્મનસ્તસ્ય સંજ્ઞાનાદ્યાસ્તુ વૃત્તયઃ ॥ ૧.૮૭॥

તત્ર સર્વત્ર ચૈતન્યં લક્ષ્યતે હિ પૃથક્ પૃથક્ ।
એવં સતિ બહુષ્વેષુ કઃ સ્યાદાત્મેતિ સંશયઃ ॥ ૧.૮૮॥

પ્રજ્ઞાનમેકં સર્વેષુ યત્સ આત્મેતિ નિર્ણયઃ ।
પ્રકૃષ્ટં નિરુપાધિત્વાચ્ચૈતન્યં યત્તદીક્ષ્યતામ્ ॥ ૧.૮૯॥

અહઙ્કારો મનોબાહ્યં કરણં ચાપ્યુપાધયઃ ।
તેષુ સર્વેષુ ચિચ્છાયા સઙ્ક્રાન્તા ચેતનાસ્તતઃ ॥ ૧.૯૦॥

ન મુખ્યં તેષુ ચૈતન્યમાત્મત્વસ્યાપ્યમુખ્યતા ।
સુષુપ્તૌ તાનિ લુપ્યન્તે ન ત્વાત્મા તત્ર લુપ્યતે ॥ ૧.૯૧॥

પ્રજ્ઞાનં નિરુપાધિત્વાન્નિત્યં તલ્લોપભાસકમ્ ।
પ્રજ્ઞાનસ્યાત્મતા તસ્માન્મુખ્યા નાન્યસ્ય કસ્યચિત્ ॥ ૧.૯૨॥

દ્રષ્ટ્રાદ્યા અપિ દૃષ્ટ્યાદ્યાઃ શબ્દા મુખ્યાત્મવસ્તુનઃ ।
નામાન્યુપાધિમાલમ્બ્ય તસ્માદાત્મોપલક્ષકાઃ ॥ ૧.૯૩॥

યથૈકસ્યૈવ સમ્બન્ધવિશેષોપાધિનાખિલાઃ ।
પુત્રભ્રાત્રાદયઃ શબ્દા નામત્વેનોપલક્ષકાઃ ॥ ૧.૯૪॥

ઉપલક્ષ્યં તુ હસ્તાદિ યુક્તમેકં વપુસ્તથા ।
ચેતનૈઃ કર્તૃકરણૈઃ પ્રજ્ઞાનમુપલક્ષ્યતે ॥ ૧.૯૫॥

પ્રજ્ઞાનં કર્તૃદેહાદિસાક્ષિભૂતં યદસ્તિ તત્ ।
જીવસ્ય વાસ્તવં રૂપમિત્યેવં નિર્ણયો ભવેત્ ॥ ૧.૯૬॥

પ્રજ્ઞાનં સ્વશરીરેઽસ્તિ તથા દેહાન્તરેષ્વપિ ।
બ્રહ્માદિસ્થાવરાન્તેષુ તસ્ય સ્યાત્પરમાત્મતા ॥ ૧.૯૭॥

પ્રજ્ઞાનસ્યાસ્ય જીવત્વં પ્રાણધારણતો યથા ।
જગત્સૃષ્ટ્યાદિહેતુત્વાદ્બ્રહ્મત્વં ચ તથેષ્યતામ્ ॥ ૧.૯૮॥

સ્થાવરં જઙ્ગમં સર્વં જગદિત્યભિધીયતે ।
તસ્ય પ્રજ્ઞૈવ નેત્રં સ્યાત્સૃષ્ટ્યાદિનયનાદસૌ ॥ ૧.૯૯॥

પ્રજ્ઞાનં શુદ્ધચિદ્રૂપમાસીદ્યત્સૃષ્ટિતઃ પુરા ।
તસ્મિન્ પ્રતિષ્ઠિતં સર્વં માયયોત્પાદિતત્ત્વતઃ ॥ ૧.૧૦૦॥

ઉત્પત્તિસ્થિતિકાલેઽસૌ લોકઃ પ્રજ્ઞાનનેત્રકઃ ।
નેત્રત્વં વ્યવહારસ્ય સુખાદેર્નયનાદ્ભવેત્ ॥ ૧.૧૦૧॥

લયે પ્રજ્ઞા પ્રતિષ્ઠા સ્યાત્તત્ર સર્વસ્ય સંહૃતેઃ ।
સૃષ્ટિસ્થિતિલયા ઇત્થં શ્રુતાઃ પ્રજ્ઞાનહેતુકાઃ ॥ ૧.૧૦૨॥

સ્વપ્નસૃષ્ટિસ્થિતિલયા જીવચૈતન્યસાક્ષિકાઃ ।
નિર્જીવસ્તમ્ભકુડ્યાદૌ સ્વપ્નસૃષ્ટ્યાદયો ન હિ ॥ ૧.૧૦૩॥

જગત્સૃષ્ટિસ્થિતિલયા બ્રહ્મચૈતન્યસાક્ષિકાઃ ।
બ્રહ્મચૈતન્યરહિતે વન્ધ્યાપુત્રે ન સન્તિ તે ॥ ૧.૧૦૪॥

જગત્સૃષ્ટ્યાદ્યધિષ્ઠાનં શુદ્ધચૈતન્યમદ્વયમ્ ।
પરમાત્મસ્વરૂપં સ્યાદિતિ તસ્યાત્ર નિર્ણયઃ ॥ ૧.૧૦૫॥

યત્પ્રજ્ઞાનં સ્વાત્મરૂપં તદ્બ્રહ્મેતિ વિબુધ્યતામ્ ।
પ્રજ્ઞાનં બ્રહ્મ વિજ્ઞાય તિષ્ઠેત્પ્રજ્ઞાત્મના સદા ॥ ૧.૧૦૬॥

જીવન્નેવ સ્થિતપ્રજ્ઞો મુક્તઃ સ્યાદ્વામદેવવત્ ।
મ્રિયતાં યત્ર તત્રાસ્ય વપુઃ સોઽયં ન જાયતે ॥ ૧.૧૦૭॥

ઐતરેયબ્રહ્મવિદ્યાં વ્યાખ્યાતાં સઙ્ગ્રહાદિમામ્ ।
સુસ્થિરામનુગૃહ્ણાતુ વિદ્યાતીર્થમહેશ્વરઃ ॥ ૧.૧૦૮॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિકૃતે અનુભૂતિપ્રકાશે
ઐતરેયોપનિષદ્વિવરણં નામ પ્રથમોઽધ્યાયઃ ॥ ૧॥

## ૨. તૈત્તિરીયકવિદ્યાપ્રકાશો નામ દ્વિતીયોઽધ્યાયઃ ।

બ્રહ્મવલ્લ્યાં બ્રહ્મવિદ્યાં તિત્તિરિઃ પ્રાહ યામિમામ્ ।
વક્ષ્યે સુખાવબોધાય ક્રીડન્ત્વત્ર મુમુક્ષવઃ ॥ ૨.૧॥

દર્શાદિપિતૃમેધાન્તૈઃ કર્મભિર્બહુજન્મસુ ।
અનુષ્ઠિતૈર્વિવિદિષા જાયતેંઽતિમજન્મનિ ॥ ૨.૨॥

તતો યોગં સમભ્યસ્ય સંહિતોપાસનાદિભિઃ ।
એકાગ્રે સાધિતેઽથાસ્ય વિદ્યાં સૂત્રયતિ શ્રુતિઃ ॥ ૨.૩॥

સૂત્રાત્પૂર્વં શાન્તિમન્ત્રો જપાયાત્રોપવર્ણિતઃ ।
જપેન વિઘ્ના દ્વેષાદ્યાઃ શમ્યન્તિ મનસિ સ્થિતાઃ ॥ ૨.૪॥

બ્રહ્મવિત્પરમેતીતિ સૂત્રં સર્વાર્થસૂચનાત્ ।
જ્ઞેયં જ્ઞાનં ફલં ચેતિ સર્વેઽર્થાઃ સૂચિતા ઇહ ॥ ૨.૫॥

જ્ઞેયં બ્રહ્મ તદીયા ધીર્જ્ઞાનં સ્યાદ્બ્રહ્મતા ફલમ્ ।
સૂત્રવ્યાખ્યાનરૂપાયામૃચ્યેતદ્વિશદીકૃતમ્ ॥ ૨.૬॥

જ્ઞાતવ્યં બ્રહ્મ યત્તત્કિમિતિ ચેત્તસ્ય લક્ષણમ્ ।
સત્યં જ્ઞાનમનન્તં યત્તદ્બ્રહ્મેત્યવગમ્યતામ્ ॥ ૨.૭॥

આકાશાદિ જગત્સર્વમનૃતં માયિકત્વતઃ ।
નાનૃતં બ્રહ્મ તેનૈતત્સત્યમિત્યભિધીયતે ॥ ૨.૮॥

જગજ્જડં સ્વતઃ સ્ફૂર્તિરાહિત્યાદ્બ્રહ્મ તુ સ્વયમ્ ।
પુરતીત્યજડં તેન જ્ઞાનમિત્યભિધીયતે ॥ ૨.૯॥

જડં ઘટાદ્યન્તવત્સ્યાદ્દેશકાલાદિવસ્તુભિઃ ।
ન દેશાદિકૃતોઽન્તોઽસ્ય બ્રહ્માનન્તં તતઃ સ્મૃતમ્ ॥ ૨.૧૦॥

દેશકાલાદ્યન્યવસ્તુત્રયં માયાવિજૃમ્ભિતમ્ ।

બ્રહ્મ સત્યં માયિકૈસ્તૈઃ પરિચ્છિન્નં કથં ભવેત્ ॥ ૨.૧૧॥

જડાનૃતપરિચ્છિન્નવ્યાવૃત્ત્યૈવ પદત્રયમ્ ।
લક્ષકં સ્યાદખણ્ડસ્ય યત્તદ્બ્રહ્મેતિ બુધ્યતામ્ ॥ ૨.૧૨॥

તાદૃગ્બ્રહ્મ કથં વિદ્યાદિતિ ચેદભિધીયતે ।
ગુહાયાં પરમે વ્યોમ્નિ સ્થિતં બ્રહ્મ તુ વેદ યઃ ॥ ૨.૧૩॥

દેહાદભ્યન્તરઃ પ્રાણઃ પ્રાણાદભ્યન્તરં મનઃ ।
તતઃ કર્તા તતો ભોક્તા ગુહા સેયં પરમ્પરા ॥ ૨.૧૪॥

પઞ્ચકોશગુહાયાં યદજ્ઞાનં કારણં સ્થિતમ્ ।
તદ્વ્યોમ પરમં તસ્મિન્નિગૂઢં બ્રહ્મ તિષ્ઠતિ ॥ ૨.૧૫॥

જીવચૈતન્યમેવાત્ર નિગૂઢમિતિ ચેત્તદા ।
તસ્યૈવ બ્રહ્મતાં વિદ્યાજ્જીવત્વભ્રાન્તિહાનયે ॥ ૨.૧૬॥

સ્વતો બ્રહ્મૈવ ચૈતન્યં જીવત્વં પ્રાણધારણાત્ ।
કોશતાદાત્મ્યવિભ્રાન્ત્યા ભાત્યસ્ય પ્રાણધારણમ્ ॥ ૨.૧૭॥

વક્ષ્યમાણવિવેકેન તત્તાદાત્મ્યમપોહ્યતે ।
બ્રહ્મસાક્ષાત્કૃતિસ્ત્વીદૃગ્બોધેનૈવ ન ચાન્યથા ॥ ૨.૧૮॥

બાહ્યં જગત્પઞ્ચકોશાઁશ્ચાપોહ્યાન્તર્મુખાસ્ય ધીઃ ।
બ્રહ્મ સાક્ષાત્કારોત્યેવ સર્વોપાધિવિવર્જિતમ્ ॥ ૨.૧૯॥

સોપાધ્યેવ બહિર્દૃષ્ટ્યા ભાતિ બ્રહ્મ ન તાવતા ।
અપૈતિ જીવતા તસ્માદન્તર્દૃષ્ટ્યૈવ બુધ્યતામ્ ॥ ૨.૨૦॥

બહિર્દૃષ્ટિર્જગદ્ભાનં તસ્ય સત્યત્વધીરપિ ।
વિવેકાત્સત્યતાઽપૈતિ જગદ્ભાનં તુ યોગતઃ ॥ ૨.૨૧॥

બહિર્દૃષ્ટાવપેતાયામન્તર્દૃષ્ટ્યા યદીક્ષ્યતે ।
નિગૂઢં જીવચૈતન્યં તદ્બ્રહ્મેતિ પ્રપશ્યતિ ॥ ૨.૨૨॥

દૃષ્ટે તસ્મિન્ પરપ્રાપ્ત્યા વિદુષોઽતિશયોઽત્ર કઃ ।
ઇતિ ચેદ્યુગપત્સર્વકામાપ્તિરધિકા ભવેત્ ॥ ૨.૨૩॥

કામ્યન્તે વિષયાનન્દા નિખિલૈઃ પ્રાણિભિઃ સદા ।
બ્રહ્માનન્દસ્ય તે સર્વે લેશા ઇત્યપરા શ્રુતિઃ ॥ ૨.૨૪॥

આનન્દહેતવો બાહ્યા વિષયા ઇતિ વિભ્રમાત્ ।
કામયન્તે બહિર્દૃષ્ટ્યા વિષયાન્ પ્રાણિનોઽખિલાઃ ॥ ૨.૨૫॥

અભીષ્ટવિષયે લબ્ધે ધીઃ પ્રત્યાવૃત્ત્ય હૃદ્ગતમ્ ।
બ્રહ્માનન્દં ક્ષણં ભુક્ત્વા બાહ્યં કામયતે પુનઃ ॥ ૨.૨૬॥

ક્ષણિકત્વાલ્લેશતાસ્ય પૂર્ણસ્યાપ્યુપચર્યતે ।
વિષયાનન્દતા ભ્રાન્ત્યા બ્રહ્માનન્દો હિ વસ્તુતઃ ॥ ૨.૨૭॥

અન્તર્દૃષ્ટ્યા વિવેકી તુ બ્રહ્માનન્દં સદેક્ષતે ।
અન્તર્ભવન્તિ ક્ષણિકાઃ સર્વે તસ્મિન્નિરન્તરે ॥ ૨.૨૮॥

તત્ત્વવિદ્બ્રહ્મરૂપેણ સર્વાન્ કામાન્ સહાશ્નુતે ।
ઇત્યેષોઽતિશયો બ્રહ્મપ્રાપ્તિરૂપં ફલં શ્રુતમ્ ॥ ૨.૨૯॥

સૂત્રવ્યાખ્યાનરૂપાયામૃચ્યનન્તમિતીરિતમ્ ।
તદાનન્ત્યપ્રસિદ્ધ્યર્થં જગત્કારણતોચ્યતે ॥ ૨.૩૦॥

યત્સત્યં બ્રહ્મ કોશાખ્યગુહાયાં વ્યોમનામકે ।
અજ્ઞાને કારણે ગૂઢં તસ્માદાકાશ ઉદ્ગતઃ ॥ ૨.૩૧॥

ખં વાય્વગ્નિજલોર્વ્યોષધ્યન્નદેહેષુ કારણમ્ ।
પૂર્વં પૂર્વં ભવેત્કાર્યં પરં પરમિતીક્ષ્યતામ્ ॥ ૨.૩૨॥

ઇન્દ્રો માયાભિરભવદ્બહુરૂપ ઇતિ શ્રુતેઃ ।
આસન્માયિકરૂપાણિ ખાદીનિ બ્રહ્મગાનિ હિ ॥ ૨.૩૩॥

પરાસ્ય શક્તિર્વિવિધેત્યેવં શ્રુત્યન્તરેરણાત્ ।
વિવિધા બ્રહ્મણઃ શક્તિઃ સા ચ માયાનૃતત્વતઃ ॥ ૨.૩૪॥

સત્યસ્ય બ્રહ્મરૂપત્વાચ્છક્તેરનૃતતોચિતા ।
નિસ્તત્વા ભાસતે યાઽસૌ માયા સ્યાદિન્દ્રજાલવત્ ॥ ૨.૩૫॥

માયાયા વિવિધત્વેન તસ્યાઃ કાર્યેષુ ખાદિષુ ।
નામરૂપેષ્વનેકત્વં ભાત્યન્યોઽન્યવિલક્ષણમ્ ॥ ૨.૩૬॥

ભાતિ સર્વેષુ સત્યત્વમેકં યદ્બ્રહ્મગં હિ તત્ ।
સર્વાધિષ્ઠાનધર્મત્વાત્તત્સર્વત્રાનુગચ્છતિ ॥ ૨.૩૭॥

સર્પધારાદણ્ડમાલા રજ્જ્વાં યાઃ પરિકલ્પિતાઃ ।
એતાસુ રજ્જુગં દૈર્ઘ્યં સર્વાસ્વનુગતં યથા ॥ ૨.૩૮॥

વ્યોમાદ્યા દેહપર્યન્તાઃ સત્યે બ્રહ્મણિ કલ્પિતાઃ ।
સર્વેષ્વનુગતં બ્રહ્મ સત્યત્વં તસ્ય સુસ્થિતમ્ ॥ ૨.૩૯॥

અધ્યારોપાપવાદાભ્યાં નિષ્પ્રપઞ્ચં પ્રપઞ્ચ્યતે ।
ઇતિ ન્યાયેન દેહાન્ત આરોપઃ ખાદિરીરિતઃ ॥ ૨.૪૦॥

અથાપવાદો જગતઃ કથ્યતે બ્રહ્મબુદ્ધયે ।
તત્રાદૌ પુત્રમિત્રાદિનુત્ત્યૈ દેહાત્મતોચ્યતે ॥ ૨.૪૧॥

આત્મા વૈ પુત્રનામાસીત્યેવમાત્મત્વવિભ્રમઃ ।
લૌકિકોઽનૂદ્યતે પુત્રે શ્રુત્યા યુક્તિશ્ચ વિદ્યતે ॥ ૨.૪૨॥

સાકલ્યં પુત્રભાર્યાદિર્વૈકલ્યં ચાત્મનીક્ષ્યતે ।
ઇત્યાહ ભાષ્યકૃત્તેન પુત્રેઽસ્તિ સ્વાત્મતાભ્રમઃ ॥ ૨.૪૩॥

સોઽસ્યાયમાત્મા પુણ્યેભ્યઃ પ્રતિધીયત ઇત્યદઃ ।
વચો વક્ત્યૈતરેયોઽતઃ સ્વાત્મતાભ્રમ એવ હિ ॥ ૨.૪૪॥

એવં વ્યુદસિતું દેહસ્યૈવાત્મત્વમિહોચ્યતે ।
યો દેહોઽન્નમયઃ સોઽયમેવાત્માન્યો ન કશ્ચન ॥ ૨.૪૫॥

મદીયઃ પુત્રભાર્યાદિરિતિ ભેદાવભાસનાત્ ।
ગૌણી સ્યાદાત્મતા પુત્રે ભૃત્યાદૌ સિંહતા યથા ॥ ૨.૪૬॥

પૂર્વવાસનયા પુત્રે સ્વાત્મતા ભાતિ ચેત્પુનઃ ।
તદ્વાસનાપનુત્ત્યર્થં દેહાત્મત્વમુપાસ્યતામ્ ॥ ૨.૪૭॥

શિરઃ પક્ષૌ મધ્યપુચ્છે ઇતિ દેહસ્ય પક્ષિતામ્ ।
ધ્યાત્વા તન્નિષ્ઠતાં પ્રાપ્ય ત્યજેત્પુત્રાત્મતાશ્રુતિમ્ ॥ ૨.૪૮॥

ધીર્મનુષ્યોઽહમિત્યસ્તિ પુત્રોઽહમિતિ નાસ્તિ ધીઃ ।
વિકારોઽસ્તિ પરિવ્રાજો ન પુત્રસુખદુઃખયોઃ ॥ ૨.૪૯॥

અન્નજો દેહ એવાત્મા તદન્નં બ્રહ્મબુદ્ધિતઃ ।
ઉપાસ્ય સર્વમપ્યત્ર સ્વાભીષ્ટં લભતે પુમાન્ ॥ ૨.૫૦॥

વિવેકાદ્વા ધ્યાનતો વા પુત્રાદ્યાત્મત્વનિહ્નુતૌ ।
તથા દેહાત્મતાં ત્યક્તું પ્રાણાત્મત્વં વિચિત્યતામ્ ॥ ૨.૫૧॥

ન દેહસ્યાત્મતા યુક્તા પૂર્વજન્મન્યભાવતઃ ।

પુરાત્મા દેહદં કર્મ કૃત્વા પ્રાપ્નોત્યદો વપુઃ ॥ ૨.૫૨॥

આયુર્મરણયોર્હેતૌ પ્રાણે જીવાત્મતોચિતા ।
સ્થિતે પ્રાણે ભવત્યાયુઃ પ્રાણાપાયે તુ હીયતે ॥ ૨.૫૩॥

દેહાત્મવાસનાનુત્ત્યૈ પ્રાણાત્મત્વમુપાસ્યતામ્ ।
પ્રાણો બ્રહ્મેત્યુપાસીનઃ સર્વમાયુઃ સમશ્નુતે ॥ ૨.૫૪॥

પ્રાણોઽપાનઃ સમાનશ્ચોદાનવ્યાનૌ ચ વૃત્તયઃ ।
એતાસુ પૂર્વવત્પક્ષમૂર્ધાદીન્ પરિકલ્પયેત્ ॥ ૨.૫૫॥

શ્વાસોઽધોગમનં કૃત્સ્ને દેહેઽન્નસ્ય સમીકૃતિઃ ।
ઉદ્ગારાદિર્બલં દેહે ક્રિયાસ્તાસાં ક્રમાદિમાઃ ॥ ૨.૫૬॥

વૃત્તિસઙ્ઘ પ્રાણમયં ધ્યાત્વા દેહાત્મવાસનામ્ ।
સન્ત્યજ્યાથ પ્રાણમયે ત્યજેદ્દેહવદાત્મતામ્ ॥ ૨.૫૭॥

પ્રાણો નાત્મા જડત્વેન ચેતનસ્યાત્મતોચિતા ।
મનસ્તુ ચેતનત્વેન સર્વસ્ય પ્રતિભાસનાત્ ॥ ૨.૫૮॥

ચક્ષુરાદ્યક્ષસાપેક્ષં મનો બાહ્યાર્થભાસકમ્ ।
નિરપેક્ષેણ મનસા સુખાદ્યાન્તરભાસનમ્ ॥ ૨.૫૯॥

આત્મત્વં મનસો બુધ્વા ત્યક્તું પ્રાણાત્મવાસનામ્ ।
ઉપાસીત મનસ્તચ્ચ વૃત્યાખ્યાવયવૈર્યુતમ્ ॥ ૨.૬૦॥

યજુરાદ્યાશ્ચતુર્વેદા આદેશસ્તદ્ગતો વિધિઃ ।
તદ્ભાસકે મનોવૃત્તિપઞ્ચકે પક્ષિકલ્પના ॥ ૨.૬૧॥

અવાઙ્મનસગમ્યસ્ય બ્રહ્મણોઽપ્યવબોધને ।
શક્તં ભવેન્મનસ્તચ્ચ મનો બ્રહ્મેતિ કલ્પના ॥ ૨.૬૨॥

ન બ્રહ્મણિ મનોજન્યસ્ફૂર્તિસ્તસ્માદગમ્યતા ।
મનસ્યન્તર્મુખે નશ્યેદવિદ્યા તેન શક્તતા ॥ ૨.૬૩॥

પ્રાણાત્મવાસનાનાશે મનસોઽપ્યાત્મતાં ત્યજેત્ ।
કર્તુરાત્મત્વમુચિતં મનોઽન્તઃકરણં ખલુ ॥ ૨.૬૪॥

અહઙ્કર્તેત્યદોઽજ્ઞાનં વિશિષ્ટં યસ્ય ભાસકમ્ ।
તત્કર્તૃરૂપં વિજ્ઞાનમાત્મત્વેનાવગમ્યતામ્ ॥ ૨.૬૫॥

અહઙ્ક્રિયત ઇત્યેષોઽહઙ્કારાખ્યઃ સ વિગ્રહે ।
આનખાગ્રમભિવ્યાપ્ય સ્થિતો જાગરણે સ્ફુટઃ ॥ ૨.૬૬॥

તેન ચેતનવદ્દેહો ભાતિ સુપ્તૌ તુ તલ્લયાત્ ।
ભવેત્કાષ્ઠસમો દેહસ્તેનાહઙ્કાર આત્મતા ॥ ૨.૬૭॥

મદીયં મન ઇત્યુક્તેરાત્મનઃ કરણં મનઃ ।
ઇત્યાત્માનં વિવિચ્યાથ તમુપાસીત પક્ષિવત્ ॥ ૨.૬૮॥

શ્રદ્ધાદ્યાઃ પઞ્ચ તત્રસ્થાઃ કલ્પ્યા મૂર્દ્ધાદિરૂપતઃ ।
શ્રદ્ધાસ્તિક્યમૃતં બુદ્ધૌ યથા વસ્ત્વનુચિન્તનમ્ ॥ ૨.૬૯॥

યથાર્થભાષણં સત્યં યોગ એકાગ્રતા ધિયઃ ।
મહસ્તુ યોગજં જ્ઞાનં ચિન્ત્યાઃ શ્રદ્ધાદયોઽખિલાઃ ॥ ૨.૭૦॥

લૌકિકે વૈદિકે કર્તૃવિજ્ઞાનં બ્રહ્મ વેત્તિ ચેત્ ।
ત્યજેદામરણં નો ચેદ્બ્રહ્મલોકે સુખં વ્રજેત્ ॥ ૨.૭૧॥

વિજ્ઞાનધ્યાનતો નશ્યેન્મનસ્યાત્મત્વવાસના ।
વિજ્ઞાનાત્મત્વમપ્યેષ ત્યજેચ્છોકયુતત્વતઃ ॥ ૨.૭૨॥

શોકં તરત્યાત્મબોધાદિતિ શ્રુત્યન્તરે જગૌ ।
શોકસાગરમગ્નોઽયં કર્તા તસ્યાત્મતા ન હિ ॥ ૨.૭૩॥

આનન્દસ્યાત્મતા યુક્તા સોઽત્રાસ્તિ પ્રીતિદર્શનાત્ ।
સદા ભૂયાસમેવેતિ નિત્યં પ્રેમાત્મનીક્ષ્યતે ॥ ૨.૭૪॥

આનન્દૈકસ્વભાવોઽપિ કર્તૃવિજ્ઞાનસઙ્ગમાત્ ।
નિજાનન્દં તિરસ્કૃત્ય કદાચિચ્છોકમાપ્નુયાત્ ॥ ૨.૭૫॥

સમાધિસુપ્તિમૂર્છાસુ વિજ્ઞાનસ્ય લયે સતિ ।
નિત્યાનન્દસ્વરૂપેઽસ્મિઞ્છોકોઽલ્પોઽપિ ન વીક્ષ્યતે ॥ ૨.૭૬॥

મૂર્છાસુપ્ત્યોર્યદજ્ઞાનં ભાતિ તત્કારણં (કરણં) ધિયઃ ।
કારણે બુદ્ધિવૃત્તૌ ચ સ્વાનન્દઃ પ્રતિબિમ્બતિ ॥ ૨.૭૭॥

દુઃખં રાજસધીવૃત્તૌ સાત્વિક્યાં તત્સુખં ભવેત્ ।
પ્રિયં મોદઃ પ્રમોદશ્ચેત્યુચ્યતે ધીસુખં ત્રિધા ॥ ૨.૭૮॥

ઇષ્ટસ્ય દર્શનાલ્લાભાદ્ભોગાચ્ચ સ્યુઃ પ્રિયાદયઃ ।
તે ત્રયઃ કારણાનન્દ આત્માનન્દશ્ચ પઞ્ચ તે ॥ ૨.૭૯॥

પક્ષિણોઽવયવાઃ પઞ્ચ મૂર્દ્ધાદ્યાસ્તેષુ કલ્પિતાઃ ।
આનન્દમયકોશોઽયમુપાસ્યઃ પૂર્વકોશવત્ ॥ ૨.૮૦॥

અન્નપ્રાણમનોવિજ્ઞાનાનન્દૈર્જનિતા ઇમે ।
કોશાસ્તેષુ ક્રમેણ સ્યુરુત્તરોત્તરમાન્તરાઃ ॥ ૨.૮૧॥

વિજ્ઞાનકોશન્યાયેન ફલમુન્નીયતામિહ ।
તદુપાસ્તિફલં ચાર્થાત્તત્ત્વબોધફલં ભવેત્ ॥ ૨.૮૨॥

આનન્દં બ્રહ્મ વિજ્ઞાય ત્યજેદામરણં ન ચેત્ ।
શરીરે પાપ્મનો હિત્વા સર્વાન્ કામાનવાપ્નુયાત્ ॥ ૨.૮૩॥

આનન્દમયકોશેઽસ્મિન્ પઞ્ચમાવયવઃ શ્રુતઃ ।
બ્રહ્મશબ્દેન તદ્બ્રહ્મ સ્વાત્માનન્દ ઇતીક્ષ્યતામ્ ॥ ૨.૮૪॥

ઉપાસનાચ્ચિત્તશુદ્ધૌ બ્રહ્મતત્ત્વમવેક્ષ્યતે ।
ગુહાહિતબ્રહ્મબોધાત્સર્વકામાપ્તિરીરિતા ॥ ૨.૮૫॥

ગુહાહિતં બ્રહ્મ યત્તત્સત્યં જ્ઞાનમિતિ શ્રુતમ્ ।
તસ્ય જ્ઞાનસ્ય દૃશ્યાસ્તે કોશાઃ સર્વં જગત્તથા ॥ ૨.૮૬॥

જગત્કોશાશ્ચ દૃશ્યત્વાત્સન્તિ બ્રહ્મ ન દૃશ્યતે ।
અતો નાસ્તીત્યાહ મૂઢસ્તત્સત્તાં વક્તિ બુદ્ધિમાન્ ॥ ૨.૮૭॥

બ્રહ્મ નાસ્તીતિ ચેદ્વેદ સ્વયમેવ ભવેદસત્ ।
કોશાત્મતા દૂષિતા ચેત્ નાન્ય આત્માસ્તિ તન્મતે ॥ ૨.૮૮॥

આનન્દમકોશેઽપિ પ્રિયાદ્યાઃ નશ્વરાસ્ત્રયઃ ।
અજ્ઞાનં ચ જ્ઞાનનાશ્યં ન બ્રહ્માઙ્ગીકરોત્યસૌ ॥ ૨.૮૯॥

અસ્તિ બ્રહ્મેતિ ચેદ્વેદ સ્વયમેવાત્ર સમ્ભવેત્ ।
અદૃશ્યસ્યાપિ સત્તા સ્યાત્સ્વપ્રકાશત્વસમ્ભવાત્ ॥ ૨.૯૦॥

ગૌણાત્મા પુત્રભાર્યાદિર્મિથ્યાત્માન્નમયાદિકઃ ।
બ્રહ્માનન્દો મુખ્ય આત્મા ક્રમેણૈતે વિવેચિતાઃ ॥ ૨.૯૧॥

ઉત્તરાત્મવિવેકેઽસ્ય પૂર્વાત્મા દેહતાં વ્રજેત્ ।
તેનોત્તરેણ પૂર્વસ્ય પૂર્ણત્વાદ્દેહિદેહતા ॥ ૨.૯૨॥

સત્યેવં નિખિલં પૂર્વં શરીરં હ્યન્તિમાત્મનઃ ।

બ્રહ્માનન્દસ્તુ શારીરઃ પૂર્વસ્યાત્મેતિ નિર્ણયઃ ॥ ૨.૯૩॥

શ્રવણં મનનં ચોભે તત્ત્વજ્ઞાનસ્ય સાધને ।
ઉક્તનિર્ણયપર્યન્તં વિજ્ઞાનં શ્રવણાદ્ભવેત્ ॥ ૨.૯૪॥

અથ સ્વબુદ્ધિદોષેણ યતઃ સન્દેહસમ્ભવઃ ।
અતોઽસૌ મનનં કુર્યાત્સન્દેહાઃ સ્યુસ્ત્રયોઽસ્ય હિ ॥ ૨.૯૫॥

બ્રહ્માસ્તિ નો વેત્યેકઃ સ્યાદજ્ઞાની મુચ્યતે ન વા ।
તત્ત્વવિન્મુચ્યતે નો વેત્યપરૌ સંશયાવુભૌ ॥ ૨.૯૬॥

યદસ્તિ નામરૂપાભ્યાં વ્યાપ્તં તદ્વિયદાદિકમ્ ।
બ્રહ્મ નિર્નામરૂપત્વાન્નાસ્તીત્યાહ વિમૂઢધીઃ ॥ ૨.૯૭॥

વિવેકી બ્રહ્મણઃ સત્તાં સૃષ્ટિકામાદિહેતુભિઃ ।
સાધયન્બહુધા મૂઢં બોધયેન્મોહનુત્તયે ॥ ૨.૯૮॥

અકામયત સૃષ્ટ્યાદૌ પરમાત્મા સ્વમાયયા ।
બહુ સ્યામહમેવાતઃ પ્રજાયેયેતિ કામના ॥ ૨.૯૯॥

સ્વસ્યૈવ બહુધા ચોક્તેરુપાદાનં મૃદાદિવત્ ।
તથા કામયિતૃત્વે ન નિમિત્તત્ત્વં કુલાલવત્ ॥ ૨.૧૦૦॥

નિર્ધર્મકેઽપ્યાત્મતત્ત્વે નિમિત્તત્વં સ્વમાયયા ।
ઉપાદાનત્વસહિતં માયા દુર્ઘટકારિણી ॥ ૨.૧૦૧॥

અસમ્ભાવ્યં ન માયાયામુપાલમ્ભં ન સાઽર્હતિ ।
તતો વેદો યથા બ્રૂતે સૃષ્ટિરેષા તથેષ્યતામ્ ॥ ૨.૧૦૨॥

સૃજ્યમાલોચયન્ સર્વમસૃજત્પરમેશ્વરઃ ।
સૃષ્ટ્વાઽથ જીવરૂપેણ પ્રવિવેશ વપુષ્યયમ્ ॥ ૨.૧૦૩॥

યો વિજ્ઞાનમયસ્તસ્મિન્ ચૈતન્યં પ્રતિબિમ્બિતમ્ ।
તચ્ચ ધારયતિ પ્રાણાન્ જીવાખ્યાં લભતે તતઃ ॥ ૨.૧૦૪॥

ભોક્તા ભૂત્વેશ્વરસ્તદ્વદ્ભોગ્યરૂપોઽપિ સોઽભવત્ ।
ભોગ્યં ચ બહુધા સચ્ચ ત્યચ્ચેત્યાદિવિભેદતઃ ॥ ૨.૧૦૫॥

સત્પ્રત્યક્ષં પરોક્ષં ત્યત્તદભાવાવુભૌ તથા ।
વક્તું શક્યમશક્યં ચેત્યાદિ દ્વન્દ્વેઽસ્તિ ભોગ્યતા ॥ ૨.૧૦૬॥

કામિત્વમાલોચકત્વં સ્રષ્ટૃત્વં ચ પ્રવેષ્ટૃતા ।
ભોગ્યાકારશ્ચ પઞ્ચૈતે બ્રહ્મસદ્ભાવહેતવઃ ॥ ૨.૧૦૭॥

સદ્રૂપઃ પરમાત્મા સ્યાત્કામિત્વાત્સ્વર્ગકામિવત્ ।
આલોચનાન્મન્ત્રિવત્સન્ સ્રષ્ટૃત્વાશ્ચ કુલાલવત્ ॥ ૨.૧૦૮॥

પ્રવેષ્ટૃત્વાત્સર્પવત્સન્ ભોગ્યત્વાચ્ચૌદનાદિવત્ ।
નાનુમાનૈરેવ કિન્તુ વિદ્વત્પ્રત્યક્ષતોઽપિ સન્ ॥ ૨.૧૦૯॥

યત્સત્યં બ્રહ્મ પૂર્વોક્તં તદેવ જગદાત્મના ।
ભાતિ ભ્રાન્ત્યા તતઃ સર્વં બ્રહ્મેત્યાચક્ષતે બુધાઃ ॥ ૨.૧૧૦॥

સર્પધારાદિકા ભ્રાન્ત્યા કલ્પિતાસ્તત્ત્વદર્શને ।
રજ્જુરેવ યથા તદ્વદ્બ્રહ્મૈવ સકલં જગત્ ॥ ૨.૧૧૧॥

નામરૂપયુતત્વેન જગત્સદ્બ્રહ્મ નેતિ યત્ ।
પૂર્વપક્ષિમતં તન્ન બ્રહ્મસત્ત્વં તદીક્ષ્યતામ્ ॥ ૨.૧૧૨॥

રજ્જુદૈર્ઘ્યં યથા સર્પધારાદિષ્વનુગચ્છતિ ।
બ્રહ્મસત્ત્વં તથા વ્યોમવાય્વાદિષ્વનુગચ્છતિ ॥ ૨.૧૧૩॥

અસદેવેદમગ્રેઽભૂન્નામરૂપાત્મકં જગત્ ।
પશ્ચાત્તુ બ્રહ્મણા સૃષ્ટં સદભૂદ્બ્રહ્મસત્ત્વતઃ ॥ ૨.૧૧૪॥

તદ્બ્રહ્માત્માનમેવેમં સચ્ચિદાનન્દલક્ષણમ્ ।
અકાર્ષીજ્જગદાકારં સ્વયમેવ સ્વમાયયા ॥ ૨.૧૧૫॥

અસ્તિ ભાતિ પ્રિયઞ્ચેતિ પ્રતિવસ્ત્વવભાસતે ।
ત એતે સચ્ચિદાનન્દા બ્રહ્મગા ભાન્તિ વસ્તુષુ ॥ ૨.૧૧૬॥

નામરૂપે ઘટાદીનાં પ્રાગભાવયુતે તતઃ ।
અભાવત્વં ચ ભાવત્વં પર્યાયેણેક્ષ્યતે તયોઃ ॥ ૨.૧૧૭॥

આગમાપાયિધર્મૌ યૌ ન તયોર્ધર્મિરૂપતા ।
શયનોત્થાનયોર્નાસ્તિ દેહવસ્તુસ્વરૂપતા ॥ ૨.૧૧૮॥

સત્ત્વાસત્ત્વે અન્યદીયે ભાસેતે નામરૂપયોઃ ।
માયારૂપમસત્ત્વં સ્યાત્સત્તાયા બ્રહ્મરૂપતા ॥ ૨.૧૧૯॥

જાડ્યદુઃખે માયિકેસ્તો ભાનાનન્દૌ પરાત્મગૌ ।
લૌકિકાઃ સચ્ચિદાનન્દાઃ બ્રહ્મગાશ્ચેદસત્કથમ્ ॥ ૨.૧૨૦॥

ભવેત્તુ બ્રહ્મ સત્તાઽસ્મિન્નાનન્દોઽસ્તિ કથં શ઼ૃણુ ।
આનન્દોઽત્રાભ્યુપેતવ્યો રસવાન્ (રસત્વાત્) મધુરાદિવત્ ॥ ૨.૧૨૧॥

મૂઢસ્ય મધુરાદિઃ સ્યાદ્રસો બ્રહ્મ વિવેકિનઃ ।
મધુરાદિભુગાનન્દી બ્રહ્મવિચ્ચ તથા સુખી ॥ ૨.૧૨૨॥

બ્રહ્માનન્દો ન ચેદત્ર દેહં કો નામ ચેષ્ટયેત્ ।
પ્રાણાક્ષાણાં ચેષ્ટકત્વં ન તત્ર કરણત્વતઃ ॥ ૨.૧૨૩॥

ન કેવલં ચેષ્ટકત્વં વિષયાનન્દહેતુતા ।
અપ્યલ્પવિષયાન્ લબ્ધ્વા સ્વાનન્દે મજ્જતિ ક્ષણમ્ ॥ ૨.૧૨૪॥

વિષયાનન્દપર્યન્તૈઃ કામસૃષ્ટ્યાદિહેતુભિઃ ।
બ્રહ્મસત્ત્વે સ્થિતે મુક્તિશ્ચિન્ત્યતે વિદ્વદજ્ઞયોઃ ॥ ૨.૧૨૫॥

વિદ્વાન્ બ્રહ્મેતિ મુક્તશ્ચેન્મુચ્યેતાજ્ઞોઽપ્યભિજ્ઞવત્ ।
બ્રહ્મરૂપોઽપિ બદ્ધશ્ચેદજ્ઞોઽભિજ્ઞોઽપિ બધ્યતે ॥ ૨.૧૨૬॥

મૈવં બ્રહ્માત્મૈક્યબોધ એવૈકો મોક્ષકારણમ્ ।
ઐક્યદર્શી મુચ્યતેઽતો ભેદદર્શી ન મુચ્યતે ॥ ૨.૧૨૭॥

ઊર્ધ્વાકારે સમેઽપ્યસ્મિંશ્ચોરદર્શી બિભેતિ હિ ।
સ્થાણુદર્શી નિર્ભયોઽતસ્તત્ત્વબોધઃ પ્રયોજકઃ ॥ ૨.૧૨૮॥

જ્ઞાતેઽપિ કર્મકાણ્ડાર્થે વેદાન્તાર્થમજાનતઃ ।
જન્માદિભીર્ભવત્યેવ વાય્વાદીનાં યથા તથા ॥ ૨.૧૨૯॥

વાયુઃ સૂર્યો વહ્નિરિન્દ્રો મૃત્યુશ્ચાતીતજન્મનિ ।
ધર્મજ્ઞા અપ્યતત્ત્વજ્ઞા ઇદાનીં વિભ્યતીશ્વરાત્ ॥ ૨.૧૩૦॥

જ્ઞાની કામાનેતિ સર્વાન્ રસો વૈ સ ઇતિ શ્રુતમ્ ।
બ્રહ્માનન્દં સ્ફુટીકર્તું મીમાંસાઽઽનન્દગોચ્યતે ॥ ૨.૧૩૧॥

સમ્પૂર્ણો માનુષાનન્દઃ સાર્વભૌમે ગુણૈર્યુતે ।
હિરણ્યગર્ભે સમ્પૂર્ણો દેવાનન્દોઽવધી હિ તૌ ॥ ૨.૧૩૨॥

મધ્યસ્થે પૂર્વપુણ્યાનામુત્કર્ષાદ્વર્ધતે સુખમ્ ।
સર્વેષાં યત્સુખં તત્તુ નિષ્કામે જ્ઞાનિનીષ્યતે ॥ ૨.૧૩૩॥

સર્વકામાપ્તિરેષાથ રસાખ્યાનન્દ ઉચ્યતે ।

અધ્યાત્મમધિભૂતં ચાધિદૈવં ચૈક એવ સઃ ॥ ૨.૧૩૪॥

સર્વે સ્વસ્વપદે તૃપ્તાઃ કામયન્તે ન તત્પદમ્ ।
જ્ઞાની તુ દોષદૃષ્ટ્યાત્ર નિષ્કામસ્તૈઃ સમસ્તતઃ ॥ ૨.૧૩૫॥

બુભુત્સૌ પુરુષેઽન્યેષુ મનુષ્યેષુ ચ યોઽસ્તિ યઃ ।
આદિત્યે ચાન્યદેવેષુ સ આનન્દો ન ભિદ્યતે ॥ ૨.૧૩૬॥

પરપ્રેમાસ્પદત્વસ્ય લક્ષણસ્યૈકરૂપતઃ ।
લક્ષ્યાનન્દો ન ભિન્નઃ સ્યાદખણ્ડૈકરસો હ્યતઃ ॥ ૨.૧૩૭॥

એવં વિદ્વાન્ સ્વપુત્રાદેઃ કોશષટ્કાત્પ્રકલ્પિતાત્ ।
વ્યુત્થાયાખણ્ડૈકરસે સ્વાનન્દે પ્રતિતિષ્ઠતિ ॥ ૨.૧૩૮॥

સાર્વભૌમાદિકાનન્દાઃ પૂર્વેભ્યઃ શતસઙ્ખ્યયા ।
પરેઽધિકાસ્તે તુ લેશા બ્રહ્માનન્દસ્ય બિન્દુવત્ ॥ ૨.૧૩૯॥

તસ્માદિયત્તા નૈવાસ્ય વક્તું ધ્યાતું ચ શક્યતે ।
ન બિભેત્યેવ તં વિદ્વાન્ જન્મહેતોઃ કુતશ્ચન ॥ ૨.૧૪૦॥

પુણ્યં નાકરવં કસ્માત્પાપં તુ કૃતવાન્ કુતઃ ।
ઇતિ ચિન્તા તપત્યજ્ઞં જ્ઞાનિનં ન તપત્યસૌ ॥ ૨.૧૪૧॥

તાપકત્વં તયોર્વિદ્વાનુપેક્ષાનુષ્ઠિતિં તયોઃ ।
આત્માનં પ્રીણયન્ બોધાત્સુદૃઢીકુરુતે ધિયમ્ ॥ ૨.૧૪૨॥

દેહેન્દ્રિયકૃતે પુણ્યપાપે ચાત્મતયા સદા ।
પશ્યન્ સર્વાત્મતાં સ્વસ્ય ગાયન્ સામ્નાઽવતિષ્ઠતે ॥ ૨.૧૪૩॥

અહમન્નં તથાન્નાદઃ શ્લોકકૃચ્ચેતરોઽપ્યહમ્ ।
ઇતિ સર્વાત્મતાં ગાયન્ જીવન્મુક્ત ઇતીર્યતે ॥ ૨.૧૪૪॥

જીવન્મુક્ત્યવસાનાયા વિદ્યાયા મુખ્યસાધનમ્ ।
વિચારો બ્રહ્મણસ્તેન ભૃગુર્બ્રહ્માવબુદ્ધવાન્ ॥ ૨.૧૪૫॥

સત્યં તપો દમઃ શાન્તિર્દાનં ધર્મઃ પ્રજાગ્રયઃ ।
અગ્નિહોત્રં યાગયોગૌ ન્યાસશ્ચૈતૈર્બુભુત્સતામ્ ॥ ૨.૧૪૬॥

ન્યાસોઽધિકં તપો ન્યાસી યુઞ્જીતાત્માનમોમિતિ ।
યોગિનસ્તસ્ય દેહાંશા યાગાઙ્ગૈરખિલૈઃ સમાઃ ॥ ૨.૧૪૭॥

અહોરાત્રાદિકાલાસ્તુ સમા દર્શાદિયાગકૈઃ ।
જીવનં સત્રતુલ્યં સ્યાન્મુચ્યતે યોગિસેવકઃ ॥ ૨.૧૪૮॥

સ ચોત્તરાયણે પ્રેત આદિત્યં પ્રાપ્ય મુચ્યતે ।
અયને દક્ષિણે પ્રેતશ્ચન્દ્રં પ્રાપ્ય ન મુચ્યતે ॥ ૨.૧૪૯॥

તૈત્તિરીયકવિદ્યાયાઃ પ્રકાશેનોપસેવિનઃ ।
બુભુત્સૂનનુગૃહ્ણાતુ વિદ્યાતીર્થમહેશ્વરઃ ॥ ૨.૧૫૦॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
તૈત્તિરીયકવિદ્યાપ્રકાશો નામ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

## ૩. છાન્દોગ્યોપનિષદિ શ્વેતકેતુવિદ્યાપ્રકાશો નામ તૃતીયોઽધ્યાયઃ ।

છાન્દોગ્યે શ્વેતકેતુર્યામારુણેર્લબ્ધવાનિમામ્ ।
બ્રહ્મવિદ્યાં સઙ્ગ્રહેણ વક્ષ્યેઽહં સુખબુદ્ધયે ॥ ૩.૧॥

વેદાનધીત્ય ગર્વેણ શ્વેતકેતુઃ પરાઙ્મુખઃ ।
આસીત્પ્રત્યઙ્મુખીકર્તું ગુરુરાહાતિવિસ્મયમ્ ॥ ૩.૨॥

એકતત્ત્વે શ્રુતે સર્વમશ્રુતં ચ શ્રુતં ભવેત્ ।
અમતં ચ મતં તદ્વદવિજ્ઞાતં ચ બુધ્યતે ॥ ૩.૩॥

નર્ગ્વેદજ્ઞાનમાત્રેણ યજુર્વેદાદિ બુધ્યતે ।
તસ્માદેકધિયા સર્વજ્ઞાનં સ્યાદિત્યલૌકિકમ્ ॥ ૩.૪॥

મૈવં મૃદ્ધેમલોહેષુ લૌકિકેષ્વસ્ય દર્શનાત્ ।
મૃદાદિજ્ઞાનતઃ સર્વં મૃન્મયં જ્ઞાયતે સ્ફુટમ્ ॥ ૩.૫॥

મૃદો ઘટશરાવાદ્યાઃ વિકારાસ્તત્તદાકૃતિઃ ।
મૃદ્બોધાદ્બુધ્યતે નેતિ યદુચ્યેત ન બુધ્યતામ્ ॥ ૩.૬॥

આકૃત્યાધારભાગો યો ઘટસ્યાસૌ તુ બુધ્યતે ।
આધારો મૃત્તિકાઽધેય આકારશ્ચોભયં ઘટઃ ॥ ૩.૭॥

આધારભાગમાત્રેઽપિ જ્ઞાતે જ્ઞાતો ઘટો ભવેત્ ।
ગોપુચ્છમાત્રસંસ્પર્શાદ્ગોસ્પર્શવ્રતપૂર્તિવત્ ॥ ૩.૮॥

આકૃતેર્યદ્વદજ્ઞાને ઘટાજ્ઞાનં ત્વયોચ્યતે ।
તદ્વદાધારબોધેન ઘટો બુદ્ધઃ કુતો ન હિ ॥ ૩.૯॥

આકૃત્યાધારયોસ્તુલ્યં ભાગત્વં ન મૃદં વિના ।
કેવલાકૃતિમાત્રઃ સન્ ઘટઃ ક્વાઽપિ સમીક્ષ્યતે ॥ ૩.૧૦॥

મૃદ્રૂપાત્કારણદ્રવ્યાત્કાર્યદ્રવ્યં ઘટાત્મકમ્ ।
અન્યત્તત્સમવેતં હિ મૃદીતિ પ્રાહ તાર્કિકઃ ॥ ૩.૧૧॥

સ્વયુક્ત્યાઽસૌ તથા બ્રૂતે નત્વેતલ્લોકસમ્મતમ્ ।
ઘટે મૃદઃ પૃથગ્ભૂતે કીદૃક્તત્ત્વમુદીર્યતામ્ ॥ ૩.૧૨॥

વાચૈવારભ્યતે કિંવા પૃથગાનીયતે વદ ।
વાચૈવારભ્યતે તત્ત્વં કિઞ્ચિન્ન સ્યાત્ખપુષ્પવત્ ॥ ૩.૧૩॥

મૃગતૃષ્ણામ્ભસિ સ્નાતઃ ખપુષ્પકૃતશેખરઃ ।
વન્ધ્યાપુત્ર ઇતિ પ્રોક્તો નિસ્તત્ત્વમખિલં ખલુ ॥ ૩.૧૪॥

પૃથગાનયનં કર્તું ધીમતાપિ ન શક્યતે ।
અતોઽનૃતો ઘટો નૈવ સત્ય ઇત્યભ્યુપેયતામ્ ॥ ૩.૧૫॥

સમવાયસ્ત્વયા પ્રોક્ત આરોપં બ્રૂમહે વયમ્ ।
સ્થાણાવારોપિતશ્ચોરો યથા મૃદિ ઘટસ્તથા ॥ ૩.૧૬॥

આરોપાત્પૂર્વમૂર્ધ્વં ચ તદભાવાદસત્યતા ।
આદાવન્તે ચ યન્નાસ્તિ વર્તમાનેઽપિ તત્તથા ॥ ૩.૧૭॥

કાલત્રયાનુગઃ સ્થાણુઃ સત્યો મૃચ્ચ તથેક્ષ્યતામ્ ।
સત્યાનૃતે ચ મિથુનીકૃત્ય કુમ્ભ ઇતીર્યતે ॥ ૩.૧૮॥

શબ્દપ્રત્યયકાર્યાણિ સન્તિ મૃદ્ઘટયોઃ પૃથક્ ।
સ્થાણૌ ચૌરે ચ દૃષ્ટાનિ પૃથક્તાનિ તથાઽત્ર ચ ॥ ૩.૧૯॥

દ્વિવિધવ્યવહારસ્ય સદ્ભાવેઽપિ વિવેકિનઃ ।
સત્યાયાં મૃદિ તાત્પર્યં નાનૃતેઽસ્તિ ઘટાદિકે ॥ ૩.૨૦॥

ઇક્ષૌ રસોઽસ્ત્યૃજીષં ચ રસં ગૃહ્ણાતિ બુદ્ધિમાન્ ।
નર્જીષમેવં કુમ્ભેઽપિ મૃદ્ભાગે યુક્ત આદરઃ ॥ ૩.૨૧॥

યે ઘટાદિષુ મૃદ્ભાગા જ્ઞાતવ્યા આદરેણ તે ।
સર્વેઽપિ રાશિવિજ્ઞાનાદેવ જ્ઞાતા ભવન્તિ હિ ॥ ૩.૨૨॥

મૃદ ઐક્યેઽપિ સર્વત્વમાકારૈસ્તદુપાધિભિઃ ।

નિરુપાધિકવિજ્ઞાનાત્સર્વોપહિતધીર્ભવેત્ ॥ ૩.૨૩॥

કટકાદૌ સત્યભાગા બુદ્ધા હેમધિયા તથા ।
કુઠારાદૌ સત્યભાગા બુધ્યન્તે લોહબુદ્ધિતઃ ॥ ૩.૨૪॥

યદ્યત્કાર્યં તસ્ય તસ્ય ધીઃ સ્વોપાદાનબુદ્ધિતઃ ।
ઇતિ વ્યાપ્તિં વિવક્ષિત્વા દૃષ્ટાન્તા બહવઃ શ્રુતાઃ ॥ ૩.૨૫॥

સર્વં જગદુપાદાને શ્રુતે સતિ ભવેચ્છ્રુતમ્ ।
મતે જ્ઞાતે મતં જ્ઞાતમિત્યલૌકિકતા કુતઃ ॥ ૩.૨૬॥

શ્રવણં ગુરુશાસ્ત્રાભ્યાં મનનં તુ સ્વયુક્તિભિઃ ।
વિજ્ઞાનં સ્વાનુભૂત્યેતિ શ્રવણાદેરસઙ્કરઃ ॥ ૩.૨૭॥

શ્વેતકેતુઃ સર્વબોધમેકબોધેન વિશ્વસન્ ।
પ્રત્યઙ્મુખોઽભવત્તસ્મૈ સર્વોપાદાનમીરિતમ્ ॥ ૩.૨૮॥

ઇદં જગન્નામરૂપયુક્તમદ્ય સદીક્ષ્યતે ।
સૃષ્ટેઃ પુરા સદેવાસીન્નામરૂપવિવર્જિતમ્ ॥ ૩.૨૯॥

મૃદ્ધેમલોહવસ્તૂનિ વિકારોત્પત્તિતઃ પુરા ।
નિર્વિકારાણ્યુપાદાનમાત્રાણ્યાસન્ યથા તથા ॥ ૩.૩૦॥

સ્વસજાતિવિજાત્યુત્થભેદત્રયવિવર્જનાત્ ।
એકમેવાદ્વિતીયં તત્સદ્વસ્ત્વિત્યવગમ્યતામ્ ॥ ૩.૩૧॥

વૃક્ષસ્ય સ્વગતો ભેદઃ શાખાદ્યવયવૈસ્તથા ।
વૃક્ષાન્તરાત્સજાતીયો વિજાતીયઃ શિલાદિતઃ ॥ ૩.૩૨॥

ન સત્યવયવાઃ સન્તિ તેનૈકં સ્યાદખણ્ડકમ્ ।
જાત્યભાવાત્સજાતીયં વિજાતીયં ચ દુર્ભણમ્ ॥ ૩.૩૩॥

એકાદિભિઃ પદૈર્ભેદત્રયમત્ર નિર્વાર્યતે ।
સર્વભેદવિહીનં યદખણ્ડં તત્સદીક્ષ્યતામ્ ॥ ૩.૩૪॥

અસ્તીતિ શબ્દબુદ્ધી દ્વે દૃશ્યેતે નામરૂપયોઃ ।
તદભાવાત્પુરા સૃષ્ટેઃ શૂન્યમાહુરવૈદિકાઃ ॥ ૩.૩૫॥

નામરૂપાત્મકં શૂન્યાત્કિલૈતદુપપદ્યતે (ઉપજાયતે)।
તદયુક્તં ન વન્ધ્યાયાઃ પુત્રાત્પુત્રાન્તરોદ્ભવઃ ॥ ૩.૩૬॥

શૂન્યજત્વે નામ શૂન્યં રૂપં શૂન્યમિતીદૃશઃ ।
શૂન્યાનુવેધો ભાસેત સદ્વેધસ્ત્વવભાસતે ॥ ૩.૩૭॥

તતઃ સત્કારણં સત્તુ સર્વસૃષ્ટ્યર્થમૈક્ષેત ।
બહુ સ્યામહમેવાતઃ પ્રજાયેયેતિ માયયા ॥ ૩.૩૮॥

વસ્તુતો બહુભાવશ્ચેદદ્વૈતં સદ્વિનશ્યતિ ।
માભૂન્નાશ ઇતિ શ્રુત્યા પ્રકર્ષેણ જનિઃ શ્રુતા ॥ ૩.૩૯॥

પ્રકર્ષો નામ પૂર્વસ્માદાધિક્યમધિકા તુ યા ।
સા માયા ન સતી નાપિ શૂન્યા સ્યાદૂષિતત્વતઃ ॥ ૩.૪૦॥

માયયા બહુરૂપત્વે સદદ્વૈતં ન નશ્યતિ ।
માયિકાનાં હિ રૂપાણાં દ્વિતીયત્વમસમ્ભવિ ॥ ૩.૪૧॥

અચિન્ત્યશક્તિર્માયાતો દુર્ઘટં ઘટયત્યસૌ ।
ઉપાદાનનિમિત્તત્વે કલ્પ્યેતે સતિ માયયા ॥ ૩.૪૨॥

બહુ સ્યામિત્યુપાદાનભાવઃ પ્રોક્તો મૃદાદિવત્ ।
ઐક્ષતેતિ નિમિત્તત્વમિતિ પ્રોક્તં કુલાલવત્ ॥ ૩.૪૩॥

માયાવૃત્તિવિશેષે યા ચિચ્છાયાઽસૌ સદીક્ષણમ્ ।
ઈક્ષિત્વા સસૃજે તેજસ્તાદૃક્ સઙ્કલ્પલીલયા ॥ ૩.૪૪॥

આકાશવાયૂ પ્રાક્ સૃષ્ટાવિતિ પ્રોવાચ તિત્તિરિઃ ।
દિઙ્માત્રમારુણિઃ સૃષ્ટેર્વક્તું તેજ ઉદૈરયત્ ॥ ૩.૪૫॥

બ્રહ્મોપલક્ષણાયૈવ સૃષ્ટિઃ સર્વત્ર કથ્યતે ।
જગતઃ કિયતાઽપ્યેતચ્છક્યં લક્ષયિતું ખલુ ॥ ૩.૪૬॥

તેજસોઽચેતનત્વેઽપિ તેજઃ કઞ્ચુકસંયુતમ્ ।
તદ્બ્રહ્મ પૂર્વવદ્વીક્ષ્ય સઙ્કલ્પાત્સસૃજે હ્યપઃ ॥ ૩.૪૭॥

અપ્કઞ્ચુકં બ્રહ્મ પૃથ્વીમન્નહેતુમકલ્પયત્ ।
તેજોઽબન્નેભ્ય એતેભ્યો દેહબીજાનિ જજ્ઞિરે ॥ ૩.૪૮॥

જરાયુજાણ્ડજોદ્ભિજ્જાનીતિ બીજત્રયં ખલુ ।
જીવરૂપપ્રવેશાર્થમૈક્ષત બ્રહ્મ દેવતાઃ ॥ ૩.૪૯॥

દૃષ્ટ્વા ભૂય ઇહોત્પન્નાસ્તેજોઽબન્નાખ્યદેવતાઃ ।
એકૈકાં ત્રિવૃતં તાસુ કુર્વે દેહાદિસૃષ્ટયે ॥ ૩.૫૦॥

તેજસ્યબન્નયોરંશાવલ્પૌ પ્રક્ષિપ્ય મિશ્રણાત્ ।
તેજસ્ત્રિવૃત્કૃતં તદ્વદન્યયોરપિ યોજ્યતામ્ ॥ ૩.૫૧॥

તેજોઽબન્નૈસ્ત્રિવૃદ્ભૂતૈરણ્ડજાદિવપુષ્ચયમ્ ।
નિર્માય જીવરૂપેણ પ્રાવિશત્તેષુ સર્વતઃ ॥ ૩.૫૨॥

અહઙ્કારસ્તુ ચૈતન્યસંયુક્તઃ પ્રાણધારણાત્ ।
જીવઃ સ્યાત્સર્વદેહેષુ વ્યાપ્નોત્યાપાદમસ્તકમ્ ॥ ૩.૫૩॥

સદ્વસ્તુન્યેવમારોપ્ય સંસારો માયયા કૃતઃ ।
અવિચારકૃતારોપનિવૃત્ત્યર્થં વિચાર્યતામ્ ॥ ૩.૫૪॥

ત્રિવૃત્કરણમગ્ન્યાદૌ સ્પષ્ટં તાવદ્વિચારિણઃ ।
પ્રસિદ્ધે તૈજસેઽપ્યગ્નાવબન્નાંશાવવસ્થિતૌ ॥ ૩.૫૫॥

જ્વાલાયાં રોહિતં રૂપં બહુલં તત્તુ તેજસઃ ।
કિઞ્ચિચ્છુક્લમપામેતત્કિઞ્ચિત્કૃષ્ણં તુ ભૂમિગમ્ ॥ ૩.૫૬॥

રૂપત્રયે ભૂતગતે વિવિક્તે ભૌતિકોઽનલઃ ।
કારણવ્યતિરેકેણ વાચૈવારભ્યતે વૃથા ॥ ૩.૫૭॥

જગતશ્ચાક્ષુષસ્યેત્થં મિથ્યાત્વં વક્તુમાદિતઃ ।
તેજોઽબન્નત્રયસ્યાત્ર ચાક્ષુષસ્યોદિતા જનિઃ ॥ ૩.૫૮॥

આદિત્યચન્દ્રવિદ્યુત્સુ મિથ્યાત્વં વહ્નિવન્નયેત્ ।
ગૃહીત્વૈતાવતા વ્યાપ્તિં કાર્યમિથ્યાત્વમૂહ્યતામ્ ॥ ૩.૫૯॥

તેજોઽબન્નાખ્યકાર્યાણાં મિથ્યાત્વે સ્યાત્સદદ્વયમ્ ।
કારણં સત્યમેષાં તુ પૂર્વેષાં જ્ઞાનિનાં મતિઃ ॥ ૩.૬૦॥

દૃશ્યે બાહ્યે ભૌતિકત્વમસ્તુ દેહે તુ નો તથા ।
ઇતિ મૂઢમતેર્નુત્યૈ દેહે ભૌતિકતોચ્યતે ॥ ૩.૬૧॥

યદન્નં પાર્થિવં ભુક્તં તદ્ધીમાંસપુરીષકૈઃ ।
સૂક્ષ્મમધ્યસ્થૂલભાગૈર્દેહેઽસ્મિન્ પરિણમ્યતે ॥ ૩.૬૨॥

પ્રાણ લોહિતમૂત્રાંશૈરપાં પરિણતિસ્ત્રિધા ।
વાઙ્મજ્જાસ્થિવિભેદઃ સ્યાદ્ઘૃતતૈલાદિ તેજસઃ ॥ ૩.૬૩॥

સ્થૂલે ચ મધ્યમે ભાગે કારણાનુગતિઃ સ્ફુટા ।

ધીપ્રાણવાક્ષુ સન્દેહં દધિદૃષ્ટાન્તતોઽનુદત્ ॥ ૩.૬૪॥

ઘૃતે વિલીને દધ્યંશોઽનુગતો ભાતિ ન સ્ફુટઃ ।
તથાપિ દધિકાર્યત્વં વિદ્યતે સર્વસમ્મતમ્ ॥ ૩.૬૫॥

તથા મનઃપ્રાણવાચાં ભવત્વન્નાદિકાર્યતા ।
અતીન્દ્રિયત્વાત્પ્રત્યક્ષા કારણાનુગતિર્ન હિ ॥ ૩.૬૬॥

નિત્યદ્રવ્યં મનો નાન્નકાર્યમિત્યાહ તાર્કિકઃ ।
સ એષોંઽઙ્ગારદૃષ્ટાન્તદ્વારેણ પ્રતિબોધ્યતે ॥ ૩.૬૭॥

યથા ખદ્યોતમાત્રઃ સ્યાદઙ્ગારઃ કાષ્ઠસઙ્ક્ષયે ।
કાષ્ઠવૃદ્ધૌ જ્વલત્યગ્નિસ્તથા વિદ્યાન્મનોન્નયોઃ ॥ ૩.૬૮॥

ત્યક્તેઽન્ને પઞ્ચદશસુ દિનેષુ ક્ષીયતે મનઃ ।
તેન સ્મર્તું ન શક્તોઽભૂચ્છ્વેતકેતુર્ન કિઞ્ચન ॥ ૩.૬૯॥

અન્નેન પુષ્ટે મનસિ વેદાન્ સસ્માર તત્ક્ષણાત્ ।
અન્વયવ્યતિરેકાભ્યાં મનોઽન્નમયમિષ્યતામ્ ॥ ૩.૭૦॥

ભૌતિકત્વેઽખિલસ્યૈવં સ્થિતે ભૂતાતિરેકતઃ ।
તન્નાસ્તિ તદ્વદ્ભૂતાનિ નૈવ સદ્વ્યતિરેકતઃ ॥ ૩.૭૧॥

જગતઃ કારણં યત્સદદ્વૈતં તદ્વિજજ્ઞિવાન્ ।
શ્વેતકેતુસ્તાવતાસ્ય જીવત્વં ન નિવર્તતે ॥ ૩.૭૨॥

સ્વસ્ય બ્રહ્મત્વબોધેન જીવત્વમપગચ્છતિ ।
ઇત્યભિપ્રેત્ય તં શિષ્યં પુનઃ પ્રોત્સાહયત્યસૌ ॥ ૩.૭૩॥

સ્વપ્નાવસાનં જાનીહિ મમ વ્યાકુર્વતો મુખાત્ ।
સ્વસ્ય સ્વરૂપં સત્તત્વમિતિ સુપ્તૌ સ્ફુટં ખલુ ॥ ૩.૭૪॥

યદા સુષુપ્તિમાપ્નોતિ પુમાનેતં તદા જનાઃ ।
સ્વપિતીત્યાહુરેતસ્ય તાત્પર્યં પ્રવિચિન્ત્યતામ્ ॥ ૩.૭૫॥

તિઙન્તં પદમજ્ઞાનાં સુબન્તં તુ વિવેકિનામ્ ।
સ્યાન્નિદ્રાણસ્ય નામૈતદ્વસ્તુતત્ત્વાવભાસકમ્ ॥ ૩.૭૬॥

સ્વપ્નજાગરયોર્જીવઃ સત્તત્ત્વાદ્ભિન્નવદ્ભવેત્ ।
સુષુપ્તૌ સમ્યગેકત્વં યાતિ સદ્વસ્તુના સહ ॥ ૩.૭૭॥

જીવત્વમાત્મનઃ પ્રાણધારણાન્ન સ્વભાવતઃ ।
સદ્રૂપત્વં સ્વતસ્તત્તુ સ્ફુટં સ્વપિતિનામતઃ ॥ ૩.૭૮॥

સ્વમપીતીતિ નામ્નોઽસ્ય નિરુક્તિરવગમ્યતામ્ ।
સ્વરૂપં વાસ્તવં સુપ્તૌ પ્રાપ્યમિત્યુદિતં ભવેત્ ॥ ૩.૭૯॥

ઉપાધેર્મનસો જાગ્રત્સુપ્ત્યવસ્થે હિ નાત્મનઃ ।
ઇત્યભિપ્રેત્ય શકુનિદૃષ્ટાન્તઃ પ્રોચ્યતે ધિયઃ ॥ ૩.૮૦॥

શકુનિઃ સૂત્રબદ્ધો યઃ સ ગચ્છન્વિવિધા દિશઃ ।
અલબ્ધ્વાધારમાકાશે બન્ધનસ્થાનમાવ્રજેત્ ॥ ૩.૮૧॥

સત્તત્વે માયયા બદ્ધં મનો જાગરણં વ્રજેત્ ।
અલબ્ધ્વા તત્ર વિશ્રાન્તિં સત્તત્વે લીયતે પુનઃ ॥ ૩.૮૨॥

આત્મચ્છાયાઽપિ મનસા સદાઽઽગચ્છતિ ગચ્છતિ ।
ગત્યાગતી તુ સંસારઃ સ ચ સ્વાત્મનિ કલ્પિતઃ ॥ ૩.૮૩॥

મનોલયેઽનુપાધિઃ સન્નાત્મા સંસારવર્જિતઃ ।
સ્વેન વાસ્તવરૂપેણ સુષુપ્તાવવતિષ્ઠતે ॥ ૩.૮૪॥

ચિચ્છાયા ચ વપુઃ સ્થૂલમિન્દ્રિયાણ્યાત્મબોધને ।
દ્વારાણીત્યાહ મન્ત્રોઽયં રૂપંરૂપમિતિ સ્ફુટમ્ ॥ ૩.૮૫॥

દેહે દેહે પ્રતિચ્છાયારૂપોઽભૂત્સ્વાત્મબુદ્ધયે ।
માયાભિરિન્દ્રો બહુધા દેહોઽભૂત્સ્વાત્મબુદ્ધયે ॥ ૩.૮૬॥

ઇન્દ્રિયાશ્વાસ્તેન યુક્તાસ્તચ્ચ સ્વાત્માવબુદ્ધયે ।
છાયામાશ્રિત્ય તત્રાત્મા બોધિતઃ સુપ્તિવર્ણનાત્ ॥ ૩.૮૭॥

અશનાયાપિપાસોક્ત્યા દેહમાશ્રિત્ય બોધ્યતે ।
અશનાયાપિપાસાખ્યાદ્વયં સ્વપિતિનામવત્ ॥ ૩.૮૮॥

અશનાયા જનૈઃ પ્રોક્તા ક્ષુધાવસ્તુવિવેકિભિઃ ।
નયત્યશિતમિત્યેવમપ્સુ નિર્વચનં ભવેત્ ॥ ૩.૮૯॥

પીતા આપોઽશનં ભુક્તં દ્રવીકૃત્ય નયન્ત્યતઃ ।
અશનાયેતિ શબ્દોક્તા વિણ્માંસોત્પત્તિરન્નતઃ ॥ ૩.૯૦॥

વિણ્માંસહેતુરન્નં યદેતસ્યોત્પાદકં જલમ્ ।
જલસ્યોત્પાદકં તેજસ્તસ્ય ચોત્પાદકં ચ સત્ ॥ ૩.૯૧॥

અનુમાયાત્ર કાર્યેણ જ્ઞેયં તત્કારણં પરમ્ ।
સન્મૂલકારણં જ્ઞેયં સ્યાદ્વિશ્વાસોઽનુમાનતઃ ॥ ૩.૯૨॥

પુરીષાદ્યન્નકાર્યં સ્યાત્સત્યેવાન્નસ્ય સત્ત્વતઃ ।
સત્યામેવ યથા કુમ્ભો મૃદિ દૃષ્ટો ન ચાન્યથા ॥ ૩.૯૩॥

વ્રીહ્યાદ્યન્નં સતીષ્વેવ દૃષ્ટમપ્સુ ન ચાન્યથા ।
આપશ્ચ સ્વેદરૂપા સ્યુઃ સત્યેવોષ્ણે હિ તેજસિ ॥ ૩.૧૪॥

તેજશ્ચ ભાવરૂપત્વાત્સમ્ભવેન્ન સતા વિના ।
સતસ્તૂત્પત્તિરાહિત્યાન્નાન્વેષ્યં કારણાન્તરમ્ ॥ ૩.૯૫॥

સમ્મૂલાઃ સકલા દેહા ઇદાનીં ચ સતિ સ્થિતાઃ ।
અન્તે સત્યેવ લીયન્તે વિદ્યાત્સત્તત્ત્વમદ્વયમ્ ॥ ૩.૯૬॥

યથા ભૂતાતિરેકેણ ભૌતિકં નૈવ વિદ્યતે ।
ભૂતાનિ ચ સતોઽન્યાનિ તથા નેત્યુપપાદિતમ્ ॥ ૩.૯૭॥

અશનાયામુખેનેત્થં સત્તત્ત્વે ધીઃ પ્રવેશિતા ।
પિપાસામુખતોઽપ્યસ્મિન્સતિ ધીરવતાર્યતે ॥ ૩.૯૮॥

ઉદન્યેતિ પિપાસાયા પર્યાયસ્તં વિવેકિનઃ ।
ઉદકં જયતીત્યેવં તેજસ્યેવં પ્રયુઞ્જતે ॥ ૩.૯૯॥

પીતં જલં શરીરસ્થં તેજસા જીર્યતે તતઃ ।
મૂત્રં રક્તં ચ નિષ્પન્નં દ્રવત્વાજ્જલજે ઉભે ॥ ૩.૧૦૦॥

તાભ્યામાપોઽનુમીયતે તાભિસ્તેજસ્તતસ્તુ સત્ ।
વ્યાપ્તિં ગૃહીત્વા સર્વત્ર યોજનાયોદિતં પુનઃ ॥ ૩.૧૦૧॥

દેહે યેઽવયવાઃ સન્તિ પદાર્થાઃ સન્તિ તે બહિઃ ।
તેષુ સર્વેષુ સન્માત્રરૂપત્વમવધાર્યતામ્ ॥ ૩.૧૦૨॥

ભૌતિકત્વં પુરા પ્રોક્તં તદુક્તં દેહબાહ્યયોઃ ।
ઇન્દ્રિયદ્વારતો વોદ્ધું પ્રોચ્યતે મરણક્રમઃ ॥ ૩.૧૦૩॥

મ્રિયમાણસ્ય વાગાદિવૃત્તિર્મનસિ લીયતે ।
મનોવૃત્તેર્લયઃ પ્રાણે પ્રાણવૃત્તેસ્તુ તેજસિ ॥ ૩.૧૦૪॥

શ્વાસસ્યોપરતાવુષ્ણં સ્પૃષ્ટ્વા જીવનનિશ્ચયમ્ ।

કુર્વત્યુષ્ણં તુ તત્તેજઃ સદ્વસ્તુનિ વિલીયતે ॥ ૩.૧૦૫॥

છાયાદેહેન્દ્રિયદ્વારૈઃ પદાર્થો યોઽત્ર બોધિતઃ ।
સ એષ સર્વજગતોઽણિમા વસ્ત્વન્તરં ન તુ ॥ ૩.૧૦૬॥

સ્થૂલત્વાણુત્વરૂપાભ્યાં વસ્ત્વેકં ભાસતે દ્વિધા ।
સ્થૂલમિન્દ્રિયગમ્યત્વાન્નામરૂપાત્મકં જગત્ ॥ ૩.૧૦૭॥

સદદ્વૈતં ભવેત્સૂક્ષ્મમિન્દ્રિયાવિષયત્વતઃ ।
એતદાત્મકતૈવાસ્ય સ્થૂલસ્યેતીહ યુજ્યતે ॥ ૩.૧૦૮॥

અણુત્વં વસ્તુનઃ પ્રોક્તં યત્તત્સત્યમબાધનાત્ ।
સ્થૂલત્વં માયયા કૢપ્તં જ્ઞાનેનૈતસ્ય બાધનાત્ ॥ ૩.૧૦૯॥

અબાધ્યો યઃ સ એવાત્મા સર્વસ્ય ન તુ કલ્પિતઃ ।
શ્વેતકેતો યદદ્વૈતં તદસિ ત્વં ન માનવઃ ॥ ૩.૧૧૦॥

ચિચ્છાયાવાનહઙ્કારોઽધીતે વેદચતુષ્ટયમ્ ।
ત્વં તુ સાક્ષ્યેવ તસ્યાતઃ સદસિ ત્વં ન ચેતરઃ ॥ ૩.૧૧૧॥

ભિન્નોઽભૂદ્ધૃદયગ્રન્થિઃ શ્વેતકેતોર્વિવેકતઃ ।
ધીદોષં સંશયં માર્ષ્ટું ભૂયો બ્રૂહીત્યવોચત ॥ ૩.૧૧૨॥

સતા સમ્પદ્યતે જીવઃ સુષુપ્તાવિત્યુદીરિતમ્ ।
તથા ચેત્સતિ સમ્પન્નોઽહમિત્યસ્ય કુતો ન ધીઃ ॥ ૩.૧૧૩॥

નાનાવૃક્ષ રસૈક્યેન સમ્પન્ને મધુનિ સ્થિતઃ ।
ન બુધ્યતે રસોઽસ્યેતિ તથા સર્વલયાન્ન ધીઃ ॥ ૩.૧૧૪॥

જીવોપાધિલયેઽપ્યત્ર તદ્બીજસ્યાવશેષતઃ ।
તદુપાધિક એવાસ્મિન્દેહેઽન્યેદ્યુઃ પ્રબુધ્યતે ॥ ૩.૧૧૫॥

ચિત્તૈકાગ્ર્યાય તચ્છઙ્કા પરિહાર્યા તુ વસ્તુષુ ।
પૂર્વોક્તમેવ તદ્બોદ્ધું તદેવાહ પુનર્ગુરુઃ ॥ ૩.૧૧૬॥

પ્રાજ્ઞમ્મન્યતયા તત્ત્વમવિશ્વસ્ય સ્વશઙ્કયા ।
પુનઃ પુનરપૃચ્છત્તં પ્રત્યાહાસૌ પુનઃ પુનઃ ॥ ૩.૧૧૭॥

સુષુપ્તૌ બુદ્ધ્યભાવેઽપિ પુનર્જાગરણેઽસ્તિ ધીઃ ।
આગચ્છં સત ઇત્યેત્વં તદા કસ્માન્ન વેત્યસૌ ॥ ૩.૧૧૮॥

સુપ્તૌ સદ્રૂપમજ્ઞાત્વા સદૈક્યં પ્રાપ્તવાંસ્તતઃ ।
સતો નાગમનં સ્માર્યમપામસ્મરણં યથા ॥ ૩.૧૧૯॥

ગઙ્ગાજલં પ્રવિશ્યાબ્ધૌ મેઘેનાકૃષ્ય સિચ્યતે ।
નાજ્ઞાતત્વાત્સ્મૃતિસ્તત્ર તદ્વદત્ર સ્મૃતિર્ન હિ ॥ ૩.૧૨૦॥

વ્યાઘ્રાદિઃ સુપ્ત એવાત્ર બુધ્યતે વાસનાવશાત્ ।
ન નષ્ટા વાસનેત્યેવં વિવક્ષિત્વોચ્યતે પુનઃ ॥ ૩.૧૨૧॥

જીવસ્ય નશ્વરસ્યૈક્યં ન નિત્યેન સતેતિ ચેત્ ।
જીવો ન નશ્યતિ ક્વાપીત્યેવં વૃક્ષવદીક્ષ્યતામ્ ॥ ૩.૧૨૨॥

શાખાં વૃક્ષે જીવપૂર્ણે જીવસ્ત્યજતિ યામસૌ ।
શુષ્યેન્નાન્યા તથા જીવેઽપગતે મ્રિયતે વપુઃ ॥ ૩.૧૨૩॥

નામરૂપયુતં સ્થૂલં તદ્ધીનાત્સદણોઃ કથમ્ ।
ઉત્પન્નમિતિ ચેદ્બીજાદ્વટવૃક્ષવદીક્ષ્યતામ્ ॥ ૩.૧૨૪॥

ન્યાયાગમાભ્યાં સિદ્ધં ચ શ્રદ્ધાહીનઃ પરાઙ્મુખઃ ।
ન બુધ્યતે શ્વેતકેતો શ્રદ્ધસ્વાન્તર્મુખો ભવ ॥ ૩.૧૨૫॥

સત્સર્વત્ર સ્થિતં કસ્માન્ન સર્વે વિદુરીદૃશમ્ ।
મુમુક્ષુસ્તુ કથં વેત્તીત્યત્ર દૃષ્ટાન્ત ઉચ્યતે ॥ ૩.૧૨૬॥

લવણસ્ય ઘનં નીરે વિલીનં વેત્તિ ન ત્વચા ।
જિહ્વયા વેત્તિ તદ્વત્સદુપાયેનૈવ બુધ્યતે ॥ ૩.૧૨૭॥

સતિ સર્વેન્દ્રિયાગમ્યે ક ઉપાયઃ સ ઉચ્યતે ।
ઉપાય ઉપદેશોઽત્ર ભવેદ્ગન્ધારમાર્ગવત્ ॥ ૩.૧૨૮॥

ગન્ધારાદ્યો વને નીતસ્તસ્કરૈર્બદ્ધનેત્રકઃ ।
તસ્ય બન્ધં વિમુચ્યાત્ર કૃપાલુર્માર્ગમાદિશત્ ॥ ૩.૧૨૯॥

તેનાદિષ્ટમવિસ્મૃત્ય ધીમાન્ગન્ધારમાપ્તવાન્ ।
અવિદ્યયાવૃતં તત્ત્વં વેત્ત્યેવમુપદેશતઃ ॥ ૩.૧૩૦॥

અશ્લેષનાશૌ વિદુષઃ સઞ્ચિતાગામિકર્મણોઃ ।
પ્રારબ્ધે ભોગસઙ્ક્ષીણે મુચ્યતે ન તુ જાયતે ॥ ૩.૧૩૧॥

કીદૃશી મૃતિરસ્યેતિ ચેદ્રાગાદિલયાદ્યથા ।
મૂઢસ્ય તદ્વદેવાસ્ય વૈલક્ષણ્યં ન કિઞ્ચન ॥ ૩.૧૩૨॥

સમાનાયાં મૃતાવેકો મુક્તો નાન્યઃ કુતો વદ ।
સત્યાનૃતાભિસન્ધત્વં વૈષમ્યં જ્ઞાનિમૂઢયોઃ ॥ ૩.૧૩૩॥

તસ્કરાતસ્કરૌ ચૌર્યશઙ્કયા તલરક્ષકૈઃ ।
ગૃહીતૌ ન કૃતં ચૌર્યમિત્યાહતુરુભાવપિ ॥ ૩.૧૩૪॥

ગૃહ્ણીતઃ પરશું તપ્તં તૌ તયોસ્તસ્કરોઽનૃતમ્ ।
અભિસન્ધાય દગ્ધઃ સન્ હન્યતે તલરક્ષકૈઃ ॥ ૩.૧૩૫॥

અતસ્કરઃ સત્યસન્ધો ન દગ્ધો મુચ્યતે ચ તૈઃ ।
અજ્ઞાન્યનૃતસન્ધોઽત્ર સત્યસન્ધસ્તુ તત્ત્વવિત્ ॥ ૩.૧૩૬॥

મર્ત્યોઽહમિતિ સન્ધાય મ્રિયતે જાયતે ચ સઃ ।
બ્રહ્માહમિતિ સન્ધાય મુચ્યતે ન ચ જાયતે ॥ ૩.૧૩૭॥

બુદ્ધિદોષં સમાધાતું દૃષ્ટાન્તાસ્તૈસ્તવાત્ર કિમ્ ।
ત્વં સદેવેત્યભિપ્રેત્ય નવકૃત્વ ઉપાદિશત્ ॥ ૩.૧૩૮॥

ભિન્નગ્રન્થિઃ શ્વેતકેતુર્મનનાચ્છિન્નસંશયઃ ।
સદદ્વૈતં સ્વમાત્માનં વિશેષેણાવબુદ્ધવાન્ ॥ ૩.૧૩૯॥

શ્વેતકેતોર્બ્રહ્મવિદ્યા વ્યાખ્યાતા સ્ફુટમેતયા ।
તુષ્ટોઽસ્માનનુગૃહ્ણાતુ વિદ્યાતીર્થમહેશ્વરઃ ॥ ૩.૧૪૦॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
છાન્દોગ્યોપનિષદિ શ્વેતકેતુવિદ્યાપ્રકાશો નામ તૃતીયોઽધ્યાયઃ ॥ ૩॥

## ૪. છાન્દોગ્યે સનત્કુમારવિદ્યાપ્રકાશો નામ ચતુર્થોઽધ્યાયઃ ।

સનત્કુમારશ્છાન્દોગ્યે નારદાયોપદિષ્ટવાન્ ।
વિદ્યામેતાં પ્રવક્ષ્યેઽત્ર સર્વશોકનિવૃત્તયે ॥ ૪.૧॥

પુરાણપઞ્ચમાન્વેદાન્ શાસ્ત્રાણિ વિવિધાનિ ચ ।
જ્ઞાત્વાપ્યનાત્મવિત્ત્વેન નારદઃ શોકમાપ્તવાન્ ॥ ૪.૨॥

વેદાભ્યાસાત્પુરા તાપત્રયમાત્રેણ શોકિતા ।
પશ્ચાત્ત્વભ્યાસવિસ્મારભઙ્ગગર્વૈશ્ચ શોકિતા ॥ ૪.૩॥

શોકં તરત્યાત્મવેદીત્યભિજ્ઞેભ્યઃ શ્રુતં વચઃ ।

શોકપારં નયેત્યુક્ત્વા નારદો ગુરુમાપ્તવાન્ ॥ ૪.૪॥

બહુગ્રન્થાભ્યાસતસ્તે મહતી શબ્દવાસના ।
નામ બ્રહ્મેત્યુપાસ્વાત ઇતિ પ્રોવાચ તં ગુરુઃ ॥ ૪.૫॥

સ્વશબ્દવાસનાં ત્યક્ત્વા પ્રાપ્સ્યસિ બ્રહ્મવાસનામ્ ।
પશ્ચાદ્બ્રહ્મણ આત્મત્વં વક્ષ્યામીતિ ગુરોર્મતિઃ ॥ ૪.૬॥

બ્રહ્મ દૃષ્ટ્યા (દૃષ્ટ્વા) નામમાત્રધ્યાનાન્નાઽપૈતિ શોકિતા ।
ઇત્યભિપ્રેત્ય નામ્નોઽસ્માદધિકં પૃષ્ટવાનસૌ ॥ ૪.૭॥

વાઙ્ગામ્નઃ કારણત્વેનાધિકેતિ બ્રહ્મદર્શનમ્ ।
વાચિ પ્રાહ ગુરુઃ શિષ્યઃ પૂર્વવત્પૃષ્ટવાન્પુનઃ ॥ ૪.૮॥

આપ્રાણમિત આરભ્ય પૂર્વસ્માદુત્તરાધિકે ।
પ્રવર્તતે શિષ્યગુર્વોઃ પ્રશ્નોત્તરપરમ્પરા ॥ ૪.૯॥

ઇચ્છાત્મકં મનો વાચોઽધિકં તત્કારણત્વતઃ ।
સત્યામેવ વિવક્ષાયાં વક્તુમારભતે પુમાન્ ॥ ૪.૧૦॥

સઙ્કલ્પ્યેદં સમ્યગિતિ તદિચ્છતિ પુમાંસ્તતઃ ।
સઙ્કલ્પો હેતુરિચ્છાયાશ્ચિત્તં સઙ્કલ્પકારણમ્ ॥ ૪.૧૧॥

વિક્ષિપ્તચિત્તાદૈકાગ્ર્યં ધ્યાનમભ્યધિકં તતઃ ।
ધ્યેયવિજ્ઞાનમધિકં જ્ઞાનાદભ્યધિકં બલમ્ ॥ ૪.૧૨॥

જ્ઞાનહેતુર્દેહબલં બલં સ્યાદન્નકારણમ્ ।
આપોઽન્નહેતવોઽપાં તુ તેજઃ કારણમીરિતમ્ ॥ ૪.૧૩॥

હેતુઃ સવાયુરાકાશસ્તેજસો વિયતઃ પુનઃ ।
સ્રષ્ટવ્યસ્મૃતિરીશસ્ય સૃષ્ટ્યાશા સ્મૃતિકારણમ્ ॥ ૪.૧૪॥

નામાદ્યાશાન્તતત્ત્વેષુ બ્રહ્મદૃષ્ટિં કરોતિ યઃ ।
સ પુમાન્ લભતે સર્વં તત્ર તત્રોચિતં ફલમ્ ॥ ૪.૧૫॥

પ્રતીકોપાસનૈરેતૈર્બહ્વાયાસૈઃ પ્રશોચતિ ।
ન શોકં તરતીત્યુક્ત્વા હ્યપૃચ્છત્સોઽધિકં પુનઃ ॥ ૪.૧૬॥

પરાક્ પદાર્થધ્યાનેષુ ફલેષુ ચ વિરક્તિતઃ ।
દૃઢાં પ્રત્યગ્વિવિદિષાં દૃષ્ટ્વા પ્રાણમુપાદિશત્ ॥ ૪.૧૭॥

ન મુખ્યં પ્રત્યગાત્મત્વં યદ્યપિ પ્રાણવસ્તુનઃ ।
તથાઽપ્યાત્મપ્રતિનિધિઃ સમ્ભવેદાત્મલક્ષકઃ ॥ ૪.૧૮॥

કસ્મિન્નુત્ક્રાન્તૌત્ક્રાન્તો ભવિષ્યામિ સ્થિતે સ્થિતઃ ।
ઇતિ વીક્ષ્યાસૃજત્પ્રાણં પરમાત્મેતિ હિ શ્રુતિઃ ॥ ૪.૧૯॥

ચક્રસ્યારા યથા નાભાવાશ્રિતાશ્ચક્ષુરાદિકમ્ ।
આશ્રિતં નિખિલં પ્રાણે તતસ્તસ્યાત્મતા ભવેત્ ॥ ૪.૨૦॥

અશ્વેન યાતિ પુરુષો દત્તે વિપ્રાય ગાં પુમાન્ ।
પ્રાણ એવાશ્વાદિશબ્દૈરુક્તો ન તુ શવઃ કશ્ચિત્ ॥ ૪.૨૧॥

પિતૃમાત્રાદિશબ્દૈશ્ચ પ્રાણઃ પ્રોક્તઃ શવો ન તુ ।
તસ્માત્સર્વાત્મકઃ પ્રાણઃ પરમાત્મેતિ નિશ્ચયઃ ॥ ૪.૨૨॥

યો બુભુત્સુરસૌ પ્રાણમેવં પશ્યન્ ગુરૂક્તિતઃ ।
યુક્તયા ધિયા ચ વૈચિન્વન્નતિવાદીતિ કથ્યતે ॥ ૪.૨૩॥

નામાદ્યાશાન્તતત્ત્વાનિ યઃ પ્રાણોઽતીત્ય વર્તતે ।
તમાત્માનં વક્તિ યસ્માદતિવાદી ભવેત્તતઃ ॥ ૪.૨૪॥

તર્કાદ્વિપ્લાવકેભ્યોઽયં નિર્ભીઃ સન્ સ્વાતિવાદિતામ્ ।
અઙ્ગીકુર્યાદેવ યસ્માત્સન્દેહો નાત્ર વિદ્યતે ॥ ૪.૨૫॥

નામાદીનામનાત્મત્વં સ્પષ્ટમિત્યત્ર નારદઃ ।
અસન્તુષ્ટોઽધિકં તત્ત્વં પપ્રચ્છેવ પુનઃપુનઃ ॥ ૪.૨૬॥

પ્રાણાત્મત્વં તુ સમ્ભાવ્યં સમ્યક્તસ્યોપપાદનાત્ ।
શોકશ્ચ સુપ્તૌ પ્રાણસ્ય ન દૃષ્ટોઽતસ્તુતોષ સઃ ॥ ૪.૨૭॥

શ્રદ્ધાલું યોગ્યશિષ્યં તમુદ્ધરામીત્યસૌ ગુરુઃ ।
અપૃષ્ટોઽપ્યધિકં તત્ત્વં સ્વયમેવોપદિષ્ટવાન્ ॥ ૪.૨૮॥

આત્મોપલક્ષકઃ પ્રાણો ન ત્વાત્મૈષોઽનૃતત્વતઃ ।
નામરૂપાત્મકઃ પ્રાણો માયયોત્પાદિતો હ્યસૌ ॥ ૪.૨૯॥

અનૃતોઽપ્યેષ સત્યસ્ય લક્ષકઃ પ્રતિબિમ્બવત્ ।
મુખ્યસ્ય પ્રતિબિમ્બેન મુખં સ્વસ્યોપલક્ષ્યતે ॥ ૪.૩૦॥

આત્મેદમ્બુદ્ધિગમ્યૈસ્તૈરાશાન્તૈર્નોપલક્ષ્યતે ।
પ્રાણોઽહમ્બુદ્ધિગમ્યેષુ સ્થિતત્વાદાત્મલક્ષકઃ ॥ ૪.૩૧॥

અતએવાતિવાદિત્વમસ્તિ પ્રાણાત્મવેદનાત્ ।
અમુખ્યં તચ્ચ મુખ્યં તુ ભવેત્સત્યાત્મવેદનાત્ ॥ ૪.૩૨ ॥

કારુણ્યાતિશયં દૃષ્ટ્વા સન્તુષ્ટો નારદોઽબ્રવીત્ ।
સત્યેનૈવાતિવાદી સ્યામનૃતસ્યાત્મતાં ત્યજન્ ॥ ૪.૩૩ ॥

વિચારણીયં તત્સત્યં વિજ્ઞાનમનનાદિભિઃ ।
ધ્યાનવાન્નોક્તિમાત્રેણ બુધ્યેતેત્યબ્રવીદ્ગુરુઃ ॥ ૪.૩૪ ॥

સંશયં ચ વિપર્યાસં નિરાકૃત્ય વિશેષતઃ ।
યદા જાનાતિ વિજ્ઞાનાત્સત્યવાદી ભવેત્તદા ॥ ૪.૩૫ ॥

વિજ્ઞાનહેતુર્મનનમન્વયવ્યતિરેકભાક્ ।
શ્રદ્ધા મનનહેતુઃ સ્યાદાગમાચાર્યવાક્યયોઃ ॥ ૪.૩૬ ॥

શ્રદ્ધાયાઃ કારણં નિષ્ઠા સદા શુશ્રૂષણં હિ સા ।
ચિત્તૈકાગ્ર્યગતિર્યાઽસૌ (કૃતિર્યાઽસૌ) નિષ્ઠાયાઃ કારણં ભવેત્ ॥ ૪.૩૭ ॥

સુખમસ્તીતિ ધીર્મુક્તૌ કૃતિસ્તસ્યાઃ (કૃતેસ્તસ્યાઃ) પ્રયોજિકા ।
તદ્વિહીનોઽયમાદ્યૈર્નો ચિત્તૈકાગ્ર્યં કરોતિ હિ ॥ ૪.૩૮ ॥

સુખં કિમિતિ ચેદ્ભૂમા સુખમલ્પે તુ તન્ન હિ ।
ક્લિશ્યત્યલ્પધનોઽન્યસ્મિન્ધનબાહુલ્યદર્શનાત્ ॥ ૪.૩૯ ॥

ભૂમ્નઃ સુખત્વે ભૂમા કઃ કિમલ્પમિતિ ચેચ્છૃણુ ।
જ્ઞાતૃજ્ઞેયજ્ઞાનહીનો ભૂમાઽવિચ્છેદદર્શનાત્ ॥ ૪.૪૦ ॥

જ્ઞાતૃજ્ઞાનાજ્ઞેયરૂપં માયાકાર્યમિદં જગત્ ।
બહુવિચ્છેદયુક્તત્વાદલ્પમિત્યભિધીયતે ॥ ૪.૪૧ ॥

અચ્છેદ્યોઽયમદાહ્યોઽયમક્લેદ્યોઽશોષ્ય એવ ચ ।
ભૂમા તસ્માદમર્ત્યોઽયમલ્પં મર્ત્યમતદ્વિધમ્ ॥ ૪.૪૨ ॥

સંસારકાલ એવાસ્તિ ન મુક્તાવલ્પતા તતઃ ।
મુક્તૌ જ્ઞાનનિવર્ત્યત્વાન્મર્ત્યં જગદિતીર્યતે ॥ ૪.૪૩ ॥

સંસારમોક્ષયોર્ભૂમા વિદ્યતે સોઽમૃતત્વતઃ (સોઽમૃતસ્તતઃ)।
અખણ્ડૈકરસાનન્દઃ સોઽયમાત્મા સ્વયમ્પ્રભઃ ॥ ૪.૪૪ ॥

મૂર્ચ્છાસુપ્ત્યોસ્તાદૃશોઽયમજ્ઞાનેન તિરોહિતઃ ।

સમાધિસુપ્તિમૂર્ચ્છાસુ ભાસતે સાધનં વિના ॥ ૪.૪૫॥

મેઘેનાચ્છાદિતઃ સૂર્યો યથા તદ્વત્સ્વયમ્પ્રભઃ ।
અજ્ઞાનેનાવૃતો ભૂમા પ્રાણિભિર્ન વિભાવ્યતે ॥ ૪.૪૬॥

સ્વપ્રકાશાત્મચૈતન્યમજ્ઞાનસ્ય ન બાધકમ્ ।
ભાસકં પ્રત્યુતૈતસ્ય સ્વાનન્દસ્ય યથા તથા ॥ ૪.૪૭॥

આનન્દાઽજ્ઞાનયોઃ સુપ્તૌ ચૈતન્યેનાવભાસનાત્ ।
ઉત્થિતઃ સુખમસ્વાપ્સં ન જાનેઽન્યદિતિ સ્મરેત્ ॥ ૪.૪૮॥

અરણિસ્થો યથા વહ્નિર્ન દહેદરણિં તથા ।
પશ્ચાન્મથન જાતોઽસૌ સાકલ્યેનારણિં દહેત્ ॥ ૪.૪૯॥

તથા વેદાન્તવાક્યોત્થધીવૃત્તૌ પ્રતિબિમ્બિતમ્ ।
સ્વપ્રકાશાત્મચૈતન્યં કૃત્સ્નાજ્ઞાનસ્ય બાધકમ્ ॥ ૪.૫૦॥

તસ્માદ્વિજ્ઞાનસહિતઃ સમાધાવનુભૂય હિ ।
ભૂમાનન્દં યથાશાસ્ત્રં સ્મૃત્વા વ્યુત્થાય વક્તિ ચ ॥ ૪.૫૧॥

જ્ઞાતૃજ્ઞાનજ્ઞેયરૂપા ત્રિપુટી સ્વપ્નજાગ્રતોઃ ।
ભૂમાનન્દં તિરોધત્તે વિદ્વાંસ્ત્વભિભવત્યમુમ્ ॥ ૪.૫૨॥

ચિચ્છાયાવાનહઙ્કારો જ્ઞાતા સ્યાચ્ચક્ષુરાદિજા ।
બુદ્ધિવૃત્તિર્ભવેજ્જ્ઞાનં જ્ઞેયા રૂપરસાદયઃ ॥ ૪.૫૩॥

ત્રિપુટી માયિકી મિથ્યેત્યેવં વિજ્ઞાય તત્ત્વવિત્ ।
તામુપેક્ષ્ય કરોત્યેવ ભૂમાનન્દે ભરં સદા ॥ ૪.૫૪॥

અખણ્ડૈકરસં ભૂમાનન્દં શ્રુત્વા સ નારદઃ ।
ભૂમ્ન્યસમ્ભાવનાં મત્વા પપ્રચ્છાધારમસ્ય હિ ॥ ૪.૫૫॥

સત્યાધારે પરિચ્છેદો નિરાધારો ન બુધ્યતે ।
યદ્યદ્ઘટાદિકં લોકે તત્સર્વં ક્વચિદાશ્રિતમ્ ॥ ૪.૫૬॥

વ્યવહારદશાયાં કિમાધારઃ પૃચ્છ્યતેઽથવા ।
વસ્તુતો વ્યવહારે તુ મહિમ્ન્યેવાયમાશ્રિતઃ ॥ ૪.૫૭॥

પરાસ્ય શક્તિર્વિવિધેત્યેવં શ્રુત્યન્તરેરિતા ।
ભૂમ્નઃ શક્તિર્ભવેન્માયા તદર્થો મહિમાઽખિલઃ ॥ ૪.૫૮॥

મહિમાખ્યે જગત્યસ્મિન્ચ આનન્દોઽવભાસતે ।
સ ભૂમાસ્ય પરિચ્છેદો વ્યવહારે ન દુષ્યતિ ॥ ૪.૫૯॥

વસ્તુતત્ત્વવિચારે તુ ન મહિમ્નિ પ્રતિષ્ઠિતઃ ।
મહિમા સ્યાદ્ગવાશ્વાદિર્ભૂમ્નો નાધાર એવ હિ ॥ ૪.૬૦॥

અન્યસ્મિન્હિ મહિમ્ન્યન્યો રાજાદિઃ પ્રતિતિષ્ઠતિ ।
ભૂમ્નો નાન્યદ્વસ્તુ તસ્માત્કુત્રાઽસૌ પ્રતિતિષ્ઠતિ ॥ ૪.૬૧॥

યથા લોકે નિરાધાર આકાશોઽસ્તિ તથા કુતઃ ।
ભૂમા ન સ્યાદતો યુક્ત્યા નિરાધારોઽપિ બુધ્યતામ્ ॥ ૪.૬૨॥

વ્યાવહારિક આનન્દે વ્યુત્પત્તેઃ શૂન્યતા ન હિ ।
વ્યુત્પન્નો યૌક્તિકશ્ચૈષ ઐકાગ્ર્યે ભાસતેં સ્વયમ્ ॥ ૪.૬૩॥

બોધક્રમો બુભુત્સૂનાં વિસ્પષ્ટમભિધીયતે ।
ચતુર્દિક્ષ્વધ ઊર્ધ્વં ચ ભૂમા બોદ્ધવ્ય આદિતઃ ॥ ૪.૬૪॥

સત્તાભાનપ્રીતયોઽત્ર વીક્ષ્યન્તે સર્વવસ્તુષુ ।
સચ્ચિદાનન્દરૂપોઽતો ભૂમા સર્વત્ર તિષ્ઠતિ ॥ ૪.૬૫॥

ભૂમ્નો વિયોગે વસ્તૂનિ નૈવ સન્તિ ન ભાન્તિ ચ ।
પ્રિયત્વં દૂરતસ્તેષાં ભૂમા સર્વાત્મકસ્તતઃ ॥ ૪.૬૬॥

જગદ્ભ્રાન્તિં નિવાર્યાસ્ય તાટસ્થ્યવિનિવૃત્તયે ।
અહઙ્કારેણ ભૂમાનુસન્ધેયઃ સર્વદિક્ષ્વસૌ ॥ ૪.૬૭॥

સન્ત્યેવ સચ્ચિદાનન્દા દેહાદિષ્વપિ બાહ્યવત્ ।
ભૂમાહઙ્કારયોગ્યોઽતોઽહં સર્વમિતિ વા શ્રયેત્ ॥ ૪.૬૮॥

ગૃહૈકદેશેઽવસ્થાય સાર્વભૌમોઽહમિત્યસૌ ।
રાજાભિમન્યતે તદ્વદ્ભૂમાહમિતિ નો કુતઃ ॥ ૪.૬૯॥

આભિમાનિકમેવેદં ભૂમાત્મત્વમિતિ ભ્રમમ્ ।
નિરાકર્તું સર્વદિક્ષુ ભૂમ્નો જ્ઞેયા ચિદાત્મતા ॥ ૪.૭૦॥

અહંશબ્દશ્ચિદાત્માનં સાહઙ્કારં બ્રવીતિહિ ।
અહઙ્કારે બોધલીને ચિદાત્મૈવાવશિષ્યતે ॥ ૪.૭૧॥

ક્રમેણાનેન યસ્તસ્વં પશ્યન્ શાસ્ત્રવિચારતઃ ।
યુક્ત્યા મત્વા ધિયા વેત્તિ જીવન્મુક્તો ભવેદસૌ ॥ ૪.૭૨॥

જીવન્મુક્તો રતિક્રીડામિથુનાનન્દલક્ષણાન્ ।
વ્યવહારાન્ ક્રમેણૈતિ પ્રારબ્ધસ્યાનુસારતઃ ॥ ૪.૭૩ ॥

સુખદુઃખપ્રદારબ્ધકર્મવેગશ્ચતુર્વિધઃ ।
તીવ્રો મધ્યો મન્દસુપ્તૌ ચેતિ તસ્ય વિધા મતાઃ ॥ ૪.૭૪ ॥

તીવ્રવેગે સ પશ્વાદિતુલ્યો નાત્માનમીક્ષતે ।
આત્મનિ પ્રીતિરસ્તીતિ ભવેદાત્મરતિસ્તદા ॥ ૪.૭૫ ॥

મધ્યવેગે તુ ભોગાનાં પ્રાધાન્યં સ યદા તદા ।
કૃત્વાવકાશમાત્માનં વદન્ ક્રીડતિ બાલવત્ ॥ ૪.૭૬ ॥

મન્દવેગે તિરસ્કૃત્ય ભોગાન્ પ્રાયેણ ચિન્તયન્ ।
ધિયાત્માનં દ્વન્દ્વસુખં પ્રાપ્નોતિ મિથુને યથા ॥ ૪.૭૭ ॥

સુપ્તવેગેઽતિનિર્વિઘ્નો નિર્વિકલ્પસમાધિભાક્ ।
આત્માનન્દાવશેષઃ સન્નાસ્તે મુક્તવદદ્વયઃ ॥ ૪.૭૮ ॥

સ્વરાટ્ સ્યાત્પતિતે દેહે નાન્યાધીનો વિમૂઢવત્ ।
તસ્ય સર્વેષુ લોકેષુ કામચારો ભવેત્ખલુ ॥ ૪.૭૯ ॥

માયયા કલ્પિતા લોકાસ્તે સર્વે ભૂમરૂપતામ્ ।
મુક્તસ્ય પ્રાપ્નુવન્ત્યેવં સર્વલોકાત્મકસ્તતઃ ॥ ૪.૮૦ ॥

કામચારોઽતિવિશ્રમ્ભઃ (અતિવિસ્રમ્ભઃ) પ્રતિબન્ધવિવર્જિતઃ ।
સર્વસ્ય સ્વસ્વરૂપેઽસ્તિ પ્રતિબન્ધો કોઽપિ હિ ॥ ૪.૮૧ ॥

ભૂમાત્માનં ન જાનાતિ મૂઢઃ કિં ત્વન્યથેક્ષતે ।
જીવોઽહમીશ્વરાધીનો ધર્માધર્મયુતસ્ત્વિતિ ॥ ૪.૮૨ ॥

તસ્યેશ્વરો ભવેદ્રાજા લોકઃ કર્મજિતઃ ક્ષયી ।
કામચારસ્તુ લોકેષુ સર્વથાસ્ય ન સમ્ભવેત્ ॥ ૪.૮૩ ॥

જીવન્મુક્તસ્તત્ત્વવિદ્ધઃ શાસ્ત્રયુક્ત્યનુભૂતિભિઃ ।
તસ્ય પ્રાણાદિનામાન્તં જગત્સ્વાત્મન ઉદ્ગતમ્ ॥ ૪.૮૪ ॥

તસ્માત્પ્રાણાદિવસ્તૂનાં ધ્યાનેનાસ્ય ફલેન વા ।
જીવન્મુક્તસ્ય નાર્થોઽસ્તિ કૃતકૃત્યઃ સુખી હ્યસૌ ॥ ૪.૮૫ ॥

ન મૃત્યું પશ્યતિ જ્ઞાની ન રોગં નાપિ દુઃખિતામ્ ।

સર્વસ્વાત્મતયા બુદ્ધ્વા સર્વમાપ્રોતિ સર્વથા ॥ ૪.૮૬॥

વિદેહમુક્તો બ્રહ્મત્વાત્સર્વં સૃજતિ માયયા ।
યેન યદ્વીક્ષ્યતે તસ્મૈ તદ્રૂપં સ્વં પ્રદર્શયેત્ ॥ ૪.૮૭॥

વિષયાહરણં શુદ્ધં રાગદ્વેષાદિવર્જનાત્ ।
તતઃ શુદ્ધધિયાત્માનં ભૂમાનં સર્વદા સ્મરેત્ ॥ ૪.૮૮॥

શોકાદિસર્વગ્રન્થીનાં ભૂમ્નઃ સ્મૃત્યા વિમોક્ષણાત્ ।
શુદ્ધધીર્નારદસ્તસ્મૈ તમઃપારમદર્શયત્ ॥ ૪.૮૯॥

સનત્કુમારવિદ્યાયાસ્તાત્પર્યં સ્પષ્ટમીરિતમ્ ।
તેન કુર્યાન્મયિ કૃપાં વિદ્યાતીર્થમહેશ્વરઃ ॥ ૪.૯૦॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
છાન્દોગ્યે સનત્કુમારવિદ્યાપ્રકાશો નામ ચતુર્થોઽધ્યાયઃ ॥ ૪॥

## ૫. છાન્દોગ્યે પ્રજાપતિવિદ્યાપ્રકાશોઽનામ પઞ્ચમોઽધ્યાયઃ ।

પ્રજાપતિઃ સ્વાત્મવિદ્યાં છાન્દોગ્યે બહુધાઽબ્રવીત્ ।
વિરોચનાય ચન્દ્રાય તાં વક્ષ્યે સુખબુદ્ધયે ॥ ૫.૧॥

અસંસાર્યયમાત્માઽસાવન્વેષ્ટવ્યો મુમુક્ષુણા ।
પ્રજાપતિરિતિ પ્રાહ પ્રસઙ્ગેન સ્વસંસદિ ॥ ૫.૨॥

યો નિષ્પાપોઽજરો મૃત્યુશોકક્ષુત્તૃડ્વિવર્જિતઃ ।
સત્યોઽસ્ય કામઃ સઙ્કલ્પશ્ચાસંસારી સ ઈશ્વરઃ ॥ ૫.૩॥

પાપં કર્તુરકર્તાત્મા ચિન્માત્રઃ પાપવાન્ કથમ્ ।
જરામૃત્યૂ દેહધર્મૌ વિદ્યેતે ન ચિતસ્તતઃ ॥ ૫.૪॥

શોકઃ સ્વાન્મનસો ધર્મઃ ક્ષુત્તૃષ્ણે પ્રાણગે ઉભે ।
ચિદ્રૂપસ્યાત્મનો નૈવ સન્તિ શોકાદયસ્ત્રયઃ ॥ ૫.૫॥

ચિન્માત્રસ્યાપ્યસ્તિ માયા કામસઙ્કલ્પકારિણી ।
સ્રક્ષ્યામિ જગદિત્યાદિકામો માયાવિનોઽસ્તિ હિ ॥ ૫.૬॥

આકાશાદિપદાર્થાસ્તુ યથાપૂર્વં ભવન્ત્વિહ ।
સઙ્કલ્પોઽસ્તિ તતો જ્ઞેયા વ્યાવહારિક સત્યતા ॥ ૫.૭॥

અન્વેષ્ય પરમાત્માઽયં માયાતત્કાર્યલક્ષિતઃ ।
ગુરુશાસ્ત્રકૃતો બોધસ્તસ્યાન્વેષણમુચ્યતે ॥ ૫.૮॥

તતોઽનુભૂત્યા વિજ્ઞાતુમેષ્ટવ્યો ધીનિરોધતઃ ।
ધ્યાયન્યુક્ત્યા ચ મન્વાનઃ સ્વાત્માનુભવમાપ્નુયાત્ ॥ ૫.૯॥

ય એવં વેત્ત્યસૌ સર્વાંલોકાન્ કામાંશ્ચ (સર્વાંલ્લોકાન્) વિન્દતે ।
લોકાધિષ્ઠાનરૂપત્વાત્સર્વલોકાત્મતા ભવેત્ ॥ ૫.૧૦॥

કામાસ્તુ વિષયાનન્દાઃ સ્વાત્માનન્દસ્ય તેઽખિલાઃ ।
લેશાસ્તતઃ સર્વકામપ્રાપ્તિરાત્મવિદોઽસ્તિ હિ ॥ ૫.૧૧॥

એતત્પ્રજાપતેર્વાક્યં શ્રુત્વા દેવાસુરાસ્તદા ।
ઉભયેઽપિ બુભુત્સન્તઃ પરમાત્માનમાદરાત્ ॥ ૫.૧૨॥

દેવરાજોઽસુરેશશ્ચ તૌ દ્વાવિન્દ્રવિરોચનૌ ।
સત્યલોકં પ્રાપ્ય તસ્મિન્નસેવેતાં પ્રજાપતિમ્ ॥ ૫.૧૩॥

દ્વાત્રિંશદ્વર્ષસેવાતઃ પ્રસન્નોઽસૌ પ્રજાપતિઃ ।
અક્ષિલક્ષિતમાત્માનં તાભ્યાં દ્વાભ્યામવોચત ॥ ૫.૧૪॥

પૂર્ણત્વાત્પુરુષો યોઽસ્તિ પરમાત્માઽયમક્ષિણિ ।
જાગ્રત્સાક્ષિતયા સ્થિત્વા વિદ્વદ્ભિઃ સુવિભાવ્યતે ॥ ૫.૧૫॥

ચિચ્છાયાવાનહઙ્કારો મૂઢૈરાત્મેતિ ભાવ્યતે ।
કર્તા ભોક્તા સ જીવઃ સ્યાત્પરબ્રહ્મૈવ સાક્ષ્યસૌ ॥ ૫.૧૬॥

બ્રહ્મણો મરણાભાવાદમૃતત્વં તદીર્યતે ।
અદ્વિતીયતયા ભીતિહેત્વભાવાચ્ચ નિર્ભયમ્ ॥ ૫.૧૭॥

પ્રજાપત્યુક્તિતાત્પર્યં નાનુબુદ્ધમુભાવપિ (નાનુબુદ્ધ્યેતામુભાવપિ)।
રાજ્યવાસનયા ચિત્તં તદીયં રાજસં ખલુ ॥ ૫.૧૮॥

અન્યદેહસ્ય યા છાયા સા ચક્ષુષ્યુપલભ્યતે ।
તામેવાત્મતયા પ્રાહેત્યેષા બુદ્ધિરભૂત્તયોઃ ॥ ૫.૧૯॥

છાયાત્માનં દૃઢીકર્તું પુનઃ પપ્રચ્છતુર્ગુરુમ્ ।
અપ્સ્વાદર્શે ચ યો દૃષ્ટશ્છાયાત્મા સોઽયમેવ કિમ્ ॥ ૫.૨૦॥

તદીયમન્યથાજ્ઞાનં બુદ્ધ્વાપિ ન નિરાકરોત્ ।
સભામધ્યે માનભઙ્ગે બુદ્ધિભ્રંશો ભવેદિતિ ॥ ૫.૨૧॥

સ્વેનાક્ષિણ્યુપવિષ્ટો યઃ સ સર્વત્રાપિ તિષ્ઠતિ ।
ઇત્યુક્તોપાયતસ્તૌ દ્વૌ બોધયામીત્યમન્યત ॥ ૫.૨૨॥

શરાવે જલયુક્તે વા કેવલ વીક્ષ્ય તૌ પુનઃ ।
સાલઙ્કારાવવેક્ષ્યાથ છાયાં નાત્મેતિ બુધ્યતામ્ ॥ ૫.૨૩॥

છાયાયા અન્યથાત્વં સ્યાત્સાક્ષી ચૈકવિધઃ સ્થિતઃ ।
આત્મત્વં નિર્વિકારસ્ય શક્યતે બોદ્ધુમઞ્જસા ॥ ૫.૨૪॥

તથાપિ પાપબાહુલ્યપ્રતિબદ્ધધિયાવુભૌ ।
છાયાત્મતાં શરાવોક્ત્યા દૃષ્ટાં કૃત્વાત્યતુષ્યતામ્ ॥ ૫.૨૫॥

કાલેન પ્રતિબન્ધસ્ય ક્ષયે સત્યથ તં પુનઃ ।
ઉપદેશં શરાવાખ્યોપાયં ચાલોચ્ય મોક્ષ્યતે ॥ ૫.૨૬॥

ઇત્યુપેક્ષ્ય ગુરુસ્તસ્થૌ તૌ રાજ્યત્યાગતશ્ચિરમ્ ।
પ્રયાસં પ્રાપ્ય સહસા જગ્મતુઃ સ્વસ્વલોકયોઃ ॥ ૫.૨૭॥

એતૌ પ્રજાપતેઃ શિષ્યાવિતિ ભ્રાન્ત્યા વિપર્યયમ્ ।
તદીયં પ્રાપ્ય નશ્યેયુરિતિ સોઽઘોષયદ્ગુરુઃ ॥ ૫.૨૮॥

વિરોચનસ્તામસત્વાચ્છીઘ્રં તાનસુરાન્પ્રતિ ।
ગત્વા દેહાત્મતાં તેભ્ય ઉપાદિક્ષન્નિજેચ્છયા ॥ ૫.૨૯॥

અક્ષિચ્છાયા દેહજન્યા તયા દેહોપલક્ષણાત્ ।
દેહ આત્મા સ્વસ્વદેહં સદા પૂજયતાસુરાઃ ॥ ૫.૩૦॥

દેહે દૃઢેઽત્ર ભોગોઽસ્તિ મુક્તિઃ સ્યાચ્છવપૂજયા ।
ઇત્યાસુરઃ સમ્પ્રદાયઃ પ્રાયેણાદ્યાપિ દૃશ્યતે ॥ ૫.૩૧॥

ઇન્દ્રસ્તુ સાત્ત્વિકત્વેન મનનં કુરુતેઽધ્વનિ ।
આન્ધ્યાદયોઽપિ છાયાયામલઙ્કારાદયો યથા ॥ ૫.૩૨॥

એવં સત્યભયં બ્રહ્મ દેહચ્છાયા કથં ભવેત્ ।
એવં મત્વા સમાગત્ય ગુરોરગ્રે તથાઽવદત્ ॥ ૫.૩૩॥

પાપક્ષયાય દ્વાત્રિંશદ્વર્ષાણિ (તપસે વસ) ।
પૂર્વોપદિષ્ટં ભૂયોઽપિ બ્રવીમીત્યાહ તં ગુરુઃ ॥ ૫.૩૪॥

જાગ્રતિ સ્થૂલદેહેન સાઙ્કુર્યં શઙ્ક્યતે તતઃ ।

સ્વપ્ને યશ્ચરતીવાઽસૌ સાક્ષ્યાત્મેત્યવગમ્યતામ્ ॥ ૫.૩૫॥

આન્ધ્યરોગાદયો દોષાશ્છાયાયાં દેહબિમ્બગાઃ ।
ભાન્તિ સ્વપ્ને તુ નૈવેતિ તુષ્ટો વવ્રાજ પૂર્વવત્ ॥ ૫.૩૬॥

મન્વાનઃ સન્નન્યદોષાનપશ્યત્સ્વપ્નમાત્મનિ ।
ચોરવ્યાઘ્રાદયો ઘ્નન્તીત્યદીનાગત્ય ચાબ્રવીત્ ॥ ૫.૩૭॥

સ્વપ્નેઽપિ વાસનાદેહઃ શઙ્ક્યેતેતિ સુષુપ્તિગમ્ ।
સાક્ષિણં પ્રોક્તવાંસ્તસ્મૈ દ્વાત્રિંશદ્વર્ષસેવિને ॥ ૫.૩૮॥

તુષ્ટોઽગચ્છત્સુષુપ્તિસ્થે જાડ્યં દોષમવૈક્ષત ।
વિનષ્ટસદૃશઃ સુપ્તાવાત્મેત્યાગત્ય ચાબ્રવીત્ ॥ ૫.૩૯॥

અમૂર્તં કારણં દેહં બોદ્ધુમ્પાપક્ષયાદસૌ ।
શક્તોઽભૂદિતિ સન્તુષ્ટઃ પુનઃ પ્રોવાચ તં ગુરુઃ ॥ ૫.૪૦॥

પઞ્ચવર્ષાણિ સેવસ્વ પાપશેષક્ષયાય તે ।
ઇત્યુક્ત્વા સેવતે તસ્મૈ ગુરુઃ સ્પષ્ટમુપાદિશત્ ॥ ૫.૪૧॥

મઘવન્યત્ત્વયા બુદ્ધં શરીરં તત્ત્રિધા સ્થિતમ્ ।
સ્થૂલં સૂક્ષ્મં કારણં ચ (તુ) તત્તુ સર્વં વિનશ્વરમ્ ॥ ૫.૪૨॥

અનશ્વરાત્મતત્ત્વસ્ય પ્રવેષ્ટુર્જીવરૂપતઃ ।
ભોગાધિષ્ઠાનમેવૈતત્વપુર્નાસ્યાત્મતાઽસ્તિ હિ ॥ ૫.૪૩॥

જાગ્રત્સ્વપ્નસુષુપ્તેષુ ભાસયેદ્યો વપુસ્ત્રયમ્ ।
સ સાક્ષ્યાત્મા બ્રહ્મતાઽસ્ય સુખદુઃખાદિવર્જનાત્ ॥ ૫.૪૪॥

આત્મનઃ પ્રતિબિમ્બો યઃ સોઽયં દેહે પ્રવિષ્ટવાન્ ।
પ્રતિરૂપો બભૂવેતિ શ્રુત્યન્તરસમીરણાત્ ॥ ૫.૪૫॥

સ ભોક્તા ત્રિષુ દેહેષુ તાદાત્મ્યમભિમન્યતે ।
સશરીરઃ સ્વકર્મોત્થે ભુઙ્ક્તેઽવશ્યં પ્રિયાપ્રિયે ॥ ૫.૪૬॥

અશરીરં સાક્ષિણં તુ સ્પૃશેતે ન પ્રિયાપ્રિયે ।
સંસારતદભાવૌ દ્વૌ સુસ્થિતૌ કર્તૃસાક્ષિણોઃ ॥ ૫.૪૭॥

એવં વ્યવસ્થિતેઽપ્યજ્ઞઃ કર્તૃદેહેષુ સાક્ષિણમ્ ।
અશરીરં પ્રવેશ્યાશુ સુખં દુઃખં ચ મન્યતે ॥ ૫.૪૮॥

વિવેકે સતિ સાક્ષ્યેષ શરીરેભ્યઃ સમુત્થિતઃ ।
સ્વાભાવિકેન બ્રહ્માત્મરૂપેણ વ્યવતિષ્ઠતે ॥ ૫.૪૯॥

અસ્મિન્નર્થે સાક્ષિતુલ્યા દૃષ્ટાન્તા દેહવર્જિતાઃ ।
વાય્વભ્રવિદ્યુતાં નાસ્તિ હસ્તપાદાદિમદ્વપુઃ ॥ ૫.૫૦॥

અદેહાઃ વૃષ્ટિસિદ્ધ્યર્થમાકારાન્ કાંશ્ચિદાપ્નુવન્ ।
વૃષ્ટિનિષ્પાદકસ્તત્તદાકારો વ્યોમ્નિ દૃશ્યતે ॥ ૫.૫૧॥

આકારા વૃષ્ટિકાલાત્પ્રાગ્વ્યોનિ ગૂઢા ન તુ સ્ફુટાઃ ।
તતો વ્યોમ્નઃ સમુત્થાય નિદાઘે જ્યોતિરાનુવન્ ॥ ૫.૫૨॥

સન્તાપાખ્યં પરં જ્યોતિઃ પ્રાપ્ય તેન દૃઢીકૃતાઃ ।
વૃષ્ટિકાલે સ્વસ્વરૂપં સ્ફોરયન્તીતિ દૃશ્યતે ॥ ૫.૫૩॥

તથાઽયમશરીરઃ સન્ સાક્ષ્યજ્ઞાનતિરોહિતઃ ॥

દેહેઽન્તર્ભૂયવપુષો વિવેકેન સમુત્થિતઃ ॥ ૫.૫૪॥

પરં જ્યોતિર્બ્રહ્મરૂપં પ્રાપ્ય વાક્યોત્થબોધતઃ ।
સ્વેન વાસ્તવરૂપેણ નિર્દ્વૈતેનાવભાસતે ॥ ૫.૫૫॥

સ્વતઃ સાક્ષી સમ્પ્રસાદઃ કાલુષ્યેણ વિવર્જનાત્ ।
અવિદ્યયા સ્યાત્કાલુષ્યં દેહતાદાત્મ્યવિભ્રમાત્ ॥ ૫.૫૬॥

જાગરે સ્થૂલસૂક્ષ્માભ્યાં તાદાત્મ્યાદ્વ્યાધયોઽખિલાઃ ।
આધયશ્ચાસ્ય સન્તીદં મહત્કાલુષ્યમિષ્યતે ॥ ૫.૫૭॥

ઈષત્કલુષતા સ્વપ્ને સૂક્ષ્મમાત્રાભિમાનતઃ ।
સુપ્તૌ તેનાપિ હીનત્વાદયમાત્મા પ્રસીદતિ ॥ ૫.૫૮॥

કાલુષ્યબીજમજ્ઞાનમસ્ત્યત્રાર્થ વિવેચિતઃ ।
બીજેનાપિ વિહીનત્વાત્સમ્યગેવ પ્રસીદતિ ॥ ૫.૫૯॥

સ્વતઃ સાક્ષી સમ્પ્રસાદસ્તત્સ્વરૂપાનુભૂતયે ।
સમુત્થાનં ભવેદસ્ય દેહાદિભ્યો વિવેચને ॥ ૫.૬૦॥

સમુત્થિતસ્ય જીવત્વનિવૃત્યૈ બ્રહ્મરૂપતામ્ ।
મહાવાક્યાનિ સર્વાણિ બોધયન્ત્યતિયત્નતઃ ॥ ૫.૬૧॥

પરં જ્યોતિર્બ્રહ્મરૂપં પ્રાપ્ય વાક્યાર્થબોધતઃ ।

ઉત્તમઃ પુરુષઃ સ સ્યાદ્યઃ પુરાઽક્ષિણિ વર્ણિતઃ ॥ ૫.૬૨॥

દેહાદજ્ઞાનતઃ કાર્યાત્કારણાચ્ચાયમુત્તમઃ ।
જીવત્વહાનાદ્બ્રહ્મત્વભાવાચ્ચોત્તમતોચિતા ॥ ૫.૬૩॥

દ્વાવિમૌ પુરુષૌ લોકે ક્ષરશ્ચાક્ષર એવ ચ ।
ક્ષરઃ સર્વાણિ ભૂતાનિ કૂટસ્થોઽક્ષર ઉચ્યતે ॥ ૫.૬૪॥

ઉત્તમઃ પુરુષસ્ત્વન્યઃ પરમાત્મેત્યુદાહૃતઃ ।
ઇત્યાહ ભગવાન્ કાર્યકારણાભ્યાં તમુત્તમમ્ ॥ ૫.૬૫॥

ઉત્તમોઽયં પુમાન્મૂઢપ્રાણિનામપિ વિદ્યતે ।
તત્ર તત્ત્વવિદઃ કોઽતિશયઃ સ્યાદિતિ ચેચ્છૃણુ ॥ ૫.૬૬॥

સ તૂત્તમબ્રહ્મરૂપં તત્ત્વવિત્સ્વાત્મવસ્તુનિ ।
પર્યેતિ સ્વાત્મબુદ્ધ્યૈતં સર્વદેહસ્થમીક્ષતે ॥ ૫.૬૭॥

ઇન્દ્રરાજાદિદેહેષુ નાનાખાદ્યાનિ ભક્ષયન્ ।
બાલૈઃ સાકં હસન્ સ્ત્રીભિઃ કદાચિદ્રમતે સહ ॥ ૫.૬૮॥

યાનૈઃ ક્વાપિ જ્ઞાતિભિશ્ચ સહિતો મોદતે ખલુ ।
ન કદાચિત્સ્મરત્યેતદ્વપુર્જનસમીપગમ્ ॥ ૫.૬૯॥

એતદ્દેહેન તાદાત્મ્યભ્રાન્ત્યા દુઃખમભૂત્પુરા ।
વિવેકેન ભ્રમેઽપેતે તદ્દુઃખં નાદ્ય વીક્ષ્યતે ॥ ૫.૭૦॥

ઇન્દ્રરાજાદિદેહેષુ ન તાદાત્મ્યં પુરાપિ ચ ।
અતો ન તદ્દેહદુઃખશઙ્કાઽપ્યસ્ય ન (તુ) વિદ્યતે ॥ ૫.૭૧॥

સુખાનિ તદ્દેહગાનિ સાક્ષી સર્વાણ્યવેક્ષ્યતે ।
સાક્ષ્યાત્મત્વાભિમાની સન્ જ્ઞાની તાન્યભિમન્યતે ॥ ૫.૭૨॥

દુઃખાન્યપીક્ષતે સાક્ષી તથાપ્યેતેષુ તત્ત્વવિત્ ।
નાભિમાનમુપાદત્તે દુઃખાનાં માયિકત્વતઃ ॥ ૫.૭૩॥

બ્રહ્માનન્દસ્ય લેશાઃ સ્યુરાનન્દા વિષયોત્થિતાઃ ।
અતસ્તત્ત્વવિદઃ પક્ષપાતો હ્યેતેષુ વિદ્યતે ॥ ૫.૭૪॥

પુણ્યમેવમુમાપ્નોતિ ન દેવાન્પાપમાપ્નુયાત્ ।
ઇતિ શ્રુત્યન્તરં બ્રૂતે સુખં સર્વાત્મદર્શિનઃ ॥ ૫.૭૫॥

પ્રજાઃ શોચન્તિ યત્કિઞ્ચિત્તાસામેવ ભવેદિદમ્ ।
ન સર્વાત્મદૃશોઽસ્તીતિ પ્રાહૈતદપિ સા શ્રુતિઃ ॥ ૫.૭૬॥

સર્વાત્મત્વેઽપિ દેહાદિદોષલેપો ન મેઽસ્તિ હિ ।
અદુષ્ટા સૂર્યભા યદ્વચ્ચણ્ડાલાદિસ્પૃગપ્યસૌ ॥ ૫.૭૭॥

બ્રહ્માદ્યાઃ સ્થાવરાન્તા યે પ્રાણિનો મે વપુઃ સ્મૃતાઃ ।
કામક્રોધાદયો દોષા જાયેરન્મે કુતોઽન્યતઃ ॥ ૫.૭૮॥

ઇત્યાચાર્યા બ્રહ્મબોધકુશલા અભવન્પુરા ।
સુખમાત્રગ્રાહિણોઽત્ર દૃષ્ટાન્તાઃ સન્ત્યનેકશઃ ॥ ૫.૭૯॥

વૃક્ષે મધુકરઃ પુષ્પરસં ગૃહ્ણાતિ નેતરત્ ।
યતિર્ભિક્ષામુપાદત્તે નાશૌચં કસ્યચિદ્ગૃહે ॥ ૫.૮૦॥

મૂર્ખસ્યાપિ સુખે પક્ષપાતોઽસ્તીત્યુચ્યતે યદિ ।
તર્હિ તસ્ય પ્રસિદ્ધ્યર્થં તત્ત્વં સોઽપ્યવગચ્છતુ ॥ ૫.૮૧॥

તત્ત્વે બુદ્ધે સ્વદેહેન તાદાત્મ્યં ન સ્મરત્યસૌ ।
તેન દુઃખે વિનષ્ટેઽથ સુખમેવ સદેક્ષતે ॥ ૫.૮૨॥

તાદાત્મ્યસ્યાઽસ્મૃતૌ દેહનિર્વાહો નેતિ ચેચ્છૃણુ ।
અશ્વાદિનેવ પ્રાણેન પ્રેરિતં રક્ષ્યતે વપુઃ ॥ ૫.૮૩॥

રથે પ્રયોગયોગ્યોઽશ્વઃ શિક્ષિતઃ સારથિં વિના ।
સ્વયમેવ સદાભ્યાસાદ્ગન્તવ્યં પ્રાપયેત્ખલુ ॥ ૫.૮૪॥

ઈશ્વરેણાસ્ય દેહસ્ય પ્રેરણાય નિયોજિતઃ ।
પ્રાણસ્તદ્ભોગદેશે દેહં નયતિ કર્મણા ॥ ૫.૮૫॥

ગર્ભસ્થાનાં ચ બાલાનાં નિર્વાહો વપુષો યથા ।
જીવન્મુક્તસ્ય દેહેઽપિ નિર્વાહઃ સ્યાત્તથા ન કિમ્ ॥ ૫.૮૬॥

સમાધાવાત્મરૂપેણ વ્યુત્થાને ભોગ્યરૂપતઃ ।
સર્વાનન્દાન્ સદા ભુઙ્ક્તે મુક્તસ્યાતિશયો હ્યયમ્ ॥ ૫.૮૭॥

મુક્તેન બુદ્ધઃ સાક્ષ્યેષ સર્વાક્ષેષુ વિભાવ્યતામ્ ।
તત્તદિન્દ્રિયસંયુક્તસ્ત્રિપુટીં ભાસયત્યયૌ ॥ ૫.૮૮॥

ભાસમાને સાક્ષિતત્ત્વે તદ્ભાસા ભાસ્યમિન્દ્રિયમ્ ।
ચક્ષુર્વિયત્યભિવ્યાપ્ય રૂપં સર્વે પ્રકાશયેત્ ॥ ૫.૮૯॥

દ્રષ્ટાહઙ્કૃત્યવચ્છિન્નો દર્શનં ચક્ષુષઃ ક્રિયા ।
દૃશ્યં રૂપમિયં સર્વા ત્રિપુટી ભાતિ સાક્ષિણિ ॥ ૫.૯૦॥

સાક્ષિણો ભાસકત્વેઽપિ રૂપગન્ધાદિભિત્તયે ।
ચક્ષુર્ઘ્રાણાદ્યક્ષજાતં સર્વસાધારણં મનઃ ॥ ૫.૯૧॥

જિઘ્રાણીમમહં ગન્ધમિત્યાદિ ત્રિપુટીમિમામ્ ।
સદા ભાસયતે સાક્ષી સ એવાત્મોત્તમઃ પુમાન્ ॥ ૫.૯૨॥

મનોઽસ્ય દૈવં ચક્ષુઃ સ્યાત્કાલત્રયવિભાસનાત્ ।
તેન ભુઙ્ક્તે બ્રહ્મલોકસ્થિતાન્ કામાન્નિજાત્મનિ ॥ ૫.૯૩॥

દેવાઃ સર્વે તમાત્માનમુપાસ્ય પ્રાપ્નુવન્ત્યમૂન્ ।
કામાંલ્લોકાંશ્ચાત્મતત્ત્વં બુધ્વા સર્વાત્મતાં જગુઃ ॥ ૫.૯૪॥

અન્યોઽપિ યસ્તમાત્માનમન્વિષ્ય ગુરુશાસ્ત્રતઃ ।
સ્વાનુભૂત્યા વિજાનાતિ સ તાનાપ્નોતિ દેવવત્ ॥ ૫.૯૫॥

પ્રજાપતિરુવાચૈવમિન્દ્રાયેત્થં (મિન્દ્રાયેદં) પુનઃ પુનઃ ।
એકાધિકં વર્ષશતં સેવિત્વાઽસૌ ચ લબ્ધવાન્ ॥ ૫.૯૬॥

ગુરુશુશ્રૂષયા પાપં વિદ્યાયાઃ પ્રતિબન્ધકમ્ ।
અપૈતિ વિદ્યા લબ્ધા સ્યાદિત્યત્રેન્દ્રો નિદર્શનમ્ ॥ ૫.૯૭॥

સર્વજ્ઞેનોપદિષ્ટાપિ પ્રતિબન્ધક્ષયં વિના ।
ન લભ્યતેઽત્ર દૃષ્ટાન્તો વિરોચન ઉદીરિતઃ ॥ ૫.૯૮॥

ગુરુઃ કારુણિકો ભૂત્વા સોઢ્વાયાસં પુનઃ પુનઃ ।
પ્રજાપતિરિવ પ્રાપ્તાનનુગૃહ્ણીત સર્વથા ॥ ૫.૯૯॥

પ્રજાપતેરિયં વિદ્યા કથિતાનુગ્રહાદ્ગુરોઃ ।
સચ્છિષ્યાનનુગૃહ્ણાતુ વિદ્યાતીર્થમહેશ્વરઃ ॥ ૫.૧૦૦॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
છાન્દોગ્યે પ્રજાપતિવિદ્યાપ્રકાશોઽનામ પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

## ૬. મુણ્ડકોપનિષદ્વિવરણો નામ ષષ્ઠોઽધ્યાયઃ ।

બ્રહ્મવિદ્યાં શૌનકાય યામુવાચાઙ્ગિરા મુનિઃ ।
અથર્વણે મુણ્ડકેઽસૌ વિશદીકૃત્ય વક્ષ્યતે ॥ ૬.૧॥

ચતુર્મુખાદિકે સમ્પ્રદાયે યો મુનિરઙ્ગિરાઃ ।
ઉપસદ્ય યથાશાસ્ત્રમેતં પપ્રચ્છ શૌનકઃ ॥ ૬.૨॥

એકસ્મિવિદિતે સર્વં વિજ્ઞાતમિતિ વૈદિકી ।
પ્રસિદ્ધિરસ્તિ તદ્વસ્તુ કિં સ્યાન્નિશ્ચિત્ય મે વદ ॥ ૬.૩॥

શ‍ૃણુ વિદ્યે ઉભે તાવદ્વેદિતવ્યે પરાપરે ।
પૃષ્ટં વસ્તુ તયોર્મધ્યે ગમ્યતે પરવિદ્યયા ॥ ૬.૪॥

ષડઙ્ગસહિતા વેદા વિજ્ઞાયન્તે યયા ધિયા ।
સા ધીરપરવિદ્યા સ્યાદ્બ્રહ્મધીસ્તુ પરા મતા ॥ ૬.૫॥

ઉપનીતેન વિજ્ઞેયા વેદાઃ સર્વે ન તાવતા ।
બ્રહ્મધીઃ કિન્તુ વૈરાગ્યે સ્યાદાચાર્યોપદેશતઃ ॥ ૬.૬॥

વૈદિક્યપ્યધિકારસ્ય ભેદાદુક્તા પૃથક્ પરા ।
વિપ્રાઃ પરિવ્રાજકાશ્ચ તિષ્ઠન્તીતિ યથા તથા ॥ ૬.૭॥

યસ્યામપરવિદ્યાયાં કર્માણ્યુક્તાનિ સાધકાઃ ।
કુર્વન્તિ કર્મભિઃ શુદ્ધિં પરવિદ્યા કરોતિ હિ ॥ ૬.૮॥

પરયા ચાક્ષરં જ્ઞેયમેતસ્મિન્વિદિતે સતિ ।
સર્વં જગદ્ભવેદ્બુદ્ધં તસ્ય સર્વાત્મકત્વતઃ ॥ ૬.૯॥

ન વિનાનુષ્ઠિતં કર્મ વેદનં પર્યવસ્યતિ ।
બ્રહ્મ ધીસ્તાવતૈવ સ્યાત્ફલદેતિ પરા મતા ॥ ૬.૧૦॥

તદ્વેદ્યમક્ષરં કીદૃગિતિ ચેદભિધીયતે ।
જ્ઞાનેન્દ્રિયૈર્ન વિજ્ઞેયં ગ્રાહ્યં કર્મેન્દ્રિયૈર્ન વા ॥ ૬.૧૧॥

ન ગોત્રં કાશ્યપાદ્યસ્તિ વર્ણઃ શુક્લાદિકશ્ચ ન ।
ન જ્ઞાનેન્દ્રિયમસ્ત્યસ્ય નાપિ કર્મેન્દ્રિયં તથા ॥ ૬.૧૨॥

નિત્યોઽક્ષરપદાર્થોઽયં તદ્વિનાશાનિરૂપણાત્ ।
વિભુર્વિવિધભાવિત્વાત્તચ્ચ સર્વાત્મકત્વતઃ ॥ ૬.૧૩॥

આકાશવત્સર્વગોઽતઃ પરિચ્છેદો ન દેશતઃ ।
ન કાલતોઽપિ નિત્યત્વાદ્વિભુત્વાન્નાપિ વસ્તુતઃ ॥ ૬.૧૪॥

સર્વગસ્યાપિ સૂક્ષ્મત્વાદક્ષાઽગોચરતોદિતા ।
પરિમાણાલ્પતા નાત્ર સૌક્ષ્મ્યં દુર્લક્ષ્યતા તુ તત્ ॥ ૬.૧૫॥

હસ્તગ્રાહ્યો ઘટઃ સ્થૂલો ધ્વનિઃ સૂક્ષ્મસ્તદગ્રહાત્ ।
સ્વરૂપસૌક્ષ્મ્યમેતત્સ્યાદચરેઽપિ ભવેદિદમ્ ॥ ૬.૧૬॥

ધનસ્યેવ વ્યયો નાસ્ય વિક્રિયાદેરસંભવાત્ ।
સ્થિરજઙ્ગમભૂતાનાં હેતું તં મન્વતે બુધાઃ ॥ ૬.૧૭॥

યદુક્તં લક્ષણં તત્તુ કૌટસ્થ્યાદક્ષરં ભવેત્ ।
તદ્યયા વેદ્યતે સેયં પરા વિદ્યેતિ કીર્તિતા ॥ ૬.૧૮॥

ન યુક્તં ભૂતયોનિત્વં સાધનાન્તરવર્જનાત્ ।
એકસ્માચ્ચેતનાદ્ભૂરિજડાનામપ્યસંભવાત્ ॥ ૬.૧૯॥

ઊર્ણનાભિર્યથા તન્તૂન્ સૃજતે સંહરત્યપિ ।
અન્યાનપેક્ષસ્તદ્વત્સ્યાદક્ષરસ્યાપિ હેતુતા ॥ ૬.૨૦॥

બહ્વૌષધ્યો યથૈકસ્યા ભૂમેર્જાતા યથા જડાઃ ।
કેશાશ્ચેતનતો જાતાસ્તથા ત્વક્ષરતો જગત્ ॥ ૬.૨૧॥

બ્રહ્મણો જગદુત્પત્તેઃ ક્રમોઽયમવગમ્યતામ્ ।
વક્ષ્યમાણેન તપસા બ્રહ્માદાવુપચીયતે ॥ ૬.૨૨॥

અઙ્કુરોત્પાદકં બીજમુચ્છૂનં સ્યાદ્યથા જલાત્ ।
સૃજ્યસ્ય બુદ્ધ્યા સંયુક્તં સ્યાદ્બ્રહ્મોપચિતં તથા ॥ ૬.૨૩॥

ભોગ્યવર્ગાઙ્કુરાખ્યં યદન્નં તજ્જાયતે તતઃ ।
અવ્યાકૃતં વ્યાચિકીર્ષાવસ્થમન્નમિહોચ્યતે ॥ ૬.૨૪॥

તસ્માદન્નાત્ક્રિયાશક્તિઃ પ્રાણો જ્ઞાનસ્ય સાધનમ્ ।
મનશ્ચાજાયત સ્થૂલં સત્યાખ્યં ભૂતપઞ્ચકમ્ ॥ ૬.૨૫॥

તતો ભૂમ્યાદયો લોકા જ્યોતિષ્ટોમાદિકર્મસુ ।
અમૃતાખ્યં સ્વર્ગફલમિત્થં સર્વમજાયત ॥ ૬.૨૬॥

બ્રહ્મૈવ જગદાકારં સ્યાચ્ચેત્તદ્વિકૃતં ભવેત્ ।
નો ચેજ્જગન્ન જાયેતેત્યત્ર પ્રતિવિધીયતે ॥ ૬.૨૭॥

નિરુપાધિ બ્રહ્મતત્ત્વં જગદાકારભાઙ્ ન હિ ।
માયોપાધિક એવાયં સર્વજ્ઞઃ સૃજતે જગત્ ॥ ૬.૨૮॥

સામાન્યવૃત્ત્યા સર્વજ્ઞો વિશેષેણ ચ સર્વવિત્ ।
જ્ઞાનમેવ તપોઽસ્યાસ્માજ્જગદ્ભેદાદ્યજાયત ॥ ૬.૨૯॥

જગત્કારણમદ્વૈતં જ્ઞાતવ્યં પરવિદ્યયા ।
જ્ઞાતેઽસ્મિન્સર્વજગતસ્તત્ત્વં યત્તદ્વિબુદ્ધ્યતે ॥ ૬.૩૦॥

અપરા વેદવિદ્યા તુ કર્માનુષ્ઠાનમાર્ગતઃ ।
સાધનં પરવિદ્યાયાઃ સત્યં સત્કર્મણઃ ફલમ્ ॥ ૬.૩૧॥

કામ્યકર્મફલં સ્વર્ગો નિત્યકર્મફલં ધિયઃ ।
શુદ્ધિસ્તચ્ચોભયં કર્મ કૃત્વાવશ્યમવાપ્નુયાત્ ॥ ૬.૩૨॥

હે સત્યકામાઃ કર્માણિ મન્ત્રબ્રાહ્મણદર્શિનઃ ।
કુરુધ્વમેષ વઃ પન્થા ભોગમોક્ષપ્રસિદ્ધયે ॥ ૬.૩૩॥

અગ્નિહોત્રં જુહોત્યાદૌ કુર્યાદ્દર્શાદિકાનથ ।
યદભાવે જન્મસુ સ્યાત્સપ્તસ્વેતસ્ય દુર્ગતિઃ ॥ ૬.૩૪॥

કાલ્યાદિવહ્નિજિહ્વાસુ હોતારં તં યથાવિધિ ।
આહુત્યાખ્યા દેવતાસ્તા ઇન્દ્રલોકે નયન્તિ હિ ॥ ૬.૩૫॥

પ્રિયં વદન્ત્ય એહીતિ વત્યઃ સૂર્યરશ્મિભિઃ ।
પુણ્યાર્જિતો લોક એષ ઇત્યુક્ત્વા પ્રાપયન્તિ તમ્ ॥ ૬.૩૬॥

કામ્યકર્મફલં પ્રોક્તમીશ્વરાર્પિતકર્મણઃ ।
ફલં સંસારહેયત્વબુદ્ધિઃ સાથ વિવિચ્યતે ॥ ૬.૩૭॥

ક્ષુદ્રાયાસ્તરણં નદ્યાઃ પ્રસિદ્ધ્યત્યદૃઢૈઃ પ્લવૈઃ ।
ન સમુદ્રસ્ય યજ્ઞાશ્ચ તદ્વચ્છિથિસાધનમ્ ॥ ૬.૩૮॥

તેનાપ્નોતિ સ્વર્ગમાત્રં ન તુ મોક્ષં તથા સતિ ।
કર્મનિષ્ઠા જરામૃત્યૂ પ્રાપ્નુવન્તિ પુનઃ પુનઃ ॥ ૬.૩૯॥

જ્ઞાનવદ્દ્વૈદિકત્વેન કર્મણો મુક્તિહેતુતા ।
અસ્તીતિ ચેન્ન સંસારમૂલહેત્વનિરાકૃતેઃ ॥ ૬.૪૦॥

અવિદ્યા સંસૃતેર્મૂલમેતસ્યામેવ કર્મિણઃ ।

વર્તન્તે ન તુ જાનન્તિ બ્રહ્મત્માનં સદદ્વયમ્ ॥ ૬.૪૧॥

પણ્ડિતંમન્યતાં પ્રાપ્તાઃ કર્મકાણ્ડાર્થવેદનાત્ ।
ગુરુશ્ચ તાદૃગેવાતો હ્યન્ધનીતાન્ધવત્સ્થિતાઃ ॥ ૬.૪૨॥

અહં યજ્વા વાજપેયરાજસૂયાદિભિર્મખૈઃ ।
કૃતાર્થ ઇતિ રાગેણ મત્વા ભોગક્ષયે પતેત્ ॥ ૬.૪૩॥

વરિષ્ઠં કર્મ મત્વાસ્માચ્છ્રેયોઽન્યન્નૈવ વેત્ત્યસૌ ।
સ્વર્ગાદાગત્ય વિપ્રત્વં પ્રાપ્નોતિ શ્વાદિજન્મ વા ॥ ૬.૪૪॥

કર્માતરં ચેદ્રમ્યં સ્યાદ્વિપ્રત્વં શ્વાદિતાન્યથા ।
અસારતામિમાં વેત્તિ શુદ્ધધીર્નિત્યકર્મભિઃ ॥ ૬.૪૫॥

ઉપાસકો બ્રહ્મલોકં પ્રાપ્નોત્યાવૃત્તિવર્જિતમ્ ।
તથાપિ ભૂયાનાયાસો મુક્તિશ્ચાસ્ય વિલમ્બતે ॥ ૬.૪૬॥

પરીક્ષ્ય કર્મજાલ્લોકાન્ કર્મણા મુક્ત્યસંભવાત્ ।
વિરક્તો બ્રહ્મબોધાર્થં ગુરુમેતિ યથાવિધિ ॥ ૬.૪૭॥

વેદાન્તાનામનેકત્વાત્સંશયાનાં બહુત્વતઃ ।
વેદ્યસ્યાપ્યતિસૂક્ષ્મત્વાન્ન જાનાતિ ગુરું વિના ॥ ૬.૪૮॥

શ્રવણાન્મનનાદ્ધ્યાનાદપ્યુપાયાદ્ગુરૂદિતાત્ ।
અજ્ઞાનસંશયૌ જહ્યાદ્વિપરીતાં ચ ભાવનામ્ ॥ ૬.૪૯॥

ગુરુશ્ચ યોગ્ય શિષ્યાય વિદ્યામક્ષરબોધિનીમ્ ।
બ્રૂયાત્સ્વકીયવિદ્યાયાઃ સમ્પ્રદાયપ્રવૃત્તયે ॥ ૬.૫૦॥

તદેતદક્ષરં સત્યં માયાશક્તિસમન્વિતમ્ ।
તસ્માત્સર્વે સમુત્પન્ના વિસ્ફુલિઙ્ગા યથાગ્નિતઃ ॥ ૬.૫૧॥

અક્ષરાત્મા સ્વયઞ્જ્યોતિર્માયારૂપાક્ષરાત્પરઃ ।
અચિન્ત્યશક્તિરનૃતા માયાસ્મિન્ કલ્પયેજ્જગત્ ॥ ૬.૫૨॥

માયાવિનોઽસ્માત્પ્રાણાદિ વિયદાદિ ચ જાયતે ।
તતો વિરાડભૂત્તસ્મિન્નવશિષ્ટમભૂજ્જગત્ ॥ ૬.૫૩॥

પુરુષો માયયા સર્વજગદ્રૂપેણ ભાસતે ।
સર્વે પુરુષ એવાતો વસ્તુતત્ત્વાવલોકને ॥ ૬.૫૪॥

દેહત્રયગુહાયાં યચ્ચૈતન્યં સાક્ષિ વિદ્યતે ।
એતત્સર્વાત્મકં બ્રહ્મેત્યેવં બુદ્ધ્વા તમોનુદેત્ ॥ ૬.૫૫॥

અજ્ઞોઽહમિતિ તાદાત્મ્યમજ્ઞાનસ્યાત્મતાઽસ્તિ યત્ ।
અવિદ્યાગ્રન્થિરેષ સ્યાત્સ ચ બોધાદ્વિકીર્યતે ॥ ૬.૫૬॥

આવિર્ભૂતં સ્વયં ભાનાત્સ્વત્વાત્સન્નિહિતં ચ યત્ ।
બ્રહ્માસ્મિન્ કલ્પિતં સર્વમિતિ ધીર્બોધ ઉચ્યતે ॥ ૬.૫૭॥

સા ધીશ્ચેન્ન સ્થિરા તર્હિ પ્રણવેન વિચિન્તયેત્ ।
બાણેન વિદ્ધ્યતે લક્ષ્યં વિધ્યેદ્બ્રહ્મતયા ધિયા ॥ ૬.૫૮॥

ધીર્બાણો ધનુરોઙ્કારો બ્રહ્મ તલ્લક્ષ્યમુચ્યતે ।
અપ્રમત્તેન બોદ્ધવ્યં લગ્ના બ્રહ્મણિ ધીર્ભવેત્ ॥ ૬.૫૯॥

દૃઢં લગ્નં બાલશલ્યમાકૃષ્ટમપિ નાવ્રજેત્ ।
મુક્તશલ્યઃ સમાગચ્છેદ્બાણ એવ વૃથા યથા ॥ ૬.૬૦॥

બ્રહ્મસંલગ્નધીરેવં સ્વયં નાયાતિ કુત્રચિત્ ।
કિન્ત્વકિઞ્ચિત્કરં ચક્ષુરાદ્યેવાયાતિ બાહ્યતઃ ॥ ૬.૬૧॥

દર્શનાદિક્રિયાઃ કુર્વન્યથાપૂર્વં ચ ઇન્દ્રિયૈઃ ।
સિદ્ધ્યસિદ્ધી ન જાનાતિ જીવન્મુક્તઃ સ ઉચ્યતે ॥ ૬.૬૨॥

પઞ્ચીકૃતોક્તમાર્ગેણ પ્રણવધ્યાનમાચરેત્ ।
તતો જગદધિષ્ઠાનમેકમેવ સદેક્ષ્યતે ॥ ૬.૬૩॥

લૌકિકીર્વૈદિકીશ્ચાન્યાઃ સર્વા વાચઃ પરિત્યજેત્ ।
ધ્યાયેચ્ચેદ્બ્રહ્મ તસ્યાત્ર ધીગ્રન્થ્યાદિ વિનશ્યતિ ॥ ૬.૬૪॥

ભિદ્યતે હૃદયગ્રન્થિશ્છિદ્યન્તે સર્વસંશયાઃ ।
ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્દૃષ્ટે પરાવરે ॥ ૬.૬૫॥

પરમવ્યાકૃતં યસ્માદવરં સ્યાચ્ચિદાત્મનઃ ।
દૃષ્ટે તસ્મિન્નહઙ્કારચિતોર્ગ્રન્થિર્વિભિદ્યતે ॥ ૬.૬૬॥

અહઙ્કારસ્ય કર્તૃત્વં ચિત્યધ્યસ્ય તથા ચિતઃ ।
સ્ફૂર્તિં ચાહઙ્કૃતૌ ગ્રન્થિં કુર્યાન્માયા તયોર્દૃઢમ્ ॥ ૬.૬૭॥

ભિન્ને ગ્રન્થૌ વિવેકેન સંશયા બ્રહ્મતત્ત્વગાઃ ।
છિદ્યન્તે સ્યાદ્ભાવિજન્મહેતુકર્મક્ષયસ્તથા ॥ ૬.૬૮॥

આનન્દરૂપં હૃત્કોશે યદ્ભાતિ પ્રાણિનાં સદા ।
તચ્છુભ્રં જ્યોતિષાં જ્યોતિર્દ્રષ્ટવ્યં તન્મુમુક્ષુભિઃ ॥ ૬.૬૯ ॥

ભાસકા અપિ સૂર્યાદ્યાસ્તદ્ભાસયિતુમક્ષમાઃ ।
તસ્મિન્નાદૌ ભાસમાને તદ્ભાસા ભાસતેઽખિલમ્ ॥ ૬.૭૦ ॥

સર્વાસુ દિક્ષુ તદ્ભાતિ તસ્મિન્નન્તર્ભવત્યદઃ ।
જગત્તતઃ પૃથઙ્નાસ્તિ તરઙ્ગાદિર્જલાદ્યથા ॥ ૬.૭૧ ॥

જલતત્ત્વં તરઙ્ગાદૌ બ્રહ્મતત્ત્વં તથાઽખિલે ।
તતો બ્રહ્મણિ વિજ્ઞાતે વિજ્ઞાતં સકલં ભવેત્ ॥ ૬.૭૨ ॥

અખણ્ડૈકરસં બ્રહ્મ સમાધાવેવ ભાસતે ।
વ્યુત્થાને ભોક્તૃભોક્તારૌ ભાસેતે પક્ષિવત્પૃથક્ ॥ ૬.૧૭૩ ॥

વૃક્ષે પક્ષી ફલં ભુઙ્ક્તે ક્ષુધિતોઽન્યસ્તુ વીક્ષતે ।
ચિચ્છાયાવાનહઙ્કારો ભુઙ્ક્તે ચિદ્વીક્ષતે તથા ॥ ૬.૭૪ ॥

બોધાત્પુરા તુ ચિદ્ભ્રાન્ત્યા મગ્ના ભોક્તરિ શોચતિ ।
સા ભ્રાન્તિર્ભોક્તૃનિષ્ઠૈવ તદ્વિવેકોઽપિ ભોક્તૃગઃ ॥ ૬.૭૫ ॥

ભોગાવાન્તરભેદૌ હિ ભ્રાન્તિતદ્બાધકાવુભૌ ।
ઇતરારોપવેત્તૌ ચ ચિત્યધ્યસ્તૌ ન વાસ્તવૌ ॥ ૬.૭૬ ॥

વિવિનક્તિ યદા ભોક્તા પુણ્યપાપે તદાસ્ય નો ।
ક્રીડત્યાત્મન્યસૌ ધ્યાનાદુદ્યૂતાદૌ મૂઢવત્સદા ॥ ૬.૭૭ ॥

આત્મન્યેવ રતિં કુર્યાત્સર્વદા નિત્યકર્મવત્ ।
વરિષ્ઠો બ્રહ્મવિત્સ્વેષ વ્યર્થક્ષણવિવર્જનાત્ ॥ ૬.૭૮ ॥

સત્યં તપો બ્રહ્મચર્યં વિદ્યાધિકૃતિકારણમ્ ।
મુખ્યાધિકારી વિદ્યાયાં વરિષ્ઠો બ્રહ્મવિદ્ભવેત્ ॥ ૬.૭૯ ॥

ન ચક્ષુષા નાપિ વાચા નાન્યૈરક્ષૈશ્ચ ગૃહ્યતે ।
ન કર્મણા ન તપસા વિનાન્તર્મુખતાં ક્વચિત્ ॥ ૬.૮૦ ॥

ધ્યાનેનાન્તર્મુખો વાક્યાદ્બ્રહ્માત્માનમવેક્ષતે ।
વિશુદ્ધબુદ્ધિરાત્મજ્ઞો યથા વક્તિ તથા ભવેત્ ॥ ૬.૮૧ ॥

ભૂતિકામો વિભૂત્યર્થમાત્મજ્ઞં સર્વદાર્ચયેત્ ।

નિષ્કામસ્તમુપાસીનો વેત્તિ બ્રહ્મત્વમાત્મનઃ ॥ ૬.૮૨॥

કામશ્રૈષ્ઠ્યપરઃ કામૈસ્તત્ર તત્ર પ્રજાયતે ।
જીવન્નેવાત્મવિત્સર્વકામાનાં લયમાપ્નુયાત્ ॥ ૬.૮૩॥

ન વેદપાઠબાહુલ્યાન્ન બહુશ્રુતિતસ્તથા ।
આત્મા લભ્યોઽથ દેવોઽયં વૃણુતે તેન લભ્યતે ॥ ૬.૮૪॥

ઈશ્વરાનુગ્રહાદેવ ભવેદદ્વૈતવાસના ।
તસ્માદ્બ્રહ્માર્પિતં કર્મ કુર્યાદીશ્વરતુષ્ટયે ॥ ૬.૮૫॥

ઈશાનુગ્રહયુક્તસ્ય સચ્ચિદાનન્દલક્ષણામ્ ।
તનું વિવૃણુતે સ્વીયાં પરમાત્મા હ્યશેષતઃ ॥ ૬.૮૬॥

શ્રવણં મનનં ધ્યાનં યસ્ય ન પ્રબલં ભવેત્ ।
પ્રમાદો વાસ્તિ વિષયાસક્ત્યાત્મા ન સ બુધ્યતે ॥ ૬.૮૭॥

તપો નાસ્યાશ્રમોપેતં યસ્ય શુદ્ધા ન તસ્ય ધીઃ ।
સંપત્ત્યા શ્રવણાદીનામસૌ જ્ઞાનેન તૃપ્યતિ ॥ ૬.૮૮॥

વેદાન્તધીનિશ્ચિતાર્થાઃ સંન્યાસાચ્છુદ્ધબુદ્ધયઃ ।
બ્રહ્મદૃષ્ટૌ સ્થિરાયાન્તે મુચ્યન્તે મૂલકારણાત્ ॥ ૬.૮૯॥

સંસારિણાં દેહપાતોઽપરાન્તઃ પુનરુદ્ભવાત્ ।
પરાન્તો વિદુષાં દેહપાતઃ પુનરનુદ્ભવાત્ ॥ ૬.૯૦॥

પરાન્તકાલે મુક્તા યે બ્રહ્મત્વાત્તે પરામૃતાઃ ।
કલાઃ પઞ્ચદશૈતેષાં લીયન્તે સ્વસ્વકારણે ॥ ૬.૯૧॥

પ્રાણઃ શ્રદ્ધા ખાદિભૂતપઞ્ચકં ચેન્દ્રિયં મનઃ ।
અન્નવીર્યતપોમન્ત્રાઃ કર્મ લોકાશ્ચ તાઃ કલાઃ ॥ ૬.૯૨॥

વાગાદીનનુગૃહ્ણન્તિ  વહ્ન્યાદેઃ શક્તયઃ પુરા ।
તાશ્ચ દેવાનેવ યાન્તિ સ્વાનુગ્રાહ્યવિલોપનાત્ ॥ ૬.૯૩॥

અનારબ્ધાનિ કર્માણિ વિજ્ઞાનમયનામકઃ ।
કર્તા ચ વિદ્યયા લીનઃ સ્વસ્મિન્ કાઠિન્યવદ્ધૃતે ॥ ૬.૯૪॥

અબ્ધાવસ્તં યાન્તિ નદ્યો નામરૂપે વિહાય હિ ।
તથા વિદ્વાન્નામરૂપાન્મુક્તો યાતિ પરં પદમ્ ॥ ૬.૯૫॥

યઃ કોऽપિ બ્રહ્મ વેત્ત્યેષ બ્રહ્મૈવ ભવતિ સ્વયમ્ ।
અબ્રહ્મવિત્તસ્ય કુલે ન સ્યાદેતદ્વિબોધતઃ ॥ ૬.૯૬॥

શોકં તરતિ પાપ્માનમપિ ધીગ્રન્થિતોऽખિલાત્ ।
મુક્ત બ્રહ્માત્મબોધેન ભવત્યેવામૃતોऽખિલઃ ॥ ૬.૯૭॥

ક્રિયાવન્તઃ શ્રોત્રિયા યે સગુણબ્રહ્મચિન્તકાઃ ।
તેષામેવ બ્રહ્મતત્ત્વવિદ્યામેતાં વદેદ્બુધઃ ॥ ૬.૯૮॥

અઙ્ગિરાઃ શૌનકાયૈતત્સત્યં બ્રહ્મોપદિષ્ટવાન્ ।
નમસ્કૃત્ય બ્રહ્મવિદો બ્રહ્મવિદ્યામવાપ્નુયાત્ ॥ ૬.૯૯॥

શૌનકસ્ય બ્રહ્મવિદ્યા વિસ્પષ્ટમુપવર્ણિતા ।
તુષ્ટોऽસ્માનનુગૃહ્ણાતુ વિદ્યાતીર્થમહેશ્વરઃ ॥ ૬.૧૦૦॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
મુણ્ડકોપનિષદ્વિવરણોનામ ષષ્ઠોऽધ્યાયઃ ॥ ૬॥

## ૭. પ્રશ્નોપનિષદ્વિવરણં નામ સપ્તમોऽધ્યાયઃ ।

અથર્વણે પિપ્પલાદઃ ષણ્મુનિભ્યો યદબ્રવીત્ ।
તત્સર્વં પ્રવિવિચ્યાऽત્ર પ્રવક્ષ્યામિ પૃથક્ પૃથક્ ॥ ૭.૧॥

મુનયો વેદતાત્પર્યાત્સગુણબ્રહ્મચિન્તકાઃ ।
પરં બ્રહ્માऽપેક્ષમાણાઃ સમિદ્ધસ્તા ગુરું યયુઃ ॥ ૭.૨॥

ગુરૂપસત્તિસંપૂર્ત્યૈ વર્ષં ગુર્વન્તિકેऽવસન્ ।
સમ્યક્ ફલતિ વિદ્યૈષા વાર્ષિક્યા ગુરુસેવયા ॥ ૭.૩॥

કાત્યાયનોऽપૃચ્છદાદૌ સ્થૂલદેહજનિક્રમમ્ ।
ફલં ત્વપરવિદ્યાયાસ્તત્ર સ્પષ્ટીભવિષ્યતિ ॥ ૭.૪॥

કર્મોપાસ્તિશ્ચાપરસ્યાં વિદ્યાયાં શ્રૂયતે દ્વયમ્ ।
તત્ફલં જન્મકષ્ટં તદિત્યભિપ્રેત્ય વર્ણ્યતે ॥ ૭.૫॥

પ્રજાપતિઃ પ્રજાકામો વિરાટ્સૃષ્ટેરનન્તરમ્ ।
સ્રષ્ટવ્યાલોચનાખ્યં તત્તપઃ કૃત્વાऽસૃજત્પ્રજાઃ ॥ ૭.૬॥

ભોગ્યભોક્ત્રાત્મકં દ્વન્દ્વં રયિપ્રાણાખ્યમાદિતઃ ।
સૃષ્ટ્વાऽભિમાનિનૌ દેવૌ ચન્દ્રાદિત્યૌ ચ સૃષ્ટવાન્ ॥ ૭.૭॥

મૂર્તમોષધ્યાદિભોગ્યં શબ્દગન્ધરસાદિકમ્ ।
અમૂર્તમનયોર્વૃદ્ધિં દેવશ્ચન્દ્રઃ કરોતિ હિ ॥ ૭.૮॥

આદિત્ય ઉદ્યન્ભોક્તૄણાં તત્તદ્દિગ્વર્તિનામિમાન્ ।
પ્રાણાન્પ્રવર્તયેદ્ભોક્તૄનેતેઽન્નં ભુઞ્જતે તતઃ ॥ ૭.૯॥

ચન્દ્રસ્તિથિમહોરાત્રં સૂર્યઃ સમ્પાદયત્યતઃ ।
તત્સમૂહસ્વરૂપોઽસૌ કાલઃ સંવત્સરોઽભવત્ ॥ ૭.૧૦॥

યદ્યદુત્પદ્યતે તત્તત્સ્યાદુપાધિઃ પ્રજાપતેઃ ।
પ્રજાપતિર્વત્સરાત્મા સ પુનર્દ્વિવિધોઽભવત્ ॥ ૭.૧૧॥

અભૂતાં વત્સરાંશૌ દ્વાવયને દક્ષિણોત્તરે ।
ચન્દ્રાદિત્યૌ તત્ર દેવૌ દક્ષિણોત્તરમાર્ગયોઃ ॥ ૭.૧૨॥

ઇષ્ટપૂર્તકૃતશ્ચન્દ્રં યાન્તિ દક્ષિણમાર્ગતઃ ।
આવર્તન્તે પુનસ્તત્ર ક્રમમુક્તિર્ન વિદ્યતે ॥ ૭.૧૩॥

યોગિનઃ સગુણધ્યાનાદ્રવિમુત્તરમાર્ગતઃ ।
ગત્વા તન્મણ્ડલં ભિત્ત્વા બ્રહ્મલોકં વ્રજન્તિ હિ ॥ ૭.૧૪॥

આસીત્પ્રજાપતિર્માસઃ પક્ષૌ શુક્લેતરાવિહ ।
યૌ તયોશ્ચ રવિશ્ચન્દ્રોઽભિમન્તારાવુભૌ સ્થિતૌ ॥ ૭.૧૫॥

રવિધ્યાયી તુ કૃષ્ણેઽપિ કુર્વન્ શુક્લફલં વ્રજેત્ ।
શુક્લપક્ષે ફલાધિક્યં શાસ્ત્રોક્તં કામ્યકર્મણામ્ ॥ ૭.૧૬॥

પ્રજાપતિરહોરાત્રરૂપોઽભૂદહ્નિ દેવતા ।
રવિશ્ચન્દ્રો રાત્રિદેવો રાત્રાવેવ રતિસ્તતઃ ॥ ૭.૧૭॥

ભોક્તૃભોગ્યાત્મકં દ્વન્દ્વં સૃષ્ટ્વાઽથૈષ પ્રજાપતિઃ ।
અન્નરૂપોઽભવત્તસ્માદન્નાદ્રેતસ્સમુદ્ભવઃ ॥ ૭.૧૮॥

રેતસોઽમૂઃ પ્રજા જાતા રેતસ્સેકં પ્રજાપતેઃ ।
વ્રતં ચરન્તિ ચેત્પુત્રં પુત્રીં ચોત્પાદયન્તિ હિ ॥ ૭.૧૯॥

બ્રહ્મચર્યરતા ઊર્ધ્વરેતસો બ્રહ્મચિન્તકાઃ ।
બ્રહ્મલોકં વ્રજન્ત્યન્યે નિસ્તપસ્કા ન યાન્તિ તમ્ ॥ ૭.૨૦॥

કાત્યાયનેન યત્પૃષ્ટં હેયં જન્મ તદીરિતમ્ ।

ભાર્ગવઃ સૂક્ષ્મદેહસ્ય સ્થૂલેઽપ્રાક્ષીદ્વિવેચનમ્ ॥ ૭.૨૧॥

તસ્મિન્વિવેચિતે સ્થૂલસ્યાનાત્મત્વં સ્ફુટં ભવેત્ ।
ધારકો દ્યોતકઃ શ્રેષ્ઠ ઇત્યપ્રાક્ષીદસૌ ત્રયમ્ ॥ ૭.૨૨॥

દેવાઃ કતિ સ્થૂલદેહં ધારયન્ત્યત્ર ધારણમ્ ।
દ્વિવિધં જનનં તસ્ય પ્રેરણં ચેતિ તદ્દ્વયમ્ ॥ ૭.૨૩॥

જ્ઞાનવર્ગે ક્રિયાવર્ગે સ્થિતાઃ કે ભાસયન્તિ તમ્ ।
પ્રેરણાખ્યે ધારણેઽસ્મિન્શ્રેષ્ઠો દેવેષુ કો ભવેત્ ॥ ૭.૨૪॥

કાઠિન્યં ચ દ્રવોષ્ણત્વે ચલનં છિદ્રમિત્યમી ।
દૃશ્યન્તેંઽશાઃ પઞ્ચભૂતજન્યોઽતો દેહ ઇષ્યતે ॥ ૭.૨૫॥

વાક્પાણ્યાદિઃ ક્રિયાવર્ગઃ ક્રિયાં કુર્વન્ન ભાસયેત્ ।
જ્ઞાનવર્ગો મનશ્ચક્ષુરાદિકો ભાસયેદ્વપુઃ ॥ ૭.૨૬॥

પ્રેરણાખ્યાં ધારણાં તુ પ્રાણ એવ કરોતિ હિ ।
ભૂતેન્દ્રિયાભિમાનિન્યો દેવતા ગર્વમાપ્નુવન્ ॥ ૭.૨૭॥

વયં દેહમવષ્ટભ્ય પ્રેરયામો ગૃહાદિષુ ।
પ્રાણદેવોઽન્યદેવાનામેતં ગર્વં ન્યવારયત્ ॥ ૭.૨૮॥

યૂયં મા પ્રાપ્નુત ભ્રાન્તિમહમેવાત્ર પઞ્ચધા ।
પ્રાણાપાનાદિભિર્ભાગૈઃ ધારયામિ હ્યદો વપુઃ ॥ ૭.૨૯॥

તાનવિશ્વસતો દેવાન્વિશ્વાસયિતુમેષ તુ ।
દેહાન્નિર્ગતુમુદ્યુક્તો હ્યાસન્દેવાશ્ચ વિહ્વલાઃ ॥ ૭.૩૦॥

સ્થિતે સ્વરાજ્ઞિ તિષ્ઠન્તિ નિર્ગચ્છન્તિ ચ નિર્ગતે ।
મધુકૃન્મક્ષિકા દેવાશ્ચાસન્પ્રાણવશાસ્તથા ॥ ૭.૩૧॥

પ્રાણ સૂત્રં તેન બદ્ધાઃ સર્વે તત્તદ્વશા ઇમે ।
ઉત્ક્રાન્તિં વારયન્તસ્તે પ્રાણં તુષ્ટુવુરાદરાત્ ॥ ૭.૩૨॥

દેહોઽકિઞ્ચિત્કરઃ પ્રાણ એવ સંસારકારણમ્ ।
ભાર્ગવો નિશ્ચિકાયેત્થં પિપ્પલાદેન બોધિતઃ ॥ ૭.૩૩॥

ક્રમમુક્તિર્હેતુરસ્ય પ્રાણસ્ય ધ્યાનમિત્યસૌ ।
કૌશલ્યઃ પ્રાણવિષયાન્ષટ્પ્રશ્નાનકરોત્સ્ફુટમ્ ॥ ૭.૩૪॥

પ્રાણોઽયં કુત ઉત્પન્નઃ કથમેષ વપુર્વ્રજેત્ ।
સ્વરૂપં પ્રવિભજ્યૈષ કથં દેહેઽવતિષ્ઠતે ॥ ૭.૩૫॥

કેન વૃત્તિવિશેષેણ દેહાદુત્ક્રાન્તિમાપ્નુયાત્ ।
બાહ્યં જગત્કથં ધત્તે તસ્યાઽધ્યાત્મધૃતિઃ કથમ્ ॥ ૭.૩૬॥

ઉપાસ્તિશ્રદ્ધયા સર્વં વિશેષં પૃષ્ટવાનિતિ ।
તુષ્ટો ગુરુરુવાચૈષાં પ્રશ્નાનાનાં સ્પષ્ટમુત્તરમ્ ॥ ૭.૩૭॥

પરમાત્મન ઉત્પન્નઃ પ્રાણ આત્મા ત્વવિક્રિયઃ ।
અવિષ્કૃત્યૈવ દેહં સ્વં દેહચ્છાયા યથોદિતા ॥ ૭.૩૮॥

છાયાનૃતૈવ દૃષ્ટા ચેત્પ્રાણોઽપ્યાત્મનિ કલ્પિતઃ ।
યથા દર્પણદીપ્ત્યાદિર્માયોપાધિસ્તથાત્મનઃ ॥ ૭.૩૯॥

પૂર્વકલ્પે કૃતં કર્મ મનસા યત્તદેવ હિ ।
પ્રાણસ્ય સ્થૂલદેહેષુ સમાગમનકારણમ્ ॥ ૭.૪૦॥

ગ્રામેષ્વધિકૃતાન્ સમ્રાડ્ વિનિયુઙ્ક્તે યથા પૃથક્ ।
પ્રાણો વૃત્તીઃ સ્વકીયાસ્તાઃ વિનિયુઙ્ક્તે યથાયથમ્ ॥ ૭.૪૧॥

મલમૂત્રવિસર્ગાર્થમપાનં સ્થાપયેદધઃ ।
મુખનાસિકયોઃ કુર્વન્ સ્વયં શ્વાસમવસ્થિતઃ ॥ ૭.૪૨॥

સમાનઃ સ્થાપિતો મધ્યે ભુક્તમન્નં સમં નયેત્ ।
અન્નાપ્યાયનતો મૂર્ધચ્છિદ્રૈઃ સપ્તવિધોઽભવત્ ॥ ૭.૪૩॥

હૃત્પુણ્ડરીકે જીવાત્મા સ્થિતસ્તદ્બહુભિર્વૃતમ્ ।
નાડીભેદૈર્મૂલનાડી સઙ્ખ્યા ચૈકાધિકં શતમ્ ॥ ૭.૪૪॥

પ્રત્યેકં શતસઙ્ખ્યાઃ સ્યુઃ શાખા નાડ્યસ્તથા પુનઃ ।
દ્વાસપ્તતિસહસ્રાણિ પ્રતિશાખાઃ પ્રકીર્તિતાઃ ॥ ૭.૪૫॥

તાસુ સર્વાસ્વવસ્થાય વ્યાનોઽયં કુરુતે બલમ્ ।
કરોત્યુદાન ઉત્ક્રાન્તિં કણ્ઠસ્થો હ્યન્યજન્મને ॥ ૭.૪૬॥

વિભજ્ય પઞ્ચધાત્માનમેવં દેહે વ્યવસ્થિતઃ ।
ઉદાનવાયુનોત્ક્રાન્તિરુક્તા બહિરથોચ્યતે ॥ ૭.૪૭॥

આપો ભૂમિવિયદ્વાયુતેજસાં યેઽભિમાનિનઃ ।
દેવાસ્તદ્રૂપતઃ પ્રાણો ધત્તે બાહ્યમિદં જગત્ ॥ ૭.૪૮॥

પુનસ્તદ્દેવતારૂપઃ શારીરાશ્ચક્ષુરાદિકાન્ ।
પ્રાણાદીનનુગૃહ્ણાતીત્યાધ્યાત્મં ધારણં ભવેત્ ॥ ૭.૪૯॥

ખેરનુપ્રહુશ્ચક્ષુષ્યસ્તિ તદ્વત્પરેષ્વપિ ।
અપાનાદિષુ ભૂમ્યાદેરુપકારોઽસ્તિ શાસ્ત્રતઃ ॥ ૭.૫૦॥

તેજોદેવતયોદાનોઽનુગૃહીતો યતસ્તતઃ ।
શારીરૌષ્ણ્યે પ્રશાન્તેઽસ્માદ્દેહાદેહાન્તરં વ્રજેત્ ॥ ૭.૫૧॥

મનસ્યેકીભવત્યાદાવિન્દ્રિયાણિ તદાત્મનઃ ।
યં દેહં ભાવયેત્તત્ર યાતિ પ્રાણઃ સજીવકઃ ॥ ૭.૫૨॥

ષટ્સુ પ્રશ્નેષુ નિર્ણીતં પ્રાણં ધ્યાયતિ યઃ પુમાન્ ।
સોપાધિકબ્રહ્મવેદી સ ક્રમેણ વિમુચ્યતે ॥ ૭.૫૩॥

બ્રહ્મલોકાન્તસંસારોઽપરવિદ્યાફલં તતઃ ।
ગાર્ગ્યસ્તુ પરવિદ્યાર્થં પઞ્ચપ્રશ્નાનવોચત ॥ ૭.૫૪॥

કાનિ સ્વપન્તિ કાન્યત્ર જાગ્રતિ સ્વપ્નદૃક્ચ કઃ ।
સુપ્તૌ સુખં ભવેત્કસ્ય જગત્કસ્મિન્વિલીયતે ॥ ૭.૫૫॥

દશેન્દ્રિયાણિ બાહ્યાનિ સ્વપન્ત્યન્તર્ધિયા સહ ।
રશ્મયોઽસ્તં યથા યાન્તિ સન્ધ્યાયાં રવિણા સહ ॥ ૭.૫૬॥

શ્રવણાદિક્રિયા નૈવ સુપ્તત્વાદિતિ ગમ્યતે ।
તદાપિ જાગ્રતિ પ્રાણાઃ શ્વાસાદેરવિલોપનાત્ ॥ ૭.૫૭॥

જાઠરાગ્નિઃ પટુર્ભૂત્વા ભુઙ્ક્તે જરયતે તદા ।
પ્રાણાન્યાગાગ્નિરૂપેણ ધ્યાત્વા યાગફલં વ્રજેત્ ॥ ૭.૫૮॥

બાહ્માક્ષાણામુપરમે મનોઽનુપરતં યદા ।
જીવાત્મા તદુપાધિઃ સન્ સદા સ્વપ્નમવેક્ષતે ॥ ૭.૫૯॥

નાડીષુ સઞ્ચરન્ જીવો નાનાજન્મભિરર્જિતાઃ ।
વાસના વીક્ષતે સોઽયં સ્વપ્ન ઇત્યભિધીયતે ॥ ૭.૬૦॥

હૃચ્છિદ્રાણ્યાવૃતાનિ સ્યુઃ સુપ્તૌ પિત્તાખ્યતેજસા ।
ચિત્તોપાધિકજીવોઽપિ પિત્તેનાત્રાભિભૂયતે ॥ ૭.૬૧॥

દુઃખવૃત્ત્યુદયશ્ચિત્તે (વૃત્ત્યા) નાસ્તિ છિદ્રનિરોધતઃ ।

આત્માનન્દઃ સ્વપ્રકાશસ્તદા જીવસ્ય તિષ્ઠતિ ॥ ૭.૬૨॥

સુપ્તૌ ચ પ્રલયે મુક્તૌ જગદાત્મનિ લીયતે ।
નિવાસવૃક્ષે લીયન્તે સન્ધ્યાયાં પક્ષિણો યથા ॥ ૭.૬૩॥

તન્માત્રાણિ ચ ભૂતાનિ જ્ઞાનકર્મેદ્રિયાણ્યપિ ।
અન્તઃકરણભેદાશ્ચ શક્તી જ્ઞાનક્રિયાત્મિકે ॥ ૭.૬૪॥

એતેષાં વિષયાઃ સર્વે દ્રષ્ટૃશ્રોત્રાદિનામકઃ ।
જીવોઽન્તઃકરણસ્થોઽપિ જગત્સર્વમિદં ભવેત્ ॥ ૭.૬૫॥

ન કિઞ્ચિદ્ભાતિ નિદ્રાયાં લીનં સ્યાત્તદવેક્ષયા ।
સર્વેષાં પ્રલયે યદ્વન્મુક્તૌ તત્ત્વવિદસ્તથા ॥ ૭.૬૬॥

પરમાત્મા લયાધારો યથા તદ્વસ્થિતેરપિ ।
આધારસ્તેન જગતઃ પરમાત્મોપલક્ષ્યતામ્ ॥ ૭.૬૭॥

ઉપલક્ષયિતા જીવો બુદ્ધૌ ચિત્પ્રતિબિમ્બકઃ ।
ઉપલક્ષ્યં બ્રહ્મ તત્તુ સ્યાદચ્છાયાદિરૂપકમ્ ॥ ૭.૬૮॥

છાયા તમસ્તેન હીનં શરીરત્રયવર્જિતમ્ ।
લૌહિત્યાદિગુણૈર્હીનં શુભ્રં ક્રોધાદ્યભાવતઃ ॥ ૭.૬૯॥

અક્ષરં નાશહેતૂનામભાવાદ્બ્રહ્મ તાદૃશમ્ ।
યો જાનાતિ સ સર્વજ્ઞઃ સર્વાત્મા ચ ભવેત્ખલુ ॥ ૭.૭૦॥

સત્યકામસ્તુ પૂર્વોક્તબ્રહ્માનુભવસાધનમ્ ।
પ્રણવધ્યાનમપ્રાક્ષીત્ફલભેદેન સંયુતમ્ ॥ ૭.૭૧॥

લોકેષુ જ્ઞાનકર્મભ્યાં સાધ્યેષુ કતમં બ્રજેત્ ।
આમૃતિ પ્રણવધ્યાયી સવિશેષમિદં વદ ॥ ૭.૭૨॥

શ઼ૃણ્વોઙ્કારઃ પ્રતીકં સ્યાદપરસ્ય પરસ્ય ચ ।
બ્રહ્મણોઽન્યતરદ્બ્રહ્મ પ્રણવેન વિચિન્તયેત્ ॥ ૭.૭૩॥

વિરાડાદ્યપરં તદ્વત્સત્યજ્ઞાનાત્મકં પરમ્ ।
માત્રાત્રયવિભક્તં તદુપરં બ્રહ્મ ચિન્તયેત્ ॥ ૭.૭૪॥

વિરાઢકારઃ સૂત્રાત્મોકારો હ્યવ્યાકૃતં પુનઃ ।
મકાર ઇતિ વિજ્ઞેયો વિભાગોઽપરચિન્તને ॥ ૭.૭૫॥

સૂત્રવ્યાકૃતવિજ્ઞાનહીનો યદિ વિચિન્તયેત્ ।
વિરામાત્રં તમોઙ્કારં તદાપિ વ્યર્થતા ન હિ ॥ ૭.૭૬॥

ઋગાખ્યદેવાઃ સહસા ભૂર્લોકં પ્રાપયન્તિ તમ્ ।
પૂર્વવાસનયા યોગમભ્યસ્યત્યધિકં પુનઃ ॥ ૭.૭૭॥

વિરાટ્સૂત્રાત્મકં માત્રાદ્વયં ધ્યાત્વા તુ નીયતે ।
યજુર્વેદૈઃ સોમલોકં પુનરાવૃત્તિસંયુતમ્ ॥ ૭.૭૮॥

વિરાટ્સૂત્રાવ્યાકૃતાખ્યં ત્રિમાત્રં પ્રણવં સ્મરેત્ ।
સામવેદૈર્બ્રહ્મલોકં નીયતે મુક્તિકારણમ્ ॥ ૭.૭૯॥

સમસ્તજીવસઙ્ઘાખ્યઃ સૂત્રાત્મા યઃ પરોઽન્યતઃ ।
તસ્માદપિ પરં બ્રહ્મતત્ત્વં યત્તદવેક્ષતે ॥ ૭.૮૦॥

ક્રમમુક્તિર્ભવેદિત્થમપરબ્રહ્મચિન્તનાત્ ।
ઓઙ્કારેણ પરં બ્રહ્મ ધ્યાત્વેક્ષિત્વા ચ મુચ્યતે ॥ ૭.૮૧॥

શાન્તં જરામૃત્યુહીનમભયં બ્રહ્મ યત્પરમ્ ।
તચ્ચોઙ્કારેણ વિદ્વાન્યઃ સોઽન્વેતીતિ પૃથક્ શ્રુતમ્ ॥ ૭.૮૨॥

મુક્તૌ પ્રાપ્યં પરં બ્રહ્મ યત્તસ્ય પ્રત્યગાત્મતામ્ ।
બુભુત્સુઃ સન્ ભરદ્વાજઃ પુરુષં પ્રષ્ટુમિચ્છતિ ॥ ૭.૮૩॥

રાજપુત્રઃ ષોડશભિઃ કલાભિઃ પુરુષં યુતમ્ ।
અપૃચ્છન્માં ન વેદાહં વદૈતં પુરુષં મુને ॥ ૭.૮૪॥

શ ृણ્વસૌ પુરુષો દેહે હૃન્મધ્યે ભાસતે સદા ।
તસ્મિન્પ્રાણાદિનામાન્તા માયયોત્પાદિતાઃ કલાઃ ॥ ૭.૮૫॥

પ્રાણઃ શ્રદ્ધા ખાદિભૂતપઞ્ચકં ચેન્દ્રિયં મનઃ ।
અન્નં વીર્યં તપો મન્ત્રાઃ કર્મ લોકાશ્ચ નામ ચ ॥ ૭.૮૬॥

આરોપિતાઃ કલા યસ્મિન્ પૂર્ણોઽસૌ પુરુષસ્તતઃ ।
ઉપલબ્ધિસ્તથાપ્યસ્ય દેહમધ્યે પ્રશસ્યતે ॥ ૭.૮૭॥

ચિદ્રૂપતાઽત્ર વિસ્પષ્ટા દર્શનશ્રવણાદિભિઃ ।
અપૈતિ જીવતા દેહે સ્થિતે પૂર્ણત્વબોધનાત્ ॥ ૭.૮૮॥

જીવત્વાપાદકોપાધિઃ પ્રાણસ્તસ્માજ્જનૈઃ સદા ।
પ્રાણોત્ક્રાન્તિસ્થિતી સ્વાત્મન્યારોપ્યેતેમુમૂર્ષિભિઃ ॥ ૭.૮૯॥

કસ્મિન્નુત્ક્રાન્ત ઉત્ક્રાતિમાપ્સ્યામીતિ વિચારયન્ ।
પરમાત્માઽસૃજત્પ્રાણાન્ જનારોપોઽભવત્તતઃ ॥ ૭.૯૦ ॥

જીવત્વસ્યારોપિતસ્ય નિવૃત્ત્યર્થં ચિદાત્મનિ ।
દેહસ્થે પૂર્ણરૂપેણ પુરુષત્વં વિબુધ્યતામ્ ॥ ૭.૯૧ ॥

જગત્પ્રાણાદિનામાન્તં સર્વમસ્મિન્પ્રકલ્પિતમ્ ।
સર્વાધિષ્ઠાનરૂપત્વાત્ પૂર્ણત્વમુપપદ્યતે ॥ ૭.૯૨ ॥

નદીષ્વબ્ધિં પ્રવિષ્ટાસુ લીયેતે રૂપનામની ।
કલાઃ સ્વાત્મનિ બોધેન લીના સ્વાત્માઽબ્ધિવત્સ્થિતઃ ॥ ૭.૯૩ ॥

એષોઽકલોઽમૃતઃ પૂર્ણશ્ચિદાત્મા મુક્ત ઉચ્યતે ।
એવં બોધયિતું સર્વે વેદાન્તાઃ સમ્પ્રવર્તિતાઃ ॥ ૭.૯૪ ॥

કલાઃ પ્રતિષ્ઠિતા યસ્મિન્ રથનાભાવરા ઇવ ।
તં વેદ્યં પુરુષં સર્વે જાનીધ્વં મૃત્યુહાનયે ॥ ૭.૯૫ ॥

કાત્યાયનાદયઃ સર્વે શ‍ૃણુધ્વં મુનિપુઙ્ગવાઃ ।
એતાવદેવ બ્રહ્માહં વેદ્મિ નાતોઽધિકં ક્વચિત્ ॥ ૭.૯૬ ॥

મુનયોઽપ્યર્ચયન્તસ્તં પિપ્પલાદં વચોઽબ્રુવન્ ।
સંસારભયતોઽસ્માકં પાલનાત્ત્વં હિ નઃ પિતા ॥ ૭.૯૭ ॥

અવિદ્યાયાઃ પરં પારં યસ્તારયતિ તસ્ય તે ।
શુશ્રૂષામુચિતાં કર્તું ન શક્તાઃ પ્રણર્તિ વિના ॥ ૭.૯૮ ॥

ગુરુભ્યઃ પરમર્ષિભ્યો ભૂયો ભૂયો નમો નમઃ ।
ઇત્યેવં પિપ્પલાદસ્તાન્મુનીનનુગૃહીતવાન્ ॥ ૭.૯૯ ॥

વેદૈશ્ચતુર્ભિરુત્પન્ના વિદ્યેયં બ્રહ્મગોચરા ।
પ્રકાશિતાતઃ સન્તુષ્યાદ્વિદ્યાતીર્થમહેશ્વરઃ ॥ ૭.૧૦૦ ॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
પ્રશ્નોપનિષદ્વિવરણં નામ સપ્તમોઽધ્યાયઃ ॥ ૭ ॥

# ૮. કૌષીતકીશાખા વિવરણે ઇન્દ્રપ્રતર્દનસંવાદો નામ અષ્ટમોઽધ્યાયઃ ।

ઐતરેયે તૈત્તિરીયે છાન્દોગ્યેઽથર્વણે ચ યત્ ।
તત્ત્વં ચતુર્વેદવિદ્યાપ્રકાશે તત્સમીરિતમ્ ॥ ૮.૧॥

અનુભૂતિપ્રકાશેઽથ કૌષીતક્યાદિનામસુ ।
ચતુર્વેદાઙ્ગશાખાસુ યત્તત્ત્વં તદુદીર્યતે ॥ ૮.૨॥

ઋગ્વેદસ્થિતશાખા યા કૌષીતક્યભિધાઙ્કિતા ।
તસ્યાં પ્રતર્દનાયેન્દ્રઃ પ્રાહાત્માનુભવં સ્ફુટમ્ ॥ ૮.૩॥

મનુષ્યેભ્યો હિતતમં વરં વવ્રે પ્રતર્દનઃ ।
હિતં હિતતરં ચેન્દ્રો મેને હિતતમં ધિયા ॥ ૮.૪॥

હિતં સ્વર્ગસુખં મર્ત્યસુખાદપ્યધિકં ત્વતઃ ।
તદ્વૈરાગ્યં હિતતરં યાગાદ્યાયાસવર્જનાત્ ॥ ૮.૫॥

સ્વાત્મબોધો હિતતમો નિત્યાનન્દાનુભૂતિદઃ ।
ઇતિ મત્વેન્દ્ર આહેતં શિષ્યં જાનીહિ મામિતિ ॥ ૮.૬॥

સહસ્રાક્ષોઽહમિત્યુક્તેર્મદ્દેહ ઇતિ ચેરણાત્ ।
અસ્મચ્છબ્દો વપુસ્તસ્ય સ્વામિનં ચ બ્રવીત્યયમ્ ॥ ૮.૭॥

સહસ્રાક્ષવપુસ્તેન દૃષ્ટં સ્વામી તુ તદ્દૃશા ।
ન દ્રષ્ટું શક્યતે લિઙ્ગાત્પુરૈવાનુમતઃ ખલુ ॥ ૮.૮॥

સહસ્રાક્ષવપુઃ સ્વામિયુક્તં સ્યાદ્વ્યવહર્તૃતઃ ।
મચ્છરીરવદિત્યેવં બાલેનાપ્યવબુધ્યતે ॥ ૮.૯॥

અતો બુદ્ધિમતો બોદ્ધું યોગ્યોઽસ્મચ્છબ્દલક્ષિતઃ ।
વિવક્ષિતઃ કશ્ચિદર્થ ઇતિ શિષ્યેણ નિશ્ચિતમ્ ॥ ૮.૧૦॥

અલૌકિકાત્મા જ્ઞેયોઽસ્તુ તદ્વિજ્ઞાનેન કિં ફલમ્ ।
ઇતિ ચેદ્દુઃખસમ્બન્ધરાહિત્યં તત્ત્વધીફલમ્ ॥ ૮.૧૧॥

તસ્માદ્ધિતતમં જ્ઞાનં દુઃખાભાવોઽત્રવર્ણ્યતે ।
સહસ્રાક્ષે સ્થૂલદેહે દુઃખં રોગાદિજં ભવેત્ ॥ ૮.૧૨॥

સ્વામિન્યસ્મિન્સૂક્ષ્મદેહે પુણ્યપાપકૃતં ભયમ્ ।
ત્વાષ્ટ્રાદીનાં વધેઽપ્યાસીદ્ભયં નૈવ ચિદાત્મનઃ ॥ ૮.૧૩॥

ત્વષ્ટુઃ પુત્રો વિશ્વરૂપ આસીદ્દેવપુરોહિતઃ ।
સ્વામિદ્રોહં ચકારાસૌ તં ત્વાષ્ટ્રં હતવાનહમ્ ॥ ૮.૧૪॥

કર્તર્યભૂદ્બ્રહ્મહત્યા ન ત્વસઙ્ગે ચિદાત્મનિ ।
વેદાન્તજ્ઞાનહીનાનાં યતીનાં હનને તથા ॥ ૮.૧૫॥

લોકત્રયે બહુવિધાનસુરાન્ હૃતવાનહમ્ ।
ચિદાત્મનોઽપિ મે તત્ર નૈવ લોમાપિ હિંસ્યતે ॥ ૮.૧૬॥

માહાત્મ્યં મમ નૈતત્સ્યાત્કિન્તુ જ્ઞાનસ્ય તદ્ભવેત્ ।
અન્યોઽપિ માં ચિદાત્માનં વેત્તિ ચેત્તત્ફલં ભવેત્ ॥ ૮.૧૭॥

વાચા વા મનસા માતૃવધાદીન્ કુરુતે યદિ ।
તથાપિ જ્ઞાનિનો મોક્ષો ન હ્યેતૈર્વિનિવાર્યતે ॥ ૮.૧૮॥

પાપં કૃતવતોઽપ્યસ્ય મુખે હર્ષક્ષયો ન હિ ।
ન મુક્તિર્નશ્યતીત્યેવં શાસ્ત્રૈરસ્ય વિનિશ્ચયાત્ ॥ ૮.૧૯॥

નનુ મૂઢસ્યાપિ નાસ્તિ ચિન્માત્રે પાપલેપનમ્ ।
તતઃ કોઽતિશયસ્તત્ત્વવિદઃ સ્યાદિતિ ચેચ્છૃણુ ॥ ૮.૨૦॥

અહઙ્કર્તૃગતં પાપમજ્ઞાત્વારોપ્યતે ચિતિ ।
તેન ગ્લાનિર્મુખે ભાતિ જન્માપિ નરકે ભવેત્ ॥ ૮.૨૧॥

જ્ઞાનેન કર્મણસ્તસ્ય બીજભાવો વિનશ્યતિ ।
જન્મપ્રરોહો નૈવાસ્તીત્યેવં નિશ્ચિત્ય હૃષ્યતિ ॥ ૮.૨૨॥

દગ્ધબીજં યથા લોકે ન પ્રરોહક્ષમં તથા ।
જ્ઞાનાગ્નિદગ્ધ યત્કર્મ ન તજ્જન્મપ્રદં ભવેત્ ॥ ૮.૨૩॥

તર્હિ તત્ત્વવિદઃ શ્રેષ્ઠા મૂઢવન્નિયમેન તત્ ।
કુતઃ પાપં ત્યજન્તીતિ ચેદ્રહસ્યમિદં શ઼ૃણુ ॥ ૮.૨૪॥

યદ્યપ્યામુષ્મિકી હાનિર્નાસ્ત્યથાપ્યૈહિકી તુ સા ।
મહતી વિદ્યતે તેન પાપં યત્નેન વર્જયેત્ ॥ ૮.૨૫॥

શિષ્ટાસ્ત્યજન્તિ પાપિષ્ટં પ્રત્યક્ષો નરકઃ સ હિ ।
તન્નિન્દકસ્તસ્ય પાપં ગૃહીત્વા નરકં વ્રજેત્ ॥ ૮.૨૬॥

સ્તોતા કર્મી તુ સંસર્ગાત્સ્વયમપ્યાચરેત્તથા ।
ઇત્થં દોષત્રયં દૃષ્ટ્વા શિષ્ટાઃ પાપં ત્યજન્તિ હિ ॥ ૮.૨૭॥

કિં ચ પુણ્યરતઃ પૂર્વં જ્ઞાનમાપ્નોતિ નાન્યથા ।
પશ્ચાચ્ચ તદ્વાસનયા પુણ્યમેવ કરોત્યસૌ ॥ ૮.૨૮॥

કિં બહૂક્ત્યા તત્ત્વવિદો ન ભયં પારલૌકિકમ્ ।
ઉપદેશસહસ્રયાં ચ તથાચાર્યૈરુદીરિતમ્ ॥ ૮.૨૯॥

પરલોકભયં યસ્ય નાસ્તિ મૃત્યુભયં તથા ।
તસ્યાત્મજ્ઞસ્ય શોચ્યાઃ સ્યુઃ સબ્રહ્મેન્દ્રા અપીશ્વરાઃ ॥ ૮.૩૦॥

માં જાનીહીત્યેવમિન્દ્રઃ સ્વાત્મજ્ઞાને પ્રવર્ત્ય તમ્ ।
પ્રાણોઽસ્મીત્યાદિવાક્યેન તસ્મૈ તત્ત્વમવોચત ॥ ૮.૩૧॥

પ્રાણપ્રજ્ઞે ક્રિયાજ્ઞાનશક્તી દ્વે લિઙ્ગદેહગે ।
તદ્ધિષ્ઠાનરૂપત્વાત્તાભ્યામાત્મોપલક્ષિતઃ ॥ ૮.૩૨॥

પ્રજ્ઞાત્મા પ્રાણરૂપોઽસ્મીત્યેવં તસ્મા અવોચત ।
આનન્દોઽજર ઇત્યાદિ નિર્ણયસ્તસ્ય ઉચ્યતે ॥ ૮.૩૩॥

અત્રોપાયો નાસ્તિ કશ્ચિદુપાધિમુપલક્ષકમ્ ।
વિનાત્મવાચકઃ શબ્દો યસ્માન્ન કાપિ વીક્ષ્યતે ॥ ૮.૩૪॥

લોકે ગુણક્રિયાજાતિરૂઢયઃ શબ્દહેતવઃ ।
નાત્મન્યન્યતમોઽમીષાં તેનાત્મા નાભિધીયતે ॥ ૮.૩૫॥

ઉપાધિષ્વપિ સર્વેષુ સામીપ્યાત્પ્રત્યગાત્મનઃ ।
પ્રાણપ્રજ્ઞાદ્વયં યોગ્યમત્યન્તં તેન લક્ષ્યતે ॥ ૮.૩૬॥

પ્રાણશબ્દોઽભિધાવૃત્ત્યા વાયું ચેષ્ટકમાહ હિ ।
પ્રજ્ઞાશબ્દો જ્ઞાનહેતું બુદ્ધિં વક્તિ સ્વશક્તિતઃ ॥ ૮.૩૭॥

તદ્ભ્રાન્ત્યધિષ્ઠાનતયા તદ્ધેતુત્વોપચારતઃ ।
તાભ્યામાત્મા લક્ષ્યમાણો જ્ઞેયઃ શાખાગ્રચન્દ્રવત્ ॥ ૮.૩૮॥

દેહેન્દ્રિયાદયો ભાવા જ્ઞાનાદિવ્યાપૃતિક્ષમાઃ ।
યસ્ય સન્નિધિમાત્રેણ સોઽહમિત્યવધારય ॥ ૮.૩૯॥

અજડાત્મવદાભાન્તિ યત્સાન્નિધ્યાજ્જડા અપિ ।
દેહેન્દ્રિયમનઃ પ્રાણાઃ સોઽહમિત્યવધારય ॥ ૮.૪૦॥

ઉપાધિલક્ષિતં તત્ત્વં યદિ બોદ્ધું ન શક્નુયાઃ ।

તદ્ધ્યુપાધિદ્વયોપેતમુપાસ્વ ગુણસંયુતમ્ ॥ ૮.૪૧॥

આયુષ્યમમૃતત્વં ચ ગુણૌ પ્રાણસ્ય સમ્મતૌ ।
ઇહાયુઃ પ્રાણતઃ સ્વર્ગે ચામૃતત્વમિતિ સ્ફુટમ્ ॥ ૮.૪૨॥

સત્યસઙ્કલ્પતા પ્રજ્ઞાગુણધ્યાનાનુસારતઃ ।
ફલમાપ્નોતિ કામી ચેન્નિષ્કામસ્તત્ત્વમીક્ષતે ॥ ૮.૪૩॥

ઉપાસ્ત્યૈકાગ્ર્યમાવાથ તત્ત્વં વીક્ષિતુમાદિતઃ ।
પ્રજ્ઞાપ્રાણાવુપાધી તૌ વિવિચ્યેતાં યથાતથમ્ ॥ ૮.૪૪॥

શ્રોત્રં ત્વક્ચક્ષુષી જિહ્વા ઘ્રાણં ધીન્દ્રિયપઞ્ચકમ્ ।
વાક્પાણિપાદપાયૂપસ્થાઃ કર્મેન્દ્રિયપઞ્ચકમ્ ॥ ૮.૪૫॥

ઇન્દ્રિયાણાં પ્રવૃત્તિઃ સ્યાત્પ્રજ્ઞાલોચનપૂર્વિકા ।
પ્રાણવાયુપ્રેરિતા ચેત્યેવં લોકે વ્યવસ્થિતિઃ ॥ ૮.૪૬॥

તત્ર મૂઢાઃ કેચિદાહુર્યુગપઞ્ચક્ષુરાદયઃ ।
સર્વેઽપિ સ્વસ્વવિષયે પ્રવર્તન્ત ઇતીદૃશમ્ ॥ ૮.૪૭॥

તદસન્નિપુણોઽપ્યત્ર ન શક્તઃ સૂક્ષ્મમીક્ષિતુમ્ ।
કાલાલ્પત્વેન સઞ્છાદ્ય ક્રમં ધૂર્તો વિડમ્બયેત્ ॥ ૮.૪૮॥

પ્રજ્ઞાપ્રાણસહાયેન વિના નૈવેન્દ્રિયં ક્વચિત્ ।
પ્રવર્તતે સહાયસ્તુ ક્રમભાવીતિ નિશ્ચિતઃ ॥ ૮.૪૯॥

અન્યથા નિખિલં વેદ ધૂર્તો હ્યેકક્ષણે પઠેત્ ।
યા પ્રજ્ઞાપ્રાણયોર્વૃત્તિઃ સા સ્યાદ્વાગ્વૃત્તિવત્ક્રમાત્ ॥ ૮.૫૦॥

પ્રજ્ઞાપ્રાણાનુગ્રહેણ વાગ્યદાહ તદેતરે ।
ચક્ષુરાદ્યા ઉપરતાસ્તામનુબ્રુવતે ખલુ ॥ ૮.૫૧॥

સ્વવ્યાપારે પ્રવૃત્તાશ્ચેત્પ્રજ્ઞાપ્રાણાનુકર્ષણાત્ ।
વાચો વિઘ્નો ભવેદ્વિઘ્નવારણં હ્યનુવાદિતા ॥ ૮.૫૨॥

એવમન્યત્રાપિ યોજ્યમતઃ સર્વેઽપિ સંહતાઃ ।
એકૈકવિષયો હ્યુક્તો વ્યહારઃ ક્રમાદ્ભવેત્ ॥ ૮.૫૩॥

ક્રમભાવી વિચિત્રોઽયં વ્યવહારશ્ચિદાત્મના ।
યેનૈકેનેક્ષ્યતે સોઽયમન્યઃ સર્વેભ્ય ઇષ્યતામ્ ॥ ૮.૫૪॥

પ્રાણા વાગાદયઃ સર્વે કિં સમા ઉત વિદ્યતે ।
શ્રેષ્ઠસ્તેષ્વિતિ ચેત્પ્રાણઃ શ્રેષ્ઠો જીવનકૃત્વતઃ ॥ ૮.૫૫॥

તસ્માદુપેક્ષ્ય વાગાદીન્ પ્રાણોપાધિઃ સમાશ્રિતઃ ।
આત્મબોધાય કિઞ્ચાયં પ્રાણ ઉત્થાપયેદ્વપુઃ ॥ ૮.૫૬॥

નનુ સુપ્તાવયં પ્રાણો દેહં નોત્થાપયત્યમુમ્ ।
કિન્તુ જાગરણે તસ્માત્પ્રજ્ઞૈવાત્ર પ્રયોજિકા ॥ ૮.૫૭॥

ચતુર્ભિરુહ્યતે યત્તુ સર્વશક્ત્યા શરીરકમ્ ।
તૂલાયતે તદેવાહન્ધિયાદ્યાતમિતીક્ષ્યતે ॥ ૮.૫૮॥

સત્યમેવ તતઃ પ્રજ્ઞોપાધિઃ પ્રાણવદાશ્રિતઃ ।
પ્રજ્ઞાત્મા પ્રાણ એવૈકો મિલિત્વોપાધિરિષ્યતે ॥ ૮.૫૯॥

દ્વયોર્મૃતૌ જીવને ચ સહભાવાત્તદેકતા ।
ઉત્થાપકત્વાદુક્થં તદિત્યૈકાગ્ર્યાય ચિન્તયેત્ ॥ ૮.૬૦॥

ચિત્તૈકાગ્ર્યે ક્ષમા બુદ્ધિર્બોદ્ધું તત્સાક્ષિણં ભવેત્ ।
જગદ્ધેતુતયાઽપ્યેષ પ્રાણઃ સ્વાત્મોપલક્ષકઃ ॥ ૮.૬૧॥

એકાદશેન્દ્રિયાણ્યેષાં વિષયાશ્ચ જગત્ખલુ ।
સુપ્તૌ સર્વં જગલ્લીનં પ્રાણોપાધિક આત્મનિ ॥ ૮.૬૨॥

ઇન્દ્રિયાણ્યેવ લીયન્તે વિષયા નેતિ ચેન્ન તત્ ।
પ્રાતીતિકસ્ય જગતો માનાભાવો લયો મતઃ ॥ ૮.૬૩॥

પ્રાતીતિકત્વં વેદાન્તસિદ્ધાન્તે જગતઃ સ્ફુટમ્ ।
અતઃ સુપ્તૌ જગલ્લીનં પ્રબોધે જાયતે પુનઃ ॥ ૮.૬૪॥

પ્રાણપ્રતીતિરપ્યસ્ય સુપ્તૌ નાસ્તીતિ ચેત્તદા ।
પ્રાણોક્તિરન્યદૃષ્ટ્યૈવ પ્રાણેનાત્મોપલક્ષ્યતે ॥ ૮.૬૫॥

પ્રબોધે સ્વાત્મનોઽક્ષાણિ જાયન્તે વિસ્ફુલિઙ્ગવત્ ।
તેભ્યોઽભિમાનિદેવાઃ સ્યુર્દેવેભ્યો વિષયા ઇમે ॥ ૮.૬૬॥

દૃષ્ટિસૃષ્ટિમિમાં બ્રહ્માનુભવી બહુમન્યતે ।
સ્વપ્નબોધાત્સ્વસંસારો લીયતે સ્વપ્નવદ્યતઃ ॥ ૮.૬૭॥

ન્યાયેનાનેન મરણે, મૂર્ચ્છાદૌ ચોહ્યતાં છયઃ ।
લીનસ્ય પુનરુત્પત્તૌ વ્યવહારક્રમં શ◌ૃણુ ॥ ૮.૬૮॥

પ્રાણોપાધિકજીવાત્મા યદા વ્યવજિહીર્ષતિ ।
તદા વાક્સૃજતે શબ્દં જીવો વાચા બ્રવીતિ તમ્ ॥ ૮.૬૯॥

એવં સર્વત્ર વિજ્ઞેયં પ્રાણે સર્વાભિરીરિતા ।
પ્રજ્ઞા પ્રાણાદભિન્નાઽતસ્તસ્યાં સર્વાભિરુચ્યતે ॥ ૮.૭૦॥

વાક્ પ્રજ્ઞાયામેકમંશમભિમાનાખ્યમાશ્રિતા ।
પ્રજ્ઞાભિમાનવશતઃ શબ્દોચ્ચારણશક્તિયુક્ ॥ ૮.૭૧॥

શરીરગા ત્વગપ્યેવં શક્તાભૂત્સ્પર્શજે સુખે ।
રતૌ પ્રજાતાવાનન્દે ચોપસ્થઃ શક્તિમાનભૂત્ ॥ ૮.૭૨॥

ક્રીડા ચોત્પાદનં વીર્યમોક્ષશ્ચોક્તમિદં ત્રયમ્ ।
ધ્યેયે જ્ઞેયે ચ કામાદૌ ચિત્તં શતમભૂત્ખલુ ॥ ૮.૭૩॥

સર્વેન્દ્રિયેષુ પ્રજ્ઞાયા અભિમાનોઽવધાર્યતામ્ ।
અન્વયવ્યતિરેકાભ્યામુદાહાર્યોઽખિલેષ્વસૌ ॥ ૮.૭૪॥

પ્રજ્ઞયા વાચમારુહ્ય જીવો નામાભિવક્તિ ચ ।
અન્યચિત્તોઽભવં તેન નાવોચમિતિ ચોચ્યતે ॥ ૮.૭૫॥

વક્ષ્યામીત્યભિમાનોઽયં વાગારોહ ઇતીર્યતે ।
ધ્યાસ્યામીત્યભિમાનાત્તુ ચિત્તારોહસ્તથા ભવેત્ ॥ ૮.૭૬॥

અભિમાનોઽપિ ધીવૃત્તિઃ સાપિ પૂર્વં ભવેદથ ।
ધિયા ધ્યાનાદિરિત્યેકા ધીઃ ક્રમાત્કુરુતે દ્વયમ્ ॥ ૮.૭૭॥

યથા પ્રાણે જગત્સર્વં લયોત્પત્ત્યોરવસ્થિતમ્ ।
પ્રજ્ઞાયાં ચ તથા સર્વં સ્થિતિકાલે વ્યવસ્થિતમ્ ॥ ૮.૭૮॥

પ્રજ્ઞાપ્રાણૌ તતો મુખ્યોપાધી સ્વાત્માવબોધને ।
તદ્દ્વારેણાવબોદ્ધવ્યો જીવાત્માદૌ વિવેકિના ॥ ૮.૭૯॥

વાચા નામાભિવદનં યત્તત્સ્યાત્કર્તૃપૂર્વકમ્ ।
ક્રિયાત્વાત્કૃષિવત્કર્તા ચાહમિત્યનુભૂયતે ॥ ૮.૮૦॥

શબ્દાદિવિષયેઽહન્ધીઃ કેનાપિ ન હિ શક્યતે ।
દેહેન્દ્રિયેષ્વપિ તથા મદીયત્વાવભાસનાત્ ॥ ૮.૮૧॥

આનખાગ્રમહઙ્કારો વપુર્વ્યાપ્યાવતિષ્ઠતે ।

ચિદ્બિંબપ્રતિબિમ્બાભ્યાં વ્યામોઽસૌ કર્તૃતાં વ્રજેત્ ॥ ૮.૮૨॥

ક્રિયાવાંશ્ચેતનઃ કર્તાહઙ્કારસ્તાદૃશસ્તતઃ ।
કર્તા ભૂત્વાખિલૈરક્ષૈર્વ્યાપારાન્ કુરુતેઽખિલાન્ ॥ ૮.૮૩॥

જીવાત્માનં વિવિચ્યેત્થં ચેતનં પ્રાણધારિણમ્ ।
વિવિચ્યાત્પરમાત્માનમાનન્દં શુદ્ધચેતનમ્ ॥ ૮.૮૪॥

પ્રતિબિમ્બાહઙ્કૃતિભ્યાં બિમ્બં નિષ્કૃષ્ય સાક્ષિણમ્ ।
બ્રહ્મેતિ વિદ્યાત્સર્વસ્ય તસ્મિન્નારોપિતત્વતઃ ॥ ૮.૮૫॥

પ્રજ્ઞામાત્રા ભૂતમાત્રા ગ્રાહ્યગ્રાહકરૂપતઃ ।
સંસારં નિર્વહત્યસ્મિન્નાત્મતત્ત્વે પ્રકલ્પિતાઃ ॥ ૮.૮૬॥

ચક્રસ્યારેષ્વાશ્રિતા સ્યાન્નેમિનાભાવરાસ્તથા ।
અક્ષેષુ વિષયાસ્તાનિ ચાત્મનિ પ્રાણલક્ષિતે ॥ ૮.૮૭॥

ચેષ્ટા કલ્પનહેતુત્વાત્પ્રાણો ધીકલ્પનસ્ય ચ ।
હેતુત્વેન ભવેત્પ્રજ્ઞા તતસ્ત્વાનન્દ એવ હિ ॥ ૮.૮૮॥

પરપ્રેમાસ્પદતયા સર્વેષાં યો વિભાત્યસૌ ।
નિત્યાનન્દઃ પરાત્મા સ્યાજ્જરામરણવર્જનાત્ ॥ ૮.૮૯॥

ન પુણ્યેન ભવેદ્દેવો ન પાપેન પશુર્ભવેત્ ।
ચિચ્છાયાવાનહઙ્કાર એવ સ્યાત્પુણ્યપાપવાન્ ॥ ૮.૯૦॥

તદીયે પુણ્યપાપે દ્વે દેહસ્થે ચ જરામૃતી ।
સ્વાત્મન્યારોપયેન્મૂઢસ્તતો દેવાદિજન્મભાક્ ॥ ૮.૯૧॥

આરોપે બાધિતે બોધાત્કર્મ સ્યાદ્દગ્ધબીજવત્ ।
તતો જન્માઙ્કુરો નાસ્તિ નિર્લેપે પરમાત્મનિ ॥ ૮.૯૨॥

કાર્યોપાધેરભાવેઽપિ કારણોપાધિમત્ત્વતઃ ।
કર્માસ્યાસ્ત્વિતિ ચેદીશઃ કર્માધ્યક્ષો ન કર્મકૃત્ ॥ ૮.૯૩॥

કારયિત્ત્વા પુણ્યમેવ કર્તારં સ્વર્ગમાપયેત્ ।
પાપં તુ કારયિત્વા તં નરકં પ્રાપયેદસૌ ॥ ૮.૯૪॥

પર્જન્યવત્પ્રેરકત્વાન્નાસ્ય વૈષમ્યમાપતેત્ ।
શાલ્યાદીન્ બહુધા વૃષ્ટિર્વર્ધયેદ્વિષમાપિ નો ॥ ૮.૯૫॥

ઉત્તમાધમભાવોઽત્ર તત્તદ્બીજેન કારિતઃ ।
તારતમ્યં ચ જીવેષુ સ્વસ્વવાસનયા કૃતમ્ ॥ ૮.૯૬॥

માતૃવત્પાલયેલ્લોકં શિક્ષયેત્પિતૃવત્પ્રભુઃ ।
સ્વામી સ્યાદ્રાજવત્સોઽયં મમાત્મેત્યવગમ્યતામ્ ॥ ૮.૯૭॥

માયોપાધૌ સ્થિતે તસ્ય મિથ્યાત્વં બુદ્ધ્યતે તતઃ ।
સંસારી જીવવન્નેશઃ સ્વાનન્દૈકરસો હ્યયમ્ ॥ ૮.૯૮॥

અખણ્ડૈકરસાનન્દો મુક્તોઽયં સ્વાત્મદૃષ્ટિતઃ ।
સંસારિદૃષ્ટ્યા સર્વેશ ઇતિ વિદ્ધિ પ્રતર્દન ॥ ૮.૯૯॥

ઇન્દ્રાનુગ્રહતઃ સોઽભૂત્કૃતકૃત્યઃ પ્રતર્દનઃ ।
એતદ્વ્યાખ્યાનતસ્તુષ્યાદ્વિદ્યાતીર્થમહેશ્વરઃ ॥ ૮.૧૦૦॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
કૌષીતકીશાખા વિવરણે ઇન્દ્રપ્રતર્દનસંવાદો નામ અષ્ટમોઽધ્યાયઃ ॥ ૮॥

## ૯. કૌષીતકીશાખોપનિષદ્વિવરણો નામ નવમોઽધ્યાયઃ ।

રાજા બાલાકયે પ્રાહ વિપ્રાય બ્રહ્મવેદનમ્ ।
કૌષીતક્યાખ્યાશાખાયામત્ર સ્પષ્ટીકરોમિ તત્ ॥ ૯.૧॥

દૃપ્તો બાલાકિરપરબ્રહ્મવિત્સ કદાચન ।
અજાતશત્રું કાશીશં બુબોધયિષુરાગતઃ ॥ ૯.૨॥

અજાતશત્રુર્બ્રહ્માત્મવેદનાચ્છૌર્યતોઽપિ ચ ।
અન્તર્બહિશ્ચ નિઃશત્રુઃ કાશ્યાં રાજા બભૂવ સઃ ॥ ૯.૩॥

ગર્ગગોત્રજવિપ્રોઽયં બાલાકિર્નૈવ તત્ત્વવિત્ ।
કિન્તુ પ્રાણોપાસકોઽયં દર્પેણ મહતાવૃતઃ ॥ ૯.૪॥

રાજન્ બુભુત્સવે તુભ્યં પરં બ્રહ્મ બ્રુવાણ્યહમ્ ।
ઇત્યુક્ત્વાદિત્યપુરુષં બ્રહ્મોપાસ્વેત્યવોચત ॥ ૯.૫॥

રાજા નિવાર્ય તં પ્રાહ ફલં ધ્યેયગુણાનપિ ।
એવં પઞ્ચદશ બ્રહ્માણ્યપ્યત્રાસાવવોચત ॥ ૯.૬॥

ચન્દ્રે વિદ્યુતિ મેઘે ખે વાયાવગ્નૌ જલેઽપિ ચ ।
આદર્શે શ્રવણે ગન્તૃશબ્દે છાયાકૃતાવપિ ॥ ૯.૭॥

દેહે સ્વપ્ને દક્ષિણેઽક્ષિણ્યપિ વામેઽબ્રવીત્ક્રમાત્ ।
સર્વત્ર રાજ્ઞા પ્રત્યુક્તો વિપ્રસ્તૂષ્ણીમવસ્થિતઃ ॥ ૯.૮॥

અજાતશત્રૂ રાજા તં પરબ્રહ્મવિદુક્તવાન્ ।
પરં બ્રહ્મ વદિષ્યામીત્યુક્તિસ્તવ મૃષા ભવેત્ ॥ ૯.૯॥

જગતઃ પુરુષાણાં ચ કર્તૃ બ્રહ્મેતિ બુદ્ધ્યતામ્ ।
બાલાકિઃ પરવિદ્યાર્થં રાજાનમુપસન્નવાન્ ॥ ૯.૧૦॥

રાજા નાઙ્ગીચકારૈતત્સ્વજાતેરધમત્વતઃ ।
ગુરુત્વં નાસ્તિ મે તુભ્યં બ્રહ્મ વિજ્ઞાપયામ્યહમ્ ॥ ૯.૧૧॥

ઇત્યુક્ત્વા પાણિના વિપ્રમાદાયાન્તઃપુરં ગતઃ ।
સૂત્રાત્મૈવ પરં બ્રહ્મ પ્રાણો જીવ ઇતીદૃશઃ ॥ ૯.૧૨॥

બાલાકેનિશ્ચયસ્તસ્ય વ્યાવૃત્ત્યૈ સુપ્તમાગતૌ (સ્પષ્ટમાહતમ્) ।
સુષુપ્તે પુરુષે પ્રાણો ન લીનચક્ષુરાદિવત્ ॥ ૯.૧૩॥

જીવશ્ચેત્પ્રતિબુદ્ધ્યેત સમાહૂતઃ સ્વનામભિઃ ।
ઇતિ મત્વાહ્વયત્પ્રાણં શાસ્ત્રીયૈસ્તસ્ય નામભિઃ ॥ ૯.૧૪॥

નોત્તસ્થૌ સ પુમાન્ કિન્તુ શિષ્ય એવાત્ર પૂર્વવત્ ।
યષ્ટ્યાસૌ તાડિતઃ સુપ્તઃ સમુત્તસ્થૌ ત્વરાન્વિતઃ ॥ ૯.૧૫॥

યથા ભસ્માવૃતો વહ્નિર્વાયુના જ્વાલ્યતે તથા ।
પ્રાણો નાત્મા બોધહીનો ઘટવદ્યસ્તુ બુદ્ધ્યતે ॥ ૯.૧૬॥

ઇન્દ્રિયૈઃ સહિતો ભોક્તા જીવોઽસૌ ચેતનત્વતઃ ।
દ્વા સુપર્ણેતિ મન્ત્રેણ ચેતનૌ દ્વાવુદીરિતૌ ॥ ૯.૧૭॥

તયોરન્યતરો ભોક્તાઽનશ્નન્નન્યઃ પ્રકાશતે ।
ચિચ્છાયાવાનહઙ્કારો વ્યાપ્તો જાગરણે પુમાન્ ॥ ૯.૧૮॥

ઇન્દ્રિયૈર્વિષયાન્ ભુઙ્ક્તે તં ભોક્તારમબુધ્યત ।
પ્રાણાત્મવેદ્યસૌ ભોક્તૃબોધેનૈવાતિવિસ્મિતઃ ॥ ૯.૧૯॥

બુદ્ધં બ્રહ્મેતિ સન્તુષ્ટો નાન્યત્પ્રષ્ટુમપૈક્ષત ।
જ્ઞાપયિષ્યેઽહમિત્યેવં રાજ્ઞા તસ્મૈ પ્રતિશ્રુતમ્ ॥ ૯.૨૦॥

શિષ્ટિં બોધયિતું તસ્માત્સ્વયં પ્રશ્નાંશ્ચકાર સઃ ।

મન્દધીરપિ યઃ શ્રોતા શ્રદ્ધાલુર્વિનયાન્વિતઃ ॥ ૯.૨૧॥

અપૃષ્ટેનાપિ વક્તવ્યા તસ્મૈ વિદ્યેતિ શાસ્ત્રધીઃ ।
યો ભોક્તાઽત્રોત્થિતઃ સોઽયં ક્વાઽશયિષ્ટ પુરા ક વા ॥ ૯.૨૨॥

અભૂદ્ધીરહિતા સુપ્તિઃ કુતો વાઽગાદયં પુમાન્ ।
બાલાકિના અવિજ્ઞાતમિદં સર્વમિતિ સ્વયમ્ ॥ ૯.૨૩॥

નિશ્ચિત્ય ત્રિતયસ્યાસ્ય નિર્ણયં સ્પષ્ટમબ્રવીત્ ।
હૃદયં કમલાકારં દેહમધ્યેઽસ્ત્યધોમુખમ્ ॥ ૯.૨૪॥

નાડ્યસ્તસ્માદ્વિનિર્ગત્ય વ્યાપ્નુવન્ત્યખિલં વપુઃ ।
અહઙ્કારોપાધિરાત્મા જીવો ભૂત્વા હૃદિ સ્થિતઃ ॥ ૯.૨૫॥

નાડીભિઃ પ્રસૃતઃ સોઽક્ષૈર્જાનન્ જાગરણે સ્થિતઃ ।
બાહ્યભોગપ્રદં કર્મ યદા ક્ષીણં તદા પુનઃ ॥ ૯.૨૬॥

વાસનાભોગદે કર્મણ્યુદ્બુદ્ધે સ્વપ્નભાગ્ભવેત્ ।
સ્વપ્નનાડીષ્વવેક્ષ્યાથ કર્મણોઽસ્યાપિ સઙ્ક્ષયાત્ ॥ ૯.૨૭॥

હૃદિ સઙ્કોચમાપ્નોતિ સા સુષુપ્તિરિતીર્યતે ।
નાડીમૂલાનિ હૃત્પદ્મે પુરીતદ્વેષ્ટિતેઽવસન્ ॥ ૯.૨૮॥

યાનિ તેષુ પ્રવિશ્યાન્તર્લીયતે પરમાત્મનિ ।
પરમાત્મા સ્વતઃ પૂર્ણઃ સચ્ચિદાનન્દલક્ષણઃ ॥ ૯.૨૯॥

સોઽહઙ્કારપરિચ્છિન્નો જીવત્વારોપવાન્ ભવેત્ ।
અજ્ઞાનકાર્યોઽહઙ્કારોઽવસ્થિતઃ ફલભુક્તયે ॥ ૯.૩૦॥

ફલદે કર્મણિ ક્ષીણે લીયતેઽસૌ સ્વકારણે ।
પૂર્ણૈનૈક્યમવાપ્નોતિ પરિચ્છિન્નો યથા ઘટે ॥ ૯.૩૧॥

નષ્ટે ઘટાકાશ ઐક્યં વિયતા મહતા બ્રજેત્ ।
યદા ન કઞ્ચન સ્વપ્નં પશ્યેત્સુપ્તસ્તદાઽખિલમ્ ॥ ૯.૩૨॥

વિષયેન્દ્રિયજાતં યત્તત્પ્રાણે પ્રવિલીયતે ।
પ્રાણશબ્દો વાયુમાહ પરમાત્માનમપ્યસૌ ॥ ૯.૩૩॥

પ્રકૃષ્ટચેષ્ટાહેતુત્વમુભયત્રાપિ વિદ્યતે ।
વાયૌ શ્વાસક્રિયાઃ સર્વાઃ સૃષ્ટિસ્તુ પરમાત્મનિ ॥ ૯.૩૪॥

દૃષ્ટિભેદાદ્દ્વયોશ્ચાક્ષલયો વક્તું હિ શક્યતે ।
સુપ્તસ્યાક્ષલયઃ પ્રાણવાયાવિતિ તટસ્થધીઃ ॥ ૯.૩૫॥

અદ્વૈતે દ્વૈતવિલયં મન્યતે સુપ્ત ઉત્થિતઃ ।
સુપ્તાભિપ્રાયમાશ્રિત્ય પરાત્મનિ જગલ્લયઃ ॥ ૯.૩૬॥

શ્રુત્યુક્તસ્તેન પૂર્વોક્તપ્રશ્નયોરુત્તરં ભવેત્ ।
કૈષોઽશયિષ્ટ કુત્રેયં સુપ્તિસ્તત્રોત્તરં ક્રમાત્ ॥ ૯.૩૭॥

પરામાત્મન્યશયિષ્ટાઽભૂદજ્ઞાને સુપ્તિરિત્યદઃ ।
પરિચ્છિન્નસ્ય પૂર્ણાત્મતાદાત્મ્યં શયનં ભવેત્ ॥ ૯.૩૮॥

સાહઙ્કારસ્ય જગતો વિલયઃ સુપ્તિરુચ્યતે ।
કુત આગાદિતિ પ્રશ્નસ્યોત્તરં દૃશ્યતામિદમ્ ॥ ૯.૩૯॥

અજ્ઞાનેનાવૃતાત્પૂર્ણાદાગચ્છતિ પરાત્મનઃ ।
યદા પ્રબુદ્ધ્યતે સુપ્તસ્તદાગ્નેર્વિસ્ફુલિઙ્ગવત્ ॥ ૯.૪૦॥

પ્રાણા યથાયથં તસ્માજ્જાયન્તે પરમાત્મનઃ ।
પ્રાણાભિમાનિદેવાનામગ્ન્યાદીનાં જનિસ્તતઃ ॥ ૯.૪૧॥

લોક્યન્તે વિષયા અક્ષૈસ્તે દેવેભ્યઃ સમુદ્ગતાઃ ।
સર્વસાધારણઃ સર્ગ એકઃ પ્રાતિસ્વિકોઽપરઃ ॥ ૯.૪૨॥

આકાશાદિક્રમાદાદ્યઃ પ્રાણાદિક્રમતોઽપરઃ ।
સર્વેષાં પ્રાણિનાં કર્મક્ષયે સ્યાત્પ્રલયો મહાન્ ॥ ૯.૪૩॥

પુનઃ કર્મોદ્ભવે તેષાં સ્યાન્મહાસૃષ્ટિરીશ્વરાત્ ।
એકસ્ય કર્મણિ ક્ષીણે પ્રલયઃ સુપ્તિનામભૃત્ ॥ ૯.૪૪॥

પુનઃ કર્મોદ્ભવે તસ્ય સૃષ્ટિઃ સ્યાજ્જાગરાભિધા ।
અદ્વૈતતત્ત્વબોધાય સૃષ્ટિઃ સર્વત્ર કથ્યતે ॥ ૯.૪૫॥

અલ્પા સા મહતી વાસ્તુ સદદ્વૈતં વિબુદ્ધ્યતે ।
પ્રૌઢસ્ય રાજગેહસ્ય દ્વારં સ્યાત્પુરતો મહત્ ॥ ૯.૪૬॥

પૃષ્ઠતોન્તઃપુરદ્વારં ચોરદ્વારાખ્યમલ્પકમ્ ।
મહાદ્વારેણ સહસા દુર્લભં રાજદર્શનમ્ ॥ ૯.૪૭॥

જનસમ્મર્દબાહુલ્યાદ્દ્વારાણાં ચ બહુત્વતઃ ।
અલ્પદ્વારે સ્વામિભક્તો હઠાદ્રાજાનમીક્ષતે ॥ ૯.૪૮॥

દૃષ્ટિસૃષ્ટ્યાનુભૂત્યર્થી વેત્ત્યાત્માનં તથા હઠાત્ ।
મહાસૃષ્ટ્યા તત્પદાર્થમાદૌ જ્ઞાત્વા તથા પુનઃ ॥ ૯.૪૯ ॥

ત્વમ્પદાર્થં શોધયિત્વા વાક્યાદ્બોધો વિલમ્બતે ।
તસ્માદિહાજાતશત્રુર્બાલાકેરવિલમ્બતઃ ॥ ૯.૫૦ ॥

પ્રત્યગ્બ્રહ્મત્વબોધાર્થં દૃષ્ટિસૃષ્ટિમવોચત ।
સુપ્તાવાસીદ્યદજ્ઞાનમહઙ્કારલયોઽત્ર હિ ॥ ૯.૫૧ ॥

સોઽહઙ્કારઃ કર્મભોગકાલે સ્યાત્પુનરુદ્ગતઃ ।
તેનાવચ્છિન્ન આત્માપિ કર્તા ભોક્તાપિ પૂર્વવત્ ॥ ૯.૫૨ ॥

ભોક્તુરાત્મન ઉત્પન્નં ભોગસાધનમિન્દ્રિયમ્ ।
ઇન્દ્રિયપ્રેરકો દેવાનુગ્રહસ્તત ઉદ્ગતઃ ॥ ૯.૫૩ ॥

અક્ષેભ્યોઽનુગૃહીતેભ્યો લોકા ભાન્તિ સમુદ્ગતાઃ ।
સેયં પ્રાતીતિકી સૃષ્ટિસ્તસ્માજ્જાતા તતઃ સ્વયમ્ ॥ ૯.૫૪ ॥

જગત્કર્તા પરાત્મેતિ ક્ષણાદ્બાલોઽપિ બુધ્યતે ।
ઈશ્વરો મહિમોપેતઃ સોઽપ્યન્ય ઇતિ વાસના ॥ ૯.૫૫ ॥

ધીમતાં ચિરમારૂઢા વિયદાદિક્રમસ્તતઃ ।
કિં બહૂક્ત્યાઽસ્તુ યા કાચિત્સૃષ્ટિઃ સા માયિકી તેતઃ ॥ ૯.૫૬ ॥

અદ્વિતીયાનન્દ આત્મા સુષુપ્તાવનુભૂયતે ।
અહઙ્કારો માયિકો યસ્તદવચ્છિન્નચેતનઃ ॥ ૯.૫૭ ॥

આત્મા જાગરણે કૃત્સ્નમાનખં વ્યાપ્નુયાદ્વપુઃ ।
ગૂઢોઽગ્નિરરણૌ વ્યાપી તથા સુપ્તૌ ચિતિર્વપુઃ ॥ ૯.૫૮ ॥

વ્યાપ્નોત્યવિદ્યયા ગૂઢા જાગરે ક્ષુરવત્સ્થિતા ।
નાપિતસ્ય ક્ષુરાઃ પાત્રે સ્પષ્ટા ભાન્તિ પૃથક્સ્થિતાઃ ॥ ૯.૫૯ ॥

ચક્ષુરાદિષુ ચિલ્લેશાઃ સ્પષ્ટા ભાન્તિ પૃથક્તથા ।
સર્વેઽપિ કરણાત્માનઃ કર્ત્રાત્માનમિમં સદા ॥ ૯.૬૦ ॥

અનુસૃત્યૈવ તિષ્ઠતિ શ્રેષ્ઠિનં સ્વજના ઇવ ।
પુત્રમિત્રાદિભિઃ સ્વીયૈઃ સાર્ધં શ્રેષ્ઠી ધની સદા ॥ ૯.૬૧ ॥

ભુઙ્ક્તે તેઽપિ તદિષ્ટાર્થં કુર્વન્તો ભોજયન્તિ તેમ્ ।

એવં જીવઃ સ્વકીયાક્ષૈઃ સાર્ધં શબ્દાદિકાન્ સદા ॥ ૯.૬૨॥

ભુઙ્ક્તેઽક્ષાણિ ચ શબ્દાદીન્ગૃહ્ણન્તિ સ્વામિતુષ્ટયે ।
યત્ર તિષ્ઠતિ ભોક્તાસૌ સુપ્તૌ જાગરણે પુનઃ ॥ ૯.૬૩॥

યસ્માદુદેતિ સોઽદ્વૈતઃ પરમાત્મેતિ બુદ્ધ્યતામ્ ।
ઇત્થમદ્વૈતબોધાર્થમહઙ્કારે પરેશ્વરઃ ॥ ૯.૬૪॥

સ્પષ્ટચિત્પ્રતિબિમ્બોઽભૂદિતિ શ્રુત્યન્તરે શ્રુતમ્ ।
યાવદદ્વૈતમાત્માનમિન્દ્રો નૈવ વિજજ્ઞિવાન્ ॥ ૯.૬૫॥

અસુરા બહિરન્તસ્થાસ્તાવદભ્યભવન્નિમમ્ ।
બહિષ્ઠા અસુરાઃ સ્વર્ગે સ્થિતમેનં બબાધિરે ॥ ૯.૬૬॥

આન્તરા અસુરાશ્ચિત્તે કામાદ્યા દુઃખદાયિનઃ ।
યદા વિજજ્ઞાવાત્માનમસુરાનખિલાંસ્તદા ॥ ૯.૬૭॥

હત્વા જયેન દેવાનાં શ્રૈષ્ઠ્યં સ્વારાજ્યમાપ્તવાન્ ।
અજાતશત્રુતામેતિ જાતબ્રહ્માત્મબોધતઃ ॥ ૯.૬૮॥

અન્તર્બહિર્વા કઃ શત્રુર્મમ સર્વાત્મદર્શિનઃ ।
બ્રહ્માદ્યાઃ સ્થાવરાન્તા યે પ્રાણિનો મમ તે વપુઃ ॥ ૯.૬૯॥

કામક્રોધાદયો દોષા જાયેરન્મે કુતોઽન્યતઃ ।
અસુરાણાં સ્વાત્મતાપ્તાવસુરત્વં હતં ભવેત્ ॥ ૯.૭૦॥

અયમેવ જયસ્તસ્ય દેવેભ્યઃ શ્રેષ્ઠતા તતઃ ।
અદ્વૈતમપરાધીનં સ્વરાટ્ સ્યાત્તે ન તત્ત્વવિત્ ॥ ૯.૭૧॥

આત્માનં બોધયિત્વૈષામધિપોઽધિકપાલનાત્ ।
નૈતદિન્દ્રસ્ય માહાત્મ્યં કિન્તુ જ્ઞાનસ્ય તત્ત્વતઃ ॥ ૯.૭૨॥

અન્યોઽપ્યદ્વૈતમાત્માનં વેત્તિ ચેદિન્દ્રવદ્ભવેત્ ।
અજાતશત્રુર્બાલાકિં વિપ્રમિત્થમવોધયત્ ॥ ૯.૭૩॥

તથૈવોત્તમતાગર્વં ત્યક્ત્વા નાનીત બુદ્ધિમાન્ ।
વિદ્વાનપ્યુપસન્નાય દદ્યાદ્વિદ્યાં મહાદરાત્ ॥ ૯.૭૪॥

દેયાત્તાભ્યાં સ્વભાવં તં વિદ્યાતીર્થમહેશ્વરઃ ॥ ૯.૭૫॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે

કૌષીતકીશાખોપનિષદ્વિવરણો નામ નવમોઽધ્યાયઃ ॥ ૯॥

## ૧૦. મૈત્રાયણીયશાખાવિવરણો નામ દશમોઽધ્યાયઃ ।

મૈત્રાયણીયનામ્ની યા શાખા સા યાજુષી મતા ।
તસ્યાં શાકાયન્ય મુનિર્બોધયામાસ ભૂપતિમ્ ॥ ૧૦.૧॥

બૃહદ્રથઃ સ્વસ્ય રાજ્યે પુત્રં સંસ્થાપ્ય નિર્ગતઃ ।
વને મહત્તપસ્તપ્ત્વા વિદ્યાર્થં મુનિમાયયૌ ॥ ૧૦.૨॥

અશાશ્વતં શરીરં મે કદા યાયાત્તતઃ પુરા ।
જ્ઞાસ્યામ્યાત્માનમાત્મજ્ઞો મુનિર્માં બોધયિષ્યતિ ॥ ૧૦.૩॥

ઇત્યભિપ્રેત્ય સાષ્ટાઙ્ગં પ્રણિપત્ય ભુવિ સ્થિતઃ ।
વૃણીષ્વ વરમિત્યુક્તો વૃતવાનાત્મવેદનમ્ ॥ ૧૦.૪॥

રાજ્ઞાં ભોગપ્રધાનાનામાત્મજ્ઞાનં સુદુઃશકમ્ ।
વૃણીષ્વ કામાનિત્યુક્તઃ સ મુનેઃ પાદમગ્રહીત્ ॥ ૧૦.૫॥

પાદં સ્વમૂર્ધ્ન્યવસ્થાપ્ય સ્વવૈરાગ્યં પ્રકાશયન્ ।
આધારે કરણે દોષાનવોચદ્ભોક્તૃભોગ્યયોઃ ॥ ૧૦.૬॥

ભોગાધિકરણં દેહસ્તસ્ય દોષા ઇતિ સ્ફુટાઃ ।
અસ્થિચર્મસ્નાયુમજ્જામાંસશુક્રાદયોઽખિલાઃ ॥ ૧૦.૭॥

બીભત્સાકારણાન્યેષુ મજ્જતા ભુજ્યતે કથમ્ ।
વિટ્પૂર્ણખાતે મગ્નઃ સન્ ભુઙ્ક્તે કોઽપિ ન બુદ્ધિમાન્ ॥ ૧૦.૮॥

પુરા ત્વવિદ્યયાચ્છન્નદોષોઽહં ભુક્તવાંસ્તતઃ ।
બાલોઽપિ મૂઢો યત્કિઞ્ચિદદ્યાદ્વિષ્ટાદિકં તથા ॥ ૧૦.૯॥

ભોગાધિકરણે દોષા આસતાં ભોગસાધને ।
ચિત્તેઽપિ બહવો દોષા વર્તતે હિ નિરન્તરમ્ ॥ ૧૦.૧૦॥

કામક્રોધૌ લોભમોહૌ વિષાદેર્ષ્યાભયાદયઃ ।
યે સન્ત્યેતૈર્ગ્રસ્તચિત્તે ભોગિનઃ કિં સુખં ભવેત્ ॥ ૧૦.૧૧॥

શ્રૂયન્તાં ભોક્તૃદોષાશ્ચ ભોક્તારો બહવો મતાઃ ।
દેહાભિમાનિનો જીવા અધમા મધ્યમોત્તમાઃ ॥ ૧૦.૧૨॥

દરિદ્રા અધમા જ્ઞેયા મધ્યમાશ્ચક્રવર્તિનઃ ।
ગન્ધર્વાદ્યા ઉત્તમાઃ સ્યુસ્તે સર્વેઽપિ ક્ષયિષ્ણવઃ ॥ ૧૦.૧૩॥

ઉત્પન્નધ્વંસિનો યદ્વત્સ્યુર્દંશમશકાદયઃ ।
તથૈવ સર્વભોક્તારો મ્રિયન્તે સ્વાયુષઃ ક્ષયે ॥ ૧૦.૧૪॥

ભોક્તા ન મ્રિયતે કિન્તુ દેહ એવેતિચેચ્છૃણુ ।
દેહસ્થસ્યૈવ ભોક્તૃત્વં તન્નશ્યેદ્વપુષા સહ ॥ ૧૦.૧૫॥

દરિદ્રાણાં ભોગહેતુઃ શ્રીર્ભૃત્યાશ્ચ ન સન્ત્યથ ।
સુધુમ્નપ્રમુખાનાં વિદ્યન્તે ચક્રવર્તિનામ્ ॥ ૧૦.૧૬॥

ઇતિ ચેત્સન્તુ સર્વેષાં મિષતમેવ મધ્યમઃ ।
મ્રિયતે ચક્રવર્તી તાં સન્ત્યજ્ય મહતીં શ્રિયમ્ ॥ ૧૦.૧૭॥

અન્તર્ધાનાદિશક્તિશ્ચેદ્ગન્ધર્વાદિષુ વિદ્યતે ।
વિદ્યતાં નામ મૃત્યુસ્તુ તેષાં શાસ્ત્રેષુ કથ્યતે ॥ ૧૦.૧૮॥

ભોક્તૃણાં નશ્વરાણાં કો ભોગઃ સ્યાન્મૃત્યુચિન્તયા ।
શયાનો ભુવિ નો કશ્ચિન્મુમૂર્ષુર્ધનમિચ્છતિ ॥ ૧૦.૧૯॥

તિષ્ઠત્વસૌ ભોક્તૃદોષો ભોગ્યેઽપિ શ્રૂયતામયમ્ ।
અબ્ધિગિર્યાદિકં સર્વં નશ્વરં કિમુતેતરત્ ॥ ૧૦.૨૦॥

દોષાન્ સોઢ્વા સકૃદ્ભુક્તઃ સંસારો નશ્યતીતિ ચેત્ ।
ન ભોગૈરાશ્રિતસ્યાસ્ય સંસારાવૃત્તિદર્શનાત્ ॥ ૧૦.૨૧॥

ભોગકાલે કૃતં કર્મ કુતો જન્મ દદાતિ નો ।
અન્ધકૂપસ્થિતો ભેક ઇવાહં સંસૃતિસ્થિતઃ ॥ ૧૦.૨૨॥

સંસારકૂપપતિતમસ્માદુદ્ધર્તુમર્હસિ ।
ત્વમેવ ગતિરસ્માકમન્યા કાપિ ન વિદ્યતે ॥ ૧૦.૨૩॥

રાજ્ઞોઽસ્ય તીવ્રવૈરાગ્યં દૃષ્ટ્વા મુખ્યાધિકારિતામ્ ।
તમાહ કૃતકૃત્યસ્ત્વમાત્મજ્ઞોઽસિ ન સંશયઃ ॥ ૧૦.૨૪॥

યજ્ઞદાનાદિ કૃત્યં તે જાતં વિવિદિષોદયાત્ ।
સફલં ન પુનઃ કર્મ કર્તવ્યં તેઽત્ર વિદ્યતે ॥ ૧૦.૨૫॥

વિષયાસક્તિરેવાસ્ય જ્ઞાનસ્ય પ્રતિબન્ધિકા ।
એષા તુ નાસ્તિ તે જ્ઞાનં હસ્તપ્રાપ્તમિવ સ્થિતમ્ ॥ ૧૦.૨૬॥

સંસારહેયતાં બુદ્ધ્વા ત્યક્તે તસ્મિન્નશેષતઃ ।
યોઽવશિષ્ટો ભાતિ સોઽયમેવાત્મેત્યવગચ્છ ભોઃ ॥ ૧૦.૨૭॥

અવશિષ્ટોઽયમાત્માસાવહમિત્યેવ ગમ્યતે ।
મતભેદાદહમ્બુદ્ધિર્બહુષ્વસ્ત્યત્ર કો ભવેત્ ॥ ૧૦.૨૮॥

દેહઃ કર્તા ચ સાક્ષીતિ ત્રયો વાદિભિરીરિતાઃ ।
આત્માનસ્તેષુ કતમો ભવતોઽભિમતો વદ ॥ ૧૦.૨૯॥

સાક્ષ્યાત્માભિમતો નાસૌ તયોર્દોષાસ્ત્વયેરિતાઃ ।
સંસારાન્તઃપાતિનૌ તૌ ન તયોરાત્મતોચિતા ॥ ૧૦.૩૦॥

ચાક્ષુષવ્યવહારેઽસ્ય ભાસકત્વેન સાક્ષિતા ।
વિવેક્તું શક્યતે તસ્માદક્ષ્યુપાધૌ સ ઉચ્યતે ॥ ૧૦.૩૧॥

દેહમધ્યેઽસ્તિ હૃત્પદ્મં નાડીયુતમધોમુખમ્ ।
નાડ્યસ્તૂર્ધ્વમધશ્ચૈતં દેહં વ્યાપ્ય વ્યવસ્થિતાઃ ॥ ૧૦.૩૨॥

અહઙ્કારોઽત્ર ચિદ્યુક્તઃ કર્તા ભોક્તા હૃદિ સ્થિતઃ ।
મનોઽન્તઃકરણં સ્થિત્વા હૃદિ વૃત્ત્યા બહિર્વ્રજેત્ ॥ ૧૦.૩૩॥

રશ્મિવત્પ્રસૃતા વૃત્તિર્નાડ્યાપ્નોત્યક્ષિગોલકમ્ ।
અસ્વતન્ત્રા બહિશ્ચક્ષુરિન્દ્રિયેણ સહ વ્રજેત્ ॥ ૧૦.૩૪॥

વૃત્ત્યવચ્છિન્નચૈતન્યં ઘટાકાશવદેતયા ।
વૃત્ત્યા સહ બહિર્ગત્વા તત્રાજ્ઞાનં નુદેત્ક્ષણાત્ ॥ ૧૦.૩૫॥

તદ્વૃત્ત્યાગમનાત્પૂર્વમજ્ઞાનેન સમાવૃતમ્ ।
બાહ્યં જગત્તદજ્ઞાનં તયા વૃત્ત્યાઽપસર્પતે ॥ ૧૦.૩૬॥

વર્તિનિષ્ઠો યથા દીપસ્તમો નાશયતે તથા ।
ચૈતન્યં વૃત્તિનિષ્ઠં યત્તદજ્ઞાનસ્ય નાશકમ્ ॥ ૧૦.૩૭॥

એષ હૃન્નિષ્ઠચૈતન્યપદાર્થોઽક્ષ્ણા બહિર્ગતઃ ।
વ્યાપ્નુવન્નિખિલં તત્ર વ્યથાં નાપ્નોતિ કાઞ્ચન ॥ ૧૦.૩૮॥

પ્રતિકૂલાત્તુ વિષયાદ્યા વ્યથા સા તુ માનસી ।
ન ચૈતન્યગતેત્યેવમાચાર્યાઃ સ્પષ્ટમબ્રુવન્ ॥ ૧૦.૩૯॥

દુઃખી યદિ ભવેદાત્મા કઃ સાક્ષી દુખિનો ભવેત્ ।

દુઃખિનઃ સાક્ષિતા નૈવ સાક્ષિણો દુઃખિતા તથા ॥ ૧૦.૪૦॥

નર્તે સ્યાદ્વિક્રિયાં દુઃખી સાક્ષિતા કા વિકારિણઃ ।
ધીવિક્રિયાસહસ્રાણાં સાક્ષ્યતોઽહમવિક્રિયઃ ॥ ૧૦.૪૧॥

યઃ સાક્ષી ચિત્પદાર્થોઽસૌ જીવાત્મા તસ્ય જીવતા ।
અહઙ્કારેણ તાદાત્મ્યભ્રાન્ત્યૈવ પરિકલ્પિતા ॥ ૧૦.૪૨॥

આત્માહઙ્કારદેહાભ્યાં યુક્તઃ કલુષિતઃ પુરા ।
વિવેચિતઃ સ્થૂલદેહાદીષદેવ પ્રસીદતિ ॥ ૧૦.૪૩॥

બોધયિત્વા જીવતત્ત્વં જીવસ્ય બ્રહ્મરૂપતામ્ ।
બોધયામાસ સોઽપ્યાત્મા સ્વેન રૂપેણ તિષ્ઠતિ ॥ ૧૦.૪૪॥

અહઙ્કારાદ્વિવિક્તશ્ચેત્તદા સમ્યક્ પ્રસીદતિ ।
આધિવ્યાધ્યાખ્યકાલુષ્યં ન ચિન્માત્રેઽસ્તિ કિઞ્ચન ॥ ૧૦.૪૫॥

એષ સાક્ષી સમ્પ્રસાદો દેહદ્વયસમુત્થિતઃ ।
શાસ્ત્રસિદ્ધં પરં બ્રહ્મ જ્યોતિઃ પ્રાપ્નોતિ વાક્યતઃ ॥ ૧૦.૪૬॥

મત્તોઽન્યદ્બ્રહ્મ પરમં સ્વપ્રકાશમિતિ ભ્રમઃ ।
પુરાસીત્તત્ત્વમસ્યાદિવાક્યેનાસૌ નિવર્ત્તતે ॥ ૧૦.૪૭॥

અબ્રહ્મત્વભ્રમાપાયો જ્યોતિઃ પ્રાપ્તિરિતીર્યતે ।
તતોઽયં બ્રહ્મણા સ્વેન રૂપેણ વ્યવતિષ્ઠતે ॥ ૧૦.૪૮॥

એવં વ્યવસ્થિતે યોઽસાવાત્માનુભવગોચરઃ ।
સ એવ મૃતિભીત્યાદિરહિતં બ્રહ્મ નેતરત્ ॥ ૧૦.૪૯॥

શ્રવણં મનનં ધ્યાનં વિદ્યાયાઃ સાધનં ત્રયમ્ ।
અજ્ઞાનં સંશયો ભ્રાન્તિરિત્યેતેષાં નિવર્તકમ્ ॥ ૧૦.૫૦॥

ગુરૂપદેશશ્રવણાદજ્ઞાનં વિનિવર્તતે ।
ઉપપત્તિપરામર્શાત્સંશયાનાં નિવર્તનમ્ ॥ ૧૦.૫૧॥

નિરન્તરધ્યાનતસ્તુ નશ્યતિ ભ્રાન્તિવાસના ।
રાજન્તે શ્રવણં જાતં મનનં કુરુ યત્નતઃ ॥ ૧૦.૫૨॥

પ્રમાણે સમ્પ્રદાયે વા તત્ત્વે વા સંશયો ભવેત્ ।
ઉદિતેઽનુદિતે વેતિ હોમઃ શાસ્ત્રાદ્વિકલ્પિતઃ ॥ ૧૦.૫૩॥

ન તથા બ્રહ્મવિદ્યેયં સર્વોપનિષદીરણાત્ ।
ન પ્રમાણે સંશયોઽતઃ સમ્પ્રદાયેઽપિ નાસ્ત્યસૌ ॥ ૧૦.૫૪॥

શાખાપ્રવર્તકો મૈત્રો મહ્યમાહ ન ચાપરઃ ।
સોઽપિ કિઞ્ચિદુપાખ્યાનમુદાહૃત્ય મમાબ્રવીત્ ॥ ૧૦.૫૫॥

તત્ત્વસ્ય સંશયોઽપૈતિ તદાખ્યાનમિદં શ઼ૃણુ ।
મુનયો વાલખિલ્યા યે તે પ્રજાપતિમબ્રુવન્ ॥ ૧૦.૫૬॥

અચેતનં શરીરં તત્કેન ચેતનવત્કૃતમ્ ।
પ્રેરકો વાસ્ય કો બ્રૂહીત્યુક્તઃ પ્રત્યબ્રવીદસૌ ॥ ૧૦.૫૭॥

વેદાનામુત્તરે ભાગે શ્રૂયતે પરમેશ્વરઃ ।
સ કરોત્યુભયં તસ્ય તાત્ત્વિકં રૂપમુચ્યતે ॥ ૧૦.૫૮॥

અજ્ઞાનમિશ્રણાભાવાચ્છુદ્ધઃ પાપવિવર્જનાત્ ।
પૂતો રૂપેણ નામ્ના ચ હીનત્વાચ્છૂન્યમુચ્યતે ॥ ૧૦.૫૯॥

શાન્તઃ ક્રોધાદિરાહિત્યાદપ્રાણોઽચેષ્ટકત્વતઃ ।
ઈશત્વોપાધિરાહિત્યાદનીશાત્મા સ્વતો ભવેત્ ॥ ૧૦.૬૦॥

કાર્યોપાધિરયં જીવઃ કારણોપાધિરીશ્વરઃ ।
કાર્યકારણતાં હિત્વા પૂર્ણબોધોઽવશિષ્યતે ॥ ૧૦.૬૧॥

દેશાત્કાલાદ્વસ્તુતશ્ચ પરિચ્છેદવિવર્જનાત્ ।
અનન્તોઽપક્ષયાભાવાદક્ષયોઽચલનાત્સ્થિરઃ ॥ ૧૦.૬૨॥

નિત્યસ્ફૂર્ત્યા શાશ્વતોઽયમજો જન્માદિવર્જનાત્ ।
સ્વતન્ત્રો ન પરાધીનઃ સ્વમહિમ્ન્યેવ તિષ્ઠતિ ॥ ૧૦.૬૩॥

મહિમાશ્ચર્યરૂપત્વાદખણ્ડૈકરસાત્મતા ।
આધારાન્તરરાહિત્યાત્સ્થિતિરત્રોપચર્યતે ॥ ૧૦.૬૪॥

અનિચ્છસ્યેદૃશસ્યૈતદ્દેહનિર્વહણં કથમ્ ।
ઇતિ ચેત્સ્વાંશરૂપેણ દેહેઽવસ્થાય નિર્વહેત્ ॥ ૧૦.૬૫॥

સ એવોક્તો દેહસાક્ષી બિદ્વદ્ભિરનુભૂયતે ।
નેતરૈઃ સૂક્ષ્મરૂપોઽયમિન્દ્રિયાવિષયત્વતઃ ॥ ૧૦.૬૬॥

પૂર્ણત્વાત્પુરુષાખ્યેઽસૌ દેહે સ્વાંશેન વર્તતે ।
બુદ્ધિપૂર્વં યથા સુપ્તઃ સ્વેચ્છયા પ્રતિબુધ્યતે ॥ ૧૦.૬૭॥

અધ્યાપકઃ પ્રદોષેષુ મધ્યરાત્રે પ્રબુદ્ધ્યતે ।
સ્વેચ્છયા પરમાત્માપિ તથાત્રાંશેન વર્તતામ્ ॥ ૧૦.૬૮॥

પ્રતિદેહં તુ ચિન્માત્રો ઘટાકાશ ઇવ સ્થિતઃ ।
દેહં સાક્ષિતયા જાનન્ ક્ષેત્રજ્ઞ ઇતિ કથ્યતે ॥ ૧૦.૬૯॥

સઙ્કલ્પાધ્યવસાયાભિમાનૈરેષોઽનુમીયતામ્ ।
સર્વૈરક્ષૈરુપેતત્વાત્સઙ્કલ્પાદ્યસ્ય સમ્ભવેત્ ॥ ૧૦.૭૦॥

તેનાવચ્છિન્નચૈતન્યરૂપેણેદં વપુઃ સદા ।
ચેતનીકૃત્ય કાર્યેષુ પ્રેર્યતેઽશ્વૈર્યથા રથઃ ॥ ૧૦.૭૧॥

અખણ્ડૈકરસસ્યાંશો નેતિ ચેચ્છ્રૂયતામિદમ્ ।
અખણ્ડૈકરસાત્મૈવ માયયેશ્વરતામગાત્ ॥ ૧૦.૭૨॥

માયાયા અનૃતત્વેન નાખણ્ડત્વં વિરુદ્ધ્યતે ।
માયાયાં સ્વચ્છરૂપાયામાત્માયં પ્રતિબિમ્બતિ ॥ ૧૦.૭૩॥

તદુપાધિક ઈશોઽભૂત્સૃષ્ટેઃ પ્રાગેક એવ સઃ ।
અતો નારમતૈકાકી રાજામાત્યાદિકો યથા ॥ ૧૦.૭૪॥

દ્યૂતક્રીડાભિવેશોઽસૌ સૃષ્ટિક્રીડામવૈક્ષતં ।
દ્રવ્યાન્તરમુપાદાનમદૃષ્ટ્વા સ્વં વ્યચારયત્ ॥ ૧૦.૭૫॥

બહુ સ્યામહમેવાત્ર પ્રજારૂપીતિ ચિન્તયન્ ।
દેહાનસૃજત સ્થૂલાન્પાષાણપ્રતિમા ઇવ ॥ ૧૦.૭૬॥

સ્વયમેવ યથા સ્વપ્ને ગિરિનદ્યાદિરૂપતઃ ।
કલ્પિતો ભાત્યસાવાત્મા ભાત્વેવં બહુરૂપતઃ ॥ ૧૦.૭૭॥

જ્ઞાનક્રિયાશક્તિહીના દેહાઃ ક્રીડાર્થમક્ષમાઃ ।
ઇત્યાલોચ્ય ક્રિયાશક્તિઃ પ્રાણો ભૂત્વાન્તરાવિશત્ ॥ ૧૦.૭૮॥

શ્વાસાદ્યોગત્યન્નસામ્યોદ્ગારાદિવ્યાપ્તિસિદ્ધયે ।
પઞ્ચધા વ્યભજત્પ્રાણં પ્રાણોપાધિક ઈશ્વરઃ ॥ ૧૦.૭૯॥

ઉપાંશ્વન્તર્યામિસંજ્ઞૌ ગ્રહૌ દ્વૌ સોમયાજિનઃ ।
નિયતૌ તદ્વદુચ્છ્વાસનિશ્વાસૌ પ્રાણિનામપિ ॥ ૧૦.૮૦॥

લોહકારઃ સ્વહસ્તાભ્યાં પર્યાયેણ દૃતિદ્વયાત્ ।

વહ્નિં જ્વાલયતે યદ્વજ્જાઠરો જ્વાલ્યતેઽનલઃ ॥ ૧૦.૮૧॥

નિશ્વાસોચ્છ્વાસસન્દીપ્તો ભુક્તં પાચયતેઽનલઃ ।
ઈશસ્ય જાઠરાગ્નિત્વાકારો ભગવતેરિતઃ ॥ ૧૦.૮૨॥

અહં વૈશ્વાનરો ભૂત્વા પ્રાણિનાં દેહમાશ્રિતઃ ।
પ્રાણાપાનસમાયુક્તઃ પચામ્યન્નં ચતુર્વિધમ્ ॥ ૧૦.૮૩॥

કર્ણૌ પિધાય યં ઘોષં શૃણોત્યન્તઃ સ જાઠરાત્ ।
વહ્નેર્જાતો મુમૂર્ષુસ્તુ નૈનં ઘોષં શૃણોતિ હિ ॥ ૧૦.૮૪॥

ઔષ્ણ્યોપેતં પઞ્ચવિધપ્રાણલિઙ્ગાભિધં વપુઃ ।
પ્રાણોપાધિકચિદ્રૂપો જ્ઞાનશક્ત્યાપિ યુજ્યતે ॥ ૧૦.૮૫॥

તતો મનોમયો ભૂત્વા સત્યસઙ્કલ્પતાં વ્રજેત્ ।
યત્સઙ્કલ્પયતે જીવસ્તત્કરોત્યેવ સર્વથા ॥ ૧૦.૮૬॥

હૃદિ સ્થિતઃ સન્ શબ્દાદીન્ ભુઞ્જેઽહં વિષયાનિતિ ।
સઙ્કલ્પ્યાક્ષાણિ સૃષ્ટ્વા તૈર્ભુઙ્ક્તેઽક્ષૈર્વિષયાન્ સદા ॥ ૧૦.૮૭॥

દેહો રથઃ પઞ્ચ હયાસ્તસ્ય કર્મેન્દ્રિયાણિ હિ ।
જ્ઞાનેન્દ્રિયાણિ યાનિ સ્યુસ્તાનિ બન્ધનરજ્જવઃ ॥ ૧૦.૮૮॥

મનોઽત્ર સારથિઃ સર્વૈરવચ્છિન્નેશતાં વ્રજન્ ।
ચિદાત્મા ચેતનં દેહં કૃત્વા પ્રેરયતે સદા ॥ ૧૦.૮૯॥

તસ્યાપાયે મૃતો દેહોઽચેતનો ન પ્રવર્તતે ।
ચિદશસ્ય પ્રેરકત્વં બ્રવીતિ ભગવાન્ સ્ફુટમ્ ॥ ૧૦.૯૦॥

મમૈવાંશો જીવલોકે જીવભૂતઃ સનાતનઃ ।
મનઃષષ્ઠાનીન્દ્રિયાણિ પ્રકૃતિસ્થાનિ કર્ષતિ ॥ ૧૦.૯૧॥

અવચ્છિન્નચિદાત્માઽસૌ સ્વતો નેચ્છતિ કિઞ્ચન ।
ન ભુઙ્ક્તે સુખદુઃખે ચ તસ્મિન્નારોપ્યતેઽખિલમ્ ॥ ૧૦.૯૨॥

સર્વેષ્વપિ શરીરેષુ ભાતિ તદ્ધર્મવાનિવ ।
ન તિષ્ઠતિ સ્વતસ્તેષુ નાપિ તદ્ધર્મસંયુતઃ ॥ ૧૦.૯૩॥

જ્ઞાનેન્દ્રિયૈર્નદૃશ્યોઽયં ગ્રાહ્યઃ કર્મેદ્રિયૈર્ન ચ ।
સ્વરૂપસૌક્ષ્મ્યાદવ્યક્તો વેદાન્તૈરેવ બુધ્યતે ॥ ૧૦.૯૪॥

નિર્મમત્વાત્સર્વગોઽપિ શરીરેષુ ચ તિષ્ઠતિ ।
અકર્તાઽપ્યનભિજ્ઞૈસ્તુ કર્તેવાસૌ વિભાવ્યતે ॥ ૧૦.૯૫॥

વેદાનામુત્તરે ભાગે ઇત્યાદિગ્રન્થવર્ણિતમ્ ।
આત્મનો વાસ્તવં રૂપં કર્તૃત્વં નાસ્ય વિદ્યતે ॥ ૧૦.૯૬॥

સ સર્વોપનિષત્સિદ્ધ એષ હૃદ્યુપલભ્યતે ।
શુદ્ધઃ સ્થિરોઽચલો નાસ્ય કર્મલેપોઽસ્તિ કશ્ચન ॥ ૧૦.૯૭॥

અવ્યમો નિઃસ્પૃહસ્તૂષ્ણીમુદાસીન ઇવ સ્થિતઃ ।
સ્વસ્થ વિક્ષેપરાહિત્યાદિત્યાત્માનં પ્રપશ્યત ॥ ૧૦.૯૮॥

ઈદૃશોઽપ્યજ્ઞદૃષ્ટ્યાઽસૌ સત્ત્વાદિગુણધારિણા ।
માયાપટેન સઞ્છન્નો ભુઞ્જાન ઇવ લક્ષ્યતે ॥ ૧૦.૯૯॥

ઇત્થં બોધિતવાનેષ વાલખિલ્યાન્પ્રજાપતિઃ ।
તત્ત્વં બુદ્ધ્વાઽથ પપ્રચ્છુઃ કઃ સંસારીતિ તે ગુરુમ્ ॥ ૧૦.૧૦૦॥

શ્રૂયતાં પરમાત્મોક્તસ્તસ્માદન્યોઽસ્તિ કશ્ચન ।
ભૂતાત્માખ્યો નિકૃષ્ટોઽયં પુણ્યપાપફલૈર્યુતઃ ॥ ૧૦.૧૦૧॥

વિપ્રક્ષત્રાદિસદ્યોનિં શ્વવરાહાદિકામપિ ।
અસદ્યોનિમવાપ્નોતિ ભૂલોકે જન્મ ચેત્તદા ॥ ૧૦.૧૦૨॥

અન્યત્ર જન્મ ચેત્તર્હિ પુણ્યેન સ્વર્ગમશ્નુતે ।
પાપેન નરકં દ્વન્દ્વૈરભિભૂતઃ પરિભ્રમેત્ ॥ ૧૦.૧૦૩॥

માનાવમાનૌ શીતોષ્ણેદ્વન્દ્વાનીત્યાદિકાનિ હિ ।
યો ભૂતાત્મોદિતઃ સોઽથ વિસ્પષ્ટમભિધીયતે ॥ ૧૦.૧૦૪॥

અપઞ્ચીકૃતભૂતૈર્યજ્જાતં સૂક્ષ્મં વપુર્હિ તત્ ।
ભૂતૈઃ પઞ્ચીકૃતૈર્જાતં યત્તત્સ્થૂલમિદં વપુઃ ॥ ૧૦.૧૦૫॥

જ્ઞાનાક્ષાણાં ક્રિયાક્ષાણાં વાયૂનાં પઞ્ચકત્રયમ્ ।
મનોઽહઙ્કાર ઇત્યેવં લિઙ્ગં સપ્તદશાત્મકમ્ ॥ ૧૦.૧૦૬॥

અહઙ્કારે ભૌતિકે યચ્ચૈતન્યં પ્રતિબિમ્બિતમ્ ।
સ ભૂતાત્માઽત્ર ચિદ્બિમ્બં નિર્લેપં બ્રહ્મ કથ્યતે ॥ ૧૦.૧૦૭॥

ભૂતાત્મા પ્રકૃતેર્જાતૈર્ગુણૈરેષોઽભિભૂયતે ।
તમોગુણાભિભૂતત્વાત્સ્વાત્મસ્થં બ્રહ્મ નેક્ષતે ॥ ૧૦.૧૦૮॥

અધિષ્ઠાનતયા બ્રહ્મ ભૂતાત્મન્યપિ તિષ્ઠતિ ।
પદ્મપત્રે નીરબિન્દુરસંશ્લિષ્ટો યથા તથા ॥ ૧૦.૧૦૯॥

ઈદૃશોઽપીશ્વરો માયાયુક્તઃ સન્ પ્રેરયત્યમુમ્ ।
ભૂતાત્માનં સ ભૂતાત્મા વિવિનક્તીશ્વરં ન તમ્ ॥ ૧૦.૧૧૦॥

સુખૈર્વૈષયિકૈઃ સત્ત્વગુણોદ્ભૂતૈઃ પ્રતૃપ્યતિ ।
ઉદ્રેકે રજસઃ સોઽયં કલુષીક્રિયતે ભૃશમ્ ॥ ૧૦.૧૧૧॥

તદાનીમતિચાઞ્ચલ્યાલ્લુપ્યતે હ્યખિલાત્ફલાત્ ।
કૃષિં પ્રક્રમ્ય તાં ત્યક્ત્વા તપઃ કુર્વસ્ત્યજેદદઃ ॥ ૧૦.૧૧૨॥

તત્તત્ફલે સસ્પૃહત્વાત્વ્યગ્રો નાપ્નોત્યસૌ સુખમ્ ।
અહઙ્કારેણ બદ્ધઃ સ્યાજ્જાલેન વિહગો યથા ॥ ૧૦.૧૧૩॥

સંસારભ્રમણં તસ્ય પ્રોક્તં શાખાન્તરેષ્વપિ ।
કરણપ્રેરકઃ કર્તા ભૂતાત્મા સંસરત્યયમ્ ॥ ૧૦.૧૧૪॥

ચૈતન્યેન હિ પૂર્ણેન સોઽન્તર્વ્યાપ્તસ્તતશ્ચિતિ ।
ભ્રાન્ત્યારોપેણ સંસારસ્તત્રાસૌ ન તુ વાસ્તવઃ ॥ ૧૦.૧૧૫॥

દૃષ્ટાન્તોઽત્રાગ્નિના વ્યાપ્તો લોહપિણ્ડોઽભિધીયતે ।
તપ્તલોહં મુદ્ગરેણ હતં બહુવિધં ભવેત્ ॥ ૧૦.૧૧૬॥

અહઙ્કારે ચિદાભાસો ભૂતાત્મા સાક્ષિભાસિતઃ ।
હન્યમાનો ગુણૈઃ સત્ત્વાદિભિર્બહુવિધો ભવેત્ ॥ ૧૦.૧૧૭॥

યજ્જન્મ યોનિલક્ષાણાં ભવેચ્ચતુરશીતિષુ ।
સોઽયં બહુવિધો ભાવો લોહે દાત્રકુઠારવત્ ॥ ૧૦.૧૧૮॥

કુલાલેન યથા ચક્રં તથા માયાવિના ગુણાઃ ।
સત્ત્વાદયઃ પ્રેરિતાઃ સ્યુસ્તૈશ્ચ જન્માન્યનેકધા ॥ ૧૦.૧૧૯॥

લોહે મુદ્ગરઘાતેન નાગ્નેર્બાધસ્તથા ગુણૈઃ ।
ભૂતાત્મોપદ્રવેણાસ્ય સાક્ષિણો નાસ્ત્યુપદ્રવઃ ॥ ૧૦.૧૨૦॥

એકૈકદેહો નરકો ભવેદ્ભૂતાત્મનો મહાન્ ।
મૈથુનોદ્ભૂત્યાદિદોષાઃ પ્રસિદ્ધા એવ દેહિનામ્ ॥ ૧૦.૧૨૧॥

દેહે દોષા યથા ચિત્તે દોષાસ્તદ્વદનેકશઃ ।

સમ્મોહાદ્યાસ્તામસાઃ સ્યુસ્તૃષ્ણાદ્યા રાજસા મતાઃ ॥ ૧૦.૧૨૨॥

ભૂતાત્મા તૈઃ પ્રેરિતઃ સંસ્તૈસ્તૈસ્તામસરાજસૈઃ ।
કર્મભિર્બહુધા દેહાનવાપ્નોતિ પુનઃ પુનઃ ॥ ૧૦.૧૨૩॥

શ્રુત્વા સંસારિણં વાલખિલ્યા વિસ્મયમાયયુઃ ।
સંસારસ્ય પ્રતીકારં પપ્રચ્છુર્મુનયઃ પુનઃ ॥ ૧૦.૧૨૪॥

શામ્યેદ્ભૂતાત્મતા યેન ચિદાત્મત્વં તુ શિષ્યતે ।
તમુપાયં ગુરો બ્રૂહીત્યુક્તઃ સન્ગુરુરુક્તવાન્ ॥ ૧૦.૧૨૫॥

નદ્યૂર્મ્યાદિકદૃષ્ટાન્તૈઃ સંસારસ્યાપ્યનિષ્ટતામ્ ।
મિથ્યાત્વં  ચ વિનિશ્ચિત્ય વ્રજેજ્જ્ઞાનાધિકારિતામ્ ॥ ૧૦.૧૨૬॥

યા વેદેનોદિતા વિદ્યા સા ભૂતાત્મપ્રતિક્રિયા ।
તપો યોગઃ સ્તુતિર્બોધશ્ચોક્તં વેદે ચતુષ્ટયમ્ ॥ ૧૦.૧૨૭॥

સ્વાશ્રમોચિતધર્મો યઃ સ એવાસ્ય તપો ભવેત્ ।
શાન્તાઃ સ્યુર્મોહ તૃષ્ણાદ્યાસ્તેન તામસરાજસાઃ ॥ ૧૦.૧૨૮॥

તચ્છાન્તૌ સત્ત્વવૃદ્ધિઃ સ્યાત્સત્વેનૈકાગ્રતા ધિયઃ ।
તયાત્મતત્ત્વાનુભવસ્તતો મુક્તો ન સંસરેત્ ॥ ૧૦.૧૨૯॥

નિરિન્ધનાગ્નિવચ્ચિત્તં શામ્યેદ્યોગેન કારણે ।
સંસ્કારમાશેષત્વાન્ન ધીઃ સંસર્તુમર્હતિ ॥ ૧૦.૧૩૦॥

તદાનીં જીવચૈતન્યં બ્રહ્મણ્યેકી ભવેદ્યથા ।
જલે જલં વહ્નિરગ્નૌ વ્યોમ્નિ વ્યોમ સ્થિતં તથા ॥ ૧૦.૧૩૧॥

અદ્વૈતમનુભૂયાસ્મિન્સમાધૌ વ્યુત્થિતઃ પુનઃ ।
સ્તુવન્ સર્વાત્મતાં ત બ્રહ્મણોઽનુસ્મરેત્સદા ॥ ૧૦.૧૩૨॥

કુત્સો મુનિર્યથાઽસ્તૌષીત્ત્વં બ્રહ્મેત્યાદિના તથા ।
સ્તુવન્નપનુદેદ્દ્વૈતવાસનાં ચિરમાશ્રિતામ્ ॥ ૧૦.૧૩૩॥

યોગાદદ્વૈતવિજ્ઞાને વાસનાયાશ્ચ સઙ્ક્ષયે ।
સન્ત્યજ્ય જીવતાભ્રાન્તિં પરમાત્મત્વમાપ્નુયાત્ ॥ ૧૦.૧૩૪॥

સા ભ્રાન્તિસ્તમસા જન્યા તમસ્ત્વાશ્રિતમાત્મનિ ।
પરમાત્મત્વમાવૃત્ય કલ્પયેજ્જીવતાભ્રમમ્ ॥ ૧૦.૧૩૫॥

યદાવરકમજ્ઞાનમાત્માઽસ્મિન્પ્રતિબિમ્બતિ ।
ઈશ્વરઃ પ્રતિબિમ્બોઽસૌ સૃષ્ટ્યાદીનાં પ્રવર્તકઃ ॥ ૧૦.૧૩૬॥

યદજ્ઞાનં વિક્રિયતે ભવત્યેષ તમોગુણઃ ।
દૃશ્યમાનં જગદિદં તમ એવાભવત્પુરા ॥ ૧૦.૧૩૭॥

ઈશેન પ્રેરિતં તત્સ્યાદ્રજો જલતરઙ્ગવત્ ।
રજોઽપિ પ્રેરિતં તદ્વત્સત્વમેવ ગુણત્રયમ્ ॥ ૧૦.૧૩૮॥

સમષ્ટિરૂપોઽહઙ્કારઃ સત્ત્વાત્સારઃ સમુદ્ધૃતઃ ।
ચિદ્બિમ્બપ્રતિબિમ્બાભ્યાં યુક્તોઽસૌ ચેતનો ભવેત્ ॥ ૧૦.૧૩૯॥

પ્રતિદેહં વ્યષ્ટિરૂપક્ષેત્રજ્ઞત્વેન તિષ્ઠતિ ।
સઙ્કલ્પોઽધ્યવસાયશ્ચ દેહે તત્સત્ત્વસાધકઃ ॥ ૧૦.૧૪૦॥

હિરણ્યગર્ભો વેદેષુ સમષ્ટિવ્યષ્ટિરૂપધૃક્ ।
શ્રૂયતે યઃ સ સૂત્રાત્મા પ્રજાપતિરિહોદિતઃ ॥ ૧૦.૧૪૧॥

તસ્ય શ્રેષ્ઠાસ્ત્રયો દેહાઃ સૃષ્ટ્યન્તસ્થિતિહેતવઃ ।
બ્રહ્મા રુદ્રો વિષ્ણુરિતિ ગુણત્રયસમુદ્ભવાઃ ॥ ૧૦.૧૪૨॥

યો યઃ સૃજતિ લોકેઽસ્મિન્ બ્રહ્મા તત્રાભિમન્યતે ।
નાશાભિમાની રુદ્રોઽયં વિષ્ણુઃ સ્થિત્યભિમાનવાન્ ॥ ૧૦.૧૪૩॥

પ્રજાપતિસ્ત્રિધા ભૂત્વા ભૂયોઽપિ બહુધાઽભવત્ ।
વસુરુદ્રાદિત્યભેદૈર્ગિરિનદ્યાદિભેદતઃ ॥ ૧૦.૧૪૪॥

આત્મન્યધ્યારોપ એવં પ્રોક્તો માયાવિનિર્મિતઃ ।
આત્માઽધિષ્ઠાનરૂપેણ પ્રવિષ્ટઃ સર્વવસ્તુષુ ॥ ૧૦.૧૪૫॥

ઇત્થં વિવેચિતશ્ચાત્મા ભાત્યાધિક્યેન પાલકઃ ।
નાધિષ્ઠાનં વિના કિઞ્ચિદારોપ્યં બાધ્યતે ક્વચિત્ ॥ ૧૦.૧૪૬॥

આરોપિતસ્ય સર્વસ્યાધિષ્ઠાનં તત્ત્વમીક્ષ્યતે ।
તસ્માદન્તર્બહિશ્ચાત્મા સ્થિતઃ સર્વેષુ વસ્તુષુ ॥ ૧૦.૧૪૭॥

પ્રજાપતિર્વાલખિલ્યાન્મુનીનેવમબૂબુધત્ ।
શાકાયન્યઃ કથામેતાં રાજ્ઞે પ્રોવાચ ધીમતે ॥ ૧૦.૧૪૮॥

વૈરાગ્યં પરમાત્માઽત્ર જીવાત્મા સાધનાનિ ચ ।
તપો યોગઃ સ્તુતિર્બોધ ઇતિ સર્વં વ્યવસ્થિતમ્ ॥ ૧૦.૧૪૯॥

શાકાયન્યાય ભગવાન્મૈત્રોઽખિલમુવાચ હ ।
તત્સર્વં મેઽનુગૃહ્ણાતુ વિદ્યાતીર્થમહેશ્વરઃ ॥ ૧૦.૧૫૦॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
મૈત્રાયણીયશાખાવિવરણો નામ દશમોઽધ્યાયઃ ॥ ૧૦॥

## ૧૧. કઠવલ્લીવિવરણો નામ એકાદશોઽધ્યાયઃ ।

યાજુષ્યાં કઠશાખાયાં વિદ્યાં યાં નચિકેતસે ।
યમઃ પ્રોવાચ તાં સર્વાં સઙ્ગ્રહેણ બ્રવીમ્યહમ્ ॥ ૧૧.૧॥

નચિકેતાઃ કુમારઃ સન્ સ્વપિત્રા પ્રેષિતો યમમ્ ।
ગત્વા તં તોષયિત્વાત્મજ્ઞાનં વરમયાચત ॥ ૧૧.૨॥

પ્રેતે મનુષ્યે સન્દેહો ભૂયાન્મતવિભેદતઃ ।
પારલૌકિક આત્માસ્તિ નાસ્તિ વા નિર્ણયં વદ ॥ ૧૧.૩॥

ચાર્વાકા દેહમેવાહુઃ કર્મિણઃ સ્વર્ગગામિનમ્ ।
મુમુક્ષવો મુચ્યમાનમિત્યુક્તો ગુરુરાહ તમ્ ॥ ૧૧.૪॥

દુર્વિજ્ઞેયમણુત્વાત્તદ્દેવૈશ્ચ વિચિકિત્સિતમ્ ।
ત્યક્ત્વૈતત્પુત્રવિત્તાદીન્ વૃણીષ્વેત્યુક્ત આહ ॥ ૧૧.૫॥

પુત્રાદ્યા નશ્વરાઃ ક્લેશહેતવશ્ચાથ દુર્ગમમ્ ।
તત્ત્વં વક્તું ત્વાહશોઽન્યો નેત્યાત્મૈવ ત્વયોચ્યતામ્ ॥ ૧૧.૬॥

શ◌ૃણુ પ્રિયં હિતં ચેતિ પુરુષૈરર્થ્યતે દ્વયમ્ ।
પ્રિયાઃ પુત્રાદયસ્ત્વાત્મા હિતો દુઃખવિવર્જિતઃ ॥ ૧૧.૭॥

અવિવેકવિવેક દ્વૌ માર્ગૌ તત્રાવિવેકિનઃ ।
પ્રિયાર્થિનસ્ત્વં તુ નૈવં મત્તો જ્ઞાનં હિતં ભજ ॥ ૧૧.૮॥

મૂઢાતિમૂઢૌ ન સમૌ ત્વયાઽત્યન્તવિવેકિના ।
મૂઢસ્ત્વીષદ્વિવેકી સન્ સ્વર્ગમિચ્છતિ નૈહિકમ્ ॥ ૧૧.૯॥

તદ્ગુરુશ્ચ તથૈતૌ દ્વાવન્ધનીતાન્ધવત્સ્થિતૌ ।
આત્મતત્ત્વાનભિજ્ઞત્વાદવિદ્યાભ્યન્તરે સ્થિતૌ ॥ ૧૧.૧૦॥

અતિમૂઢો ધનાર્થી સન્ બ્રહ્મહત્યાદિકાન્યપિ ।

કરોતિ પરલોકૈસ્તુ ન તસ્ય પ્રતિભાસતે ॥ ૧૧.૧૧॥

ચાર્વાકૈઃ કર્મિભિશ્ચાત્મા શ્રવણાયાપિ દુર્લભઃ ।
મુમુક્ષવોઽપિ બહવઃ શૃણ્વન્તોઽપિ ન જાનતે ॥ ૧૧.૧૨॥

હવિર્ભુજાં હિ દેવાનામપ્રિયં મર્ત્યવેદનમ્ ।
મર્ત્યાસ્તત્ત્વં ન જાનન્તિ વિઘ્નૈર્દેવકૃતૈર્હતાઃ ॥ ૧૧.૧૩॥

આચાર્યશિષ્યયોર્દોષાન્દેવા ઉત્પાદયન્તિ હિ ।
વાગ્દોષાદ્બુદ્ધિદોષાદ્વા વક્તું શક્નોતિ નો ગુરુઃ ॥ ૧૧.૧૪॥

અવિશ્વાસાત્કુતર્કાદ્વા શિષ્યો બોદ્ધું ન શક્નુયાત્ ।
ઈશ્વરાનુગ્રહાદ્દેવા વિહન્તું શક્નુવન્તિ નો ॥ ૧૧.૧૫॥

સહનાવિત્યાદિ શાન્તિજપેનેશપ્રસાદતઃ ।
નિર્વિઘ્નૌ ગુરુશિષ્યૌ સ્તસ્તાદૃશૌ દુર્લભૌ ખલુ ॥ ૧૧.૧૬॥

શબ્દાર્થજ્ઞઃ સ્વાત્મતત્ત્વાનુભવી ચ ગુરુર્દ્વિધા ।
આદ્યો નરો ન તુ બ્રહ્મ નરત્વભ્રાન્ત્યનાશનાત્ ॥ ૧૧.૧૭॥

તેનોક્તે સંશયા એવ સ્યુર્વાચા બહુયોજનાત્ ।
બ્રહ્મૈવાનુભવી તેન બ્રહ્મ પ્રોક્તં વિબુધ્યતે ॥ ૧૧.૧૮॥

કુતર્કાન્નાશ્યતે વિદ્યા તાર્કિકો ન ગુરુસ્તતઃ ॥ ।
આગમે ચાનુભૂતૌ ચ કુશલોઽત્ર ગુરુર્ભવેત્ ॥ ૧૧.૧૯॥

શિષ્યો બહિર્મુખો ન સ્યાદધ્યાત્મં યોગમાચરન્ ।
દુર્દર્શત્વાદિસંયુક્તમપ્યાત્માનં પ્રપશ્યતિઃ ॥ ૧૧.૨૦॥

બાહ્યેન્દ્રિયૈર્ન દૃશ્યોઽયં ગૂઢસ્થાનપ્રવેશતઃ ।
પઞ્ચકોશગુહાન્તસ્થો ગહ્વરે તમસિ સ્થિતઃ ॥ ૧૧.૨૧॥

યોગેનાન્તર્મુખા બુદ્ધિસ્તમો નાશયતે તતઃ ।
દેવં જ્ઞાત્વા હર્ષશોકૌ ત્યજેત્તદ્યોગ્યતાસ્તિ તે ॥ ૧૧.૨૨॥

યોગ્યોઽહં ચેત્તર્હિ તત્ત્વં રહસ્યં યત્ત્વમીક્ષસે ।
તદ્બ્રૂહિ સર્વસંસારગુણાતીતં વિમુક્તયે ॥ ૧૧.૨૩॥

ધર્માધર્મૌ કાર્યહેતૂ તથા ભૂતભવિષ્યતી ।
અન્યચ્ચ સર્વં નો યત્ર તદેવાપેક્ષિતં મમ ॥ ૧૧.૨૪॥

સર્વવેદેષુ યદ્વેદ્યં તપાંસિ યદવાપ્તયે ।
બ્રહ્મચર્યે ચ તદ્વસ્તુ પ્રણવેનાભિધીયતે ॥ ૧૧.૨૫॥

પ્રણવો વાચકસ્તસ્ય સ્યાત્પ્રતીકમુપાસ્તયે ।
તેન બોદ્ધુર્ભવેન્મુક્તિર્બ્રહ્મલોકોઽપ્યુપાસિતુઃ ॥ ૧૧.૨૬॥

ન જાયતે ન મ્રિયતે પ્રણવાર્થશ્ચિદાત્મકઃ ।
પુરાણોઽસાવજત્વેન નિત્યઃ સ્યાદમૃતત્વતઃ ॥ ૧૧.૨૭॥

કારણં માસ્ય કાર્યં વા દેહઘાતેઽપિ નો હતિઃ ।
દેહો દેહાન્તરં હન્તિ ન ચિદ્ધન્તિ ન હન્યતે ॥ ૧૧.૨૮॥

શ્યામાકાદેરણોરેષોઽણીયાંસ્તત્રાણુકલ્પનાત્ ।
મહીયાન્મહતઃ ખાદેસ્તત્રાકાશાદિકલ્પનાત્ ॥ ૧૧.૨૯॥

સ્થિતો જન્તોર્હૃદ્ગુહાયાં તં નિષ્કામસ્તુ પશ્યતિ ।
ઇન્દ્રિયાણાં પ્રસન્નત્વાદ્વીતશોકસ્તદા ભવેત્ ॥ ૧૧.૩૦॥

અન્તર્મુખોઽહં પશ્યામિ મત્તોઽન્યો બાહ્યધીઃ પુમાન્ ।
જ્ઞાતુમર્હતિ કો વા તં વિરુદ્ધાત્મત્વભાસિનમ્ ॥ ૧૧.૩૧॥

દૂરં ગચ્છેદિહાસીનઃ શયાનો યાતિ સર્વતઃ ।
સમદો વિમદશ્ચાઽતો દુર્લક્ષ્યો હ્યવિવેકિભિઃ ॥ ૧૧.૩૨॥

વને ધ્યાતું સમાસીનો દેહં સઙ્કલ્પ્ય માનસમ્ ।
તેનૈવ નગરં ગત્વા કરોતિ ક્રયવિક્રયૌ ॥ ૧૧.૩૩॥

શયાનો મઞ્ચકેઽક્ષેષુ વિલીનેષુ નિરાકૃતિઃ ।
આકાશવત્સર્વગતઃ એકઃ સુપ્તોઽવતિષ્ઠતે ॥ ૧૧.૩૪॥

ધનવિદ્યાદિભિર્મત્તઃ પાણ્ડિત્યં સદસિ બ્રુવન્ ।
વૈરાગ્યનટનેનાસૌ લક્ષ્યતે મદહીનવત્ ॥ ૧૧.૩૫॥

એવં વિરુદ્ધધર્મત્વાત્સ્વભાવઃ કોઽસ્ય વાસ્તવઃ ।
ઇતિ જ્ઞાતુમશક્યત્વાદન્તર્દૃષ્ટ્યૈવમીક્ષતામ્ ॥ ૧૧.૩૬॥

અશરીરં શરીરેષ્વનવસ્થેષ્વેષ્વવસ્થિતમ્ ।
સર્વગં બહુભાવાધિષ્ઠાનં મત્વા ન શોચતિ ॥ ૧૧.૩૭॥

નાયમાત્મા બહોઃ પાઠાદ્બહુશ્રુત્યા ચ મેધયા ।
લભ્યો બહિર્મુખસ્યાસ્ય નેશ્વરાનુગ્રહો યતઃ ॥ ૧૧.૩૮॥

યમન્તર્મુખમીશોઽનુગૃહ્ણીતે તેન લભ્યતે ।
તસ્યેશઃ સ્વાત્મનો રૂપં ભાસયત્યખિલં સ્ફુટમ્ ॥ ૧૧.૩૯॥

પાપં ક્રોધમનૈકાગ્ર્યં યોગસિદ્ધિં ચ નૈતિ યઃ ।
તમીશ્વરોઽનુગૃહ્ણાતિ સંજ્ઞાનેનૈવમાપ્નુયાત્ ॥ ૧૧.૪૦॥

બ્રાહ્મણાદિજગન્મૃત્યુસહિતં યસ્તુ સંહરેત્ ।
સોઽયમુગ્રઃ કથં બોદ્ધું શક્યઃ સ્યાન્નિયતિં વિના ॥ ૧૧.૪૧॥

કો બોદ્ધા કશ્ચ બોદ્ધવ્ય ઇતિ ચેત્તાવુભૌ શ઼ૃણુ ।
બુદ્ધિપ્રવિષ્ટૌ જીવેશૌ બોદ્ધૃબોદ્ધવ્યતાં ગતૌ ॥ ૧૧.૪૨॥

અવચ્છિન્નો ભવેજ્જીવોઽનવચ્છિન્નો મહેશ્વરઃ ।
રથસ્વામી ચ ગન્તવ્યદેશો યદ્વદ્ભુભૌ યથા ॥ ૧૧.૪૩॥

જીવં તં રથિનં વિદ્ધિ શરીરં રથમેવ તુ ।
જીવોપાધિમહઙ્કારં સારથિં પ્રગ્રહં મનઃ ॥ ૧૧.૪૪॥

ઇન્દ્રિયાણિ હયા જ્ઞેયા વિષયા ગમ્યભૂમયઃ ।
સારથ્યધીના સર્વત્ર રથિનઃ સદસદ્ગતિઃ ॥ ૧૧.૪૫॥

કર્તા સારથિરક્ષાણિ નિયમ્ય મનસા ક્રમાત્ ।
ગચ્છન્નન્તર્મુખો માર્ગપારં વિષ્ણુપદં વ્રજેત્ ॥ ૧૧.૪૬॥

ઇન્દ્રિયાદિર્વિષ્ણુતત્ત્વપર્યન્તો હ્યન્તરક્રમઃ ।
ઇન્દ્રિયેભ્યો ભૌતિકેભ્યો ભૂતેષ્વાન્તરતા સ્થિતા ॥ ૧૧.૪૭॥

તદ્ભૂતેભ્યઃ સૂક્ષ્મભૂતકાર્યત્વાન્મન આન્તરમ્ ।
તતોઽતિસૂક્ષ્મકાર્યત્વાત્કર્તૃત્વોપાધિરાન્તરઃ ॥ ૧૧.૪૮॥

સમષ્ટિકર્તૃતોપાધિરાન્તરો વ્યષ્ટિકર્તૃતઃ ।
સમષ્ટ્યાખ્યમહત્તત્વાત્તદ્ધેત્વવ્યક્તમાન્તરમ્ ॥ ૧૧.૪૯॥

માયાખ્યાવ્યક્તતોઽપ્યસ્યાધારઃ પુરુષ આન્તરઃ ।
પુરુષાન્ન પરં કિઞ્ચિત્સર્વં તેનૈવ પૂરિતમ્ ॥ ૧૧.૫૦॥

સદ્રૂપઃ પુરુષસ્તસ્ય સત્ત્વેનાન્યસ્ય પૂરણાત્ ।
અસ્તીતિ નિખિલં ભાતિ પૂરકઃ પુરુષો મતઃ ॥ ૧૧.૫૧॥

વસ્તુતત્ત્વવિચારોઽતઃ પુરુષેઽસ્મિન્સમાપ્યતે ।

ગન્તવ્યતત્ત્વસીમત્વાદ્રથી ગચ્છતિ તં ક્રમાત્ ॥ ૧૧.૫૨॥

રથિનો વાસ્તવં રૂપં પૂર્ણત્વં તદબોધતઃ ।
અવચ્છિન્નત્વમેતચ્ચ તદ્બોધેન નિવર્તતે ॥ ૧૧.૫૩॥

આત્મા સર્વેષુ દેહેષુ ભ્રાન્ત્યા ગૂઢો ન ભાસતે ।
એકાગ્ર્યયા સૂક્ષ્મયૈતં પશ્યેત્તાચ્છીલ્યવાન્ધિયા ॥ ૧૧.૫૪॥

ધિયસ્તથાત્વં યોગાત્સ્યાદ્યોગો ભૂમિચતુષ્કવાન્ ।
વાગ્ધીકર્તૃસમષ્ટીનાં નિરોધાદ્ભૂમયોઽભવન્ ॥ ૧૧.૫૫॥

વાગાદિકં બાહ્યમક્ષં નિરુન્ધન્ શેષયેન્મનઃ ।
મનો નિરુધન્ કર્તારં શેષયેદ્વ્યષ્ટિરૂપિણમ્ ॥ ૧૧.૫૬॥

સવિકલ્પકમેતશ્ચ નિરુન્ધન્નિર્વિકલ્પકમ્ ।
અસ્મીત્યેતન્માત્રરૂપં મહાન્તમવશેષયેત્ ॥ ૧૧.૫૭॥

તમપ્યન્તે નિરુધ્યાથ શાન્તાત્મા શિષ્યતે સ્વયમ્ ।
ક્ષુરધારેવ વિષમો યોગો મન્દમતેરયમ્ ॥ ૧૧.૫૮॥

ક્ષુરોઽતિલગ્નો દેહઘ્નો ન લગ્નશ્ચેદ્વપેત નો ।
સમાહિતં મનોપ્યેવં નિદ્રાં કુર્યાદ્બહિર્વ્રજેત્ ॥ ૧૧.૫૯॥

કૌશલં યોગિનોઽપેક્ષ્યં નાપિતસ્ય યથા ક્ષુરે ।
નિવાર્ય લયવિક્ષેપૌ સમાદધ્યાત્પરાત્મનિ ॥ ૧૧.૬૦॥

શબ્દસ્પર્શાદિહીનાત્મા સૌક્ષ્મ્યાત્સૂક્ષ્મધિયેક્ષ્યતે ।
ખવાય્વગ્નિજલોર્વીણાં સ્થૌલ્યં શબ્દાદિમત્ત્વતઃ ॥ ૧૧.૬૧॥

શબ્દસ્પર્શૌ રૂપરસૌ ગન્ધો ભૂતગુણા ઇમે ।
એકદ્વિત્રિચતુઃપઞ્ચગુણા વ્યોમાદયઃ ક્રમાત્ ॥ ૧૧.૬૨॥

ગુણાધિક્યે સ્થૌલ્યવૃદ્ધિઃ સૌક્ષ્મ્યવૃદ્ધિર્ગુણક્ષયાત્ ।
નિર્ગુણં ચાતિસૂક્ષ્મત્વાદતિસૂક્ષ્મધિયેક્ષતે ॥ ૧૧.૬૩॥

વિદ્યાયોગૌ યમેનોક્તૌ વૈરાગ્યં નચિકેતસા ।
સ્વત એવાસ્ત્યુપાખ્યાનં નાચિકેતમિદં શુભમ્ ॥ ૧૧.૬૪॥

એતદેવાતિવિસ્પષ્ટં પુનશ્ચાત્ર પ્રપઞ્ચ્યતે ।
શ્રૂયતાં નચિકેતોઽત્ર વિદ્યાયાઃ પ્રતિબન્ધકમ્ ॥ ૧૧.૬૫॥

ઇન્દ્રિયાણિ બહિર્દ્રષ્ટું સસૃજે પરમેશ્વરઃ ।
અતસ્તૈઃ પ્રત્યગાત્માનં ન કશ્ચિદપિ વીક્ષતે ॥ ૧૧.૬૬॥

સકામં ચ મનસ્તદ્વન્નિષ્કામં ચાત્મબુદ્ધયે ।
સૃષ્ટં તયોર્યોગયુક્તમનસાત્માઽવલોક્યતે ॥ ૧૧.૬૭॥

યચ્ચૈતન્યાનુગ્રહેણ રૂપાદીનન્દ્રિયૈઃ પુમાન્ ।
જાનાતિ યેન સ્વપ્નાદિ દૃશ્યતે તદ્વિવિચ્યતામ્ ॥ ૧૧.૬૮॥

ચૈતન્યેન જડં જ્ઞેયમિત્યુક્તે શિષ્યતેઽત્ર કિમ્ ।
અજ્ઞાનં નિખિલં પ્રાજ્ઞં ચૈતન્યં બ્રહ્મ વસ્તુ હિ ॥ ૧૧.૬૯॥

યદ્દેવૈરપિ સન્દિગ્ધં યત્પૃષ્ટં નચિકેતસા ।
ધર્માધર્માદ્યતીતં યત્તદિદં બ્રહ્મ વર્ણિતમ્ ॥ ૧૧.૭૦॥

યઃ કર્મફલભોક્તાઽસ્તિ જીવઃ પ્રાણાદિધારકઃ ।
ઉપાધિતો વિવિચ્યૈતં જ્ઞાત્વેશં ન જુગુપ્સતે ॥ ૧૧.૭૧॥

જુગુપ્સા યોનિસમ્પ્રાપ્તિર્નાઽસાવેતસ્ય વિદ્યતે ।
જગત્કર્તૃતયા લક્ષ્ય ઈશોઽયં તસ્ય કા જનિઃ ॥ ૧૧.૭૨॥

યદ્દેહેઽસ્તિ તદેવૈષુ વેદેષુ બ્રહ્મ ગીયતે ।
મૃત્યોઃ સ મૃત્યુમાપ્નોતિ યોઽત્ર નાનેવ પશ્યતિ ॥ ૧૧.૭૩॥

મનસૈવેદમાપ્તવ્યમેકાગ્રેણેશજીવયોઃ ।
તત્ત્વમદ્વૈતમેતસ્મિન્યોગી ભેદં ન પશ્યતિ ॥ ૧૧.૭૪॥

હૃન્નિષ્ઠો બુદ્ધ્યવચ્છિન્નો જીવો હ્યઙ્ગુષ્ઠમાત્રકઃ ।
ઉપાધ્યપગમે સોઽયમીશાનો ભૂતભવ્યયોઃ ॥ ૧૧.૭૫॥

વૃષ્ટં જલં પર્વતાગ્રે બહુધાઽધોગતિં વ્રજેત્ ।
જીવેશભેદદૃક્ચૈવં બહુયોનિષુ જાયતે ॥ ૧૧.૭૬॥

વૃષ્ટં તુ નિર્મલે કૂપે સુસ્થિતં પીયતેઽમૃતમ્ ।
તથૈવ બ્રહ્મતાં સ્વસ્ય વિજાનન્મુચ્યતે સુધીઃ ॥ ૧૧.૭૭॥

પુરમેકાદશદ્વારં નાભિમૂર્ધન્યસંયુતમ્ ।
દેહાખ્યં યસ્ય તં દૃષ્ટ્વા વિમુક્તઃ સન્ વિમુચ્યતે ॥ ૧૧.૭૮॥

જીવન્નવિદ્યાકામાદિબન્ધૈર્મુક્તો મૃતઃ પુનઃ ।
શરીરગ્રહણાભાવાદ્વિદેહઃ સન્ વિમુચ્યતે ॥ ૧૧.૭૯॥

પ્રાણમૂર્ધ્વં નયત્યાત્માઽપાનવાયું નયત્યધઃ ।
તત્સેવકાશ્ચક્ષુરાદ્યા લિઙ્ગેનાત્માઽનુમીયતામ્ ॥ ૧૧.૮૦॥

સકર્તૃકાઃ પ્રાણચક્ષુરાદ્યાઃ સ્યુઃ સાધનત્વતઃ ।
કુઠારવત્તતો નાયમસ્તીત્યેતન્નિરાકૃતમ્ ॥ ૧૧.૮૧॥

પ્રાણાપાનવશાદ્દેહો જીવતીતિ યદુચ્યતે ।
તન્ન પ્રાણાદ્યાશ્રયો યઃ કર્તા તેનૈવ જીવતિ ॥ ૧૧.૮૨॥

સ કર્તાઽસ્મિન્મૃતે દેહે સ્વકર્મવશતઃ પુનઃ ।
વિપ્રાદિયોનિમાપ્નોતિ લતાવૃક્ષાદિકામપિ ॥ ૧૧.૮૩॥

દેહૌ નીચોત્તમૌ તાદૃક્કર્મકર્તૃપુરઃસરૌ ।
નીચોત્તમત્વાત્પ્રાસાદપર્ણશાલે યથા તથા ॥ ૧૧.૮૪॥

સુપ્તેષ્વક્ષેષુ યઃ સ્વપ્ને કામં કામં સૃજત્યયમ્ ।
દેહાતિરિક્તસ્તં કો વા નિરાકર્તું પ્રભુર્ભવેત્ ॥ ૧૧.૮૫॥

જીવાત્માનં પ્રસાધ્યૈવં તસ્યૈવોપાધ્યપાયતઃ ।
બ્રહ્મતાં વેત્તિ જગત આધારત્વેન લક્ષિતામ્ ॥ ૧૧.૮૬॥

અગ્નિર્યથૈકઃ કાષ્ઠેષુ પ્રવિશ્ય બહુધા ભવેત્ ।
તથાત્મા ત્વેક એવૈષુ દેહેષુ બહુધોચ્યતે ॥ ૧૧.૮૭॥

વાયુશ્ચૈકોઽપિ દેહેષુ પ્રવિશ્ય પ્રાણરૂપતઃ ।
બહુધા ભાત્યેવમાત્મા પ્રત્યુપાધિ પૃથગ્ભવેત્ ॥ ૧૧.૮૮॥

સર્વચક્ષુઃસ્વરૂપોઽપિ ન રવિર્નેત્રરોગભાક્ ।
સર્વાત્મત્વેઽપિ તદ્બ્રહ્મ તથા દુઃખૈર્ન લિપ્યતે ॥ ૧૧.૮૯॥

સર્વભૂતાન્તરાત્મૈકઃ સ્વતન્ત્રો માયયાવૃતઃ ।
એકં સ્વં બહુધા કુર્યાદ્બહુરૂપો યથા નટઃ ॥ ૧૧.૯૦॥

માયોપાધિક ઈશોઽયં બુદ્ધ્યુપાધિમતાં નૃણામ્ ।
કર્માનુસારિણઃ કામાન્ વિદધાત્યુપભુક્તયે ॥ ૧૧.૯૧॥

સ્વચિત્તસ્થં સાક્ષિરૂપમીશં પશ્યન્તિ યે નરાઃ ।
તેષાં નિત્યા દુઃખશાન્તિર્બ્રહ્માનન્દશ્ચ શાશ્વતઃ ॥ ૧૧.૯૨॥

અનિર્દેશ્યં તમાનન્દં પ્રત્યક્ષં મન્વતે બુધાઃ ।

સ દૃશ્યો વા સ્વપ્રકાશ ઇતિ ચેન્ન સ દૃશ્યતે ॥ ૧૧.૯૩॥

ન ભાસયન્તિ સૂર્યાદ્યા બુદ્ધ્યાદ્યાશ્ચ સ્વયમ્પ્રભમ્ ।
કિં તુ ભાન્તં તમન્વેતે ભાન્તિ ભાસા તદીયયા ॥ ૧૧.૯૪॥

સર્વોત્તમત્વાદૂર્ધ્વં તન્મૂલં સંસારશાખિનઃ ।
દેવમાનુષપશ્વાદ્યાઃ શાખાસ્તસ્યાધમા મતાઃ ॥ ૧૧.૯૫॥

યન્મૂલં તત્સ્વયઞ્જ્યોતિસ્તદેવામૃતમુચ્યતે ।
તસ્મિન્ લોકાઃ શ્રિતાઃ સર્વે તચ્ચ નાત્યેતિ કશ્ચન ॥ ૧૧.૯૬॥

માયાશક્તિયુજા તેન જગત્સર્વં નિયમ્યતે ।
અગ્નિસૂર્યાદયસ્તસ્માદ્ભીતાઃ સન્તશ્ચરન્તિ હિ ॥ ૧૧.૯૭॥

નરદેહસ્ય પાતાત્પ્રાક્તદ્બોદ્ધું શક્નુયાન્ન ચેત્ ।
જન્માન્તરેષુ તદ્બોધઃ પ્રાયેણાત્યન્તદુર્લભઃ ॥ ૧૧.૯૮॥

સ્વપ્નવત્પિતૃલોકસ્ય સ્વાતન્ત્ર્યં નાસ્તિ કિઞ્ચન ।
ગન્ધર્વલોકે ભોગેચ્છાવશાદ્ધીરતિચઞ્ચલા ॥ ૧૧.૯૯॥

બ્રહ્મલોકેઽસ્ત્યેષ બોધઃ સ લોકઃ સુલભો ન હિ ।
આદર્શવચ્છુદ્ધચિત્તે નરેણાત્મેક્ષ્યતે સ્ફુટમ્ ॥ ૧૧.૧૦૦॥

ઇન્દ્રિયાણામનાત્મત્વમાગમાપાયદર્શનાત્ ।
બુધ્વા તત્સાક્ષિણિ સ્વસ્મિન્ બ્રહ્મત્વં બુધ્યતે સુખાત્ ॥ ૧૧.૧૦૧॥

મન્દશ્ચેદક્ષધીકર્તૃસમષ્ટ્યવ્યક્તરૂપતઃ ।
ક્રમાદ્વિવિચ્ય મૂઢં (ગૂઢં) સ્વં વીક્ષ્યતે સૂક્ષ્મયા ધિયા ॥ ૧૧.૧૦૨॥

બાહ્યાક્ષવિષયેષ્વાત્મસ્વરૂપં ન હિ તિષ્ઠતિ ।
નિવૃત્તાક્ષો નિરુદ્ધેન સૂક્ષ્મેણ મનસેક્ષતે ॥ ૧૧.૧૦૩॥

અપ્રમત્તોઽખિલાઽક્ષાણિ સકર્તૄણિ યદા પુમાન્ ।
નિરુણદ્ધિ તદા યોગસ્તામવસ્થાં પ્રચક્ષતે ॥ ૧૧.૧૦૪॥

સર્વાક્ષાઽગોચરત્વેઽપિ સ્વાત્માઽસ્તીત્યાહ તત્ત્વવિત્ ।
કારણસ્યાત્મનોઽસત્ત્વે શૂન્યં કાર્યં જગદ્ભવેત્ ॥ ૧૧.૧૦૫॥

અસ્તીત્યેવોપલબ્ધવ્યો નાઽયમસ્તીતિ ન ત્વયા ।
સર્વત્રાનુગતં યત્તત્તન્નાસ્તીત્યુચ્યતે કથમ્ ॥ ૧૧.૧૦૬॥

સોપાધિકં તાવદાદૌ દૃષ્ટ્વાઽસ્તીતિ તતઃ પુનઃ ।
ઉપાધીન્ સમ્પરિત્યજ્ય તત્ત્વભાવેન પશ્યતિ ॥ ૧૧.૧૦૭॥

ઉપાધીનાં માયયૈષાં કલ્પિતત્વેન તૈર્વિના ।
નિરુપાધિકસન્માત્રં વસ્તુ તચ્ચ તથેક્ષ્યતામ્ ॥ ૧૧.૧૦૮॥

કલુષં જલમાનીય તતોઽસ્મિન્ કાતકં રજઃ ।
યદા ક્ષિપેત્તદા નીરં પ્રસીદતિ યથા તથા ॥ ૧૧.૧૦૯॥

સોપાધિકજ્ઞાનવતો નિરુપાધિઃ પ્રસીદતિ ।
રજઃપ્રક્ષેપસદૃશી યોગાન્નિષ્કામતા ધિયઃ ॥ ૧૧.૧૧૦॥

યદા સર્વે પ્રમુચ્યતે કામા યેઽસ્ય હૃદિ સ્થિતાઃ ।
તદૈવ મર્ત્યતાં હિત્વા સ જીવન્ બ્રહ્મતાં વ્રજેત્ ॥ ૧૧.૧૧૧॥

અહઙ્કારેણ ચૈતન્યં ગ્રથિત્વેચ્છતિ ચેત્તદા ।
હૃદયે ગ્રન્થયઃ કામાસ્તે ભિદ્યન્તે વિવેકિનઃ ॥ ૧૧.૧૧૨॥

અહઙ્કારચિતોરૈક્યભ્રાન્તેરપગમે સતિ ।
કામાભાસાઃ સન્તુ ચિત્તે ક્રમાન્નશ્યન્તિ તેઽપિ ચ ॥ ૧૧.૧૧૩॥

જીવન્મુક્તસ્તુ નિષ્કામો ન મૃતિં પ્રતિપદ્યતે ।
પ્રાણોત્ક્રાન્તિર્મૃતિઃ સા તુ જ્ઞાનિનો ન હિ વિદ્યતે ॥ ૧૧.૧૧૪॥

પ્રાણા અન્તર્વિલીયન્તે તપ્તાશ્મક્ષિપ્તનીરવત્ ।
જ્ઞાની પુરાઽપિ બ્રહ્મૈવ સન્ બ્રહ્માઽપ્યેતિ તલ્લયે ॥ ૧૧.૧૧૫॥

બ્રહ્મ બોદ્ધુમશક્તઃ સન્નુપાસ્તે ચેત્તદા પુમાન્ ।
નાડ્યા મૂર્ધન્યયા બ્રહ્મલોકં ગત્વા વિમુચ્યતે ॥ ૧૧.૧૧૬॥

અત્રૈવોપાસકસ્યાસ્ય ધીશુદ્ધિશ્ચેત્તથા ત્વસૌ ।
દેહાદ્વિવિચ્ય હૃન્નિષ્ઠં બ્રહ્મત્વેનાવગચ્છતિ ॥ ૧૧.૧૧૭॥

મૃત્યુપ્રોક્તાં નાચિકેતો વિદ્યાં યોગં તથાઽખિલમ્ ।
લબ્ધ્વા બ્રહ્માપ્તવાનેવં લબ્ધ્વાઽન્યોઽપિ વિમુચ્યતે ॥ ૧૧.૧૧૮॥

વિદ્યા તત્ફલયોર્વિઘ્નશાન્ત્યર્થં સહનાવિતિ ।
મન્ત્ર જપેત્તેન વિઘ્નાઃ શામ્યન્ત્યેવ ન સંશયઃ ॥ ૧૧.૧૧૯॥

વૈરાગ્યં નાચિકેતસ્ય યથા તીવ્રં તથા પુમાન્ ।
પ્રાપ્નોતિ સેવ્યમાનઃ સન્વ્ ઇદ્યાતીર્થમહેશ્વરમ્ ॥ ૧૧.૧૨૦॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
કઠવલ્લીવિવરણો નામ એકાદશોઽધ્યાયઃ ॥ ૧૧॥

## ૧૨. શ્વેતાશ્વતરવિવરણો નામ દ્વાદશોઽધ્યાયઃ ।

શ્વેતાશ્વતરનામા યો યજુઃશાખાપ્રવર્તકઃ ।
સોઽત્યાશ્રમિભ્યઃ પ્રોવાચ વિદ્યાં વ્યાચક્ષ્મહેઽત્ર તામ્ ॥ ૧૨.૧॥

યે વેદવાદિનસ્તે તુ મીમાંસન્તે મુમુક્ષવઃ ।
જગતઃ કારણં બ્રહ્મેત્યેવં વેદેષુ ઘુષ્યતે ॥ ૧૨.૨॥

ઉત્પત્તિસ્થિતિનાશાઃ સ્યુર્યતસ્તત્કારણં ત્વિતિ ।
સામાન્યમેવ વિજ્ઞાતં વિશેષસ્તુ ન બુધ્યતે ॥ ૧૨.૩॥

કસ્માદ્વસ્તુવિશેષાન્નો જન્મ કેન ચ જીવનમ્ ।
લયઃ કસ્મિન્ વ્યવહૃતૌ સુખાદૌ કો નિયચ્છતિ ॥ ૧૨.૪॥

પિતૃભ્યામન્નતો રોગાદપિ જન્માદયસ્ત્રયઃ ।
નિયામકશ્ચ રાજેતિ વચનં બાલભાષિતમ્ ॥ ૧૨.૫॥

પિતૃરાજાદ્યશેષસ્ય જગતશ્ચિત્યતેઽધુના ।
કારણં તચ્ચ શાસ્ત્રૈકગમ્યં શાસ્ત્રં તુ નૈકધા ॥ ૧૨.૬॥

કાલઃ સ્વભાવો નિયતિર્યદૃચ્છૌ ભૂતપઞ્ચકમ્ ।
પ્રધાનં જીવ એતાનિ મતાન્યુક્તાનિ શાસ્ત્રિભિઃ ॥ ૧૨.૭॥

ઋતુકાલે ભવેદ્ગર્ભો વર્ષર્તૌ સસ્યસમ્ભવઃ ।
ઉદાહ્રિયત ઇત્યાદિ બહુધા કાલવાદિના ॥ ૧૨.૮॥

સ્વભાવવાદ્યગ્નિમુષ્ણં જલં દ્રવમુદાહરત્ ।
રૂપજ્ઞાનં ચક્ષુષૈવેત્યાહુર્નિયતિવાદિનઃ ॥ ૧૨.૯॥

ધનિકત્વાદિવ્યવસ્થા યદૃચ્છાવાદિનોચ્યતે ।
ભૂતવાદી દેહગતકાઠિન્યાદીનુદાહરત્ ॥ ૧૨.૧૦॥

પ્રધાનવાદી પુરુષાન્ સાત્ત્વિકાદીનુદાહરત્ ।
જીવવાદી કર્મવશાજ્જન્મદેવાદ્યુદાહરત્ ॥ ૧૨.૧૧॥

સર્વત્ર યુક્તેર્દૃષ્ટત્વાત્કિં તત્ત્વમિતિ ચિન્ત્યતે ।

સર્વેષામનિવાર્યત્વાત્તત્સઙ્ઘોઽસ્ત્વિતિ ચેન્ન તત્ ॥ ૧૨.૧૨॥

સ્વતન્ત્રે ચેતને જીવે સતિ કાલાદ્યચેતનાઃ ।
સમપ્રધાનભાવેન કથં સઙ્ઘીભવન્તિ તે ॥ ૧૨.૧૩॥

તર્હિ જીવો હેતુરસ્તુ તન્ન દુઃખાદિદર્શનાત્ ।
સ્વતન્ત્રઃ સ્વાત્મનો દુઃખં કુર્વન્દૃષ્ટો ન હિ ક્વચિત્ ॥ ૧૨.૧૪॥

દોષાન્ સર્વેષુ પક્ષેષુ પશ્યન્તો બહુધા તદા ।
માયાશક્તિમનિર્વાચ્યામપશ્યન્ધ્યાનયોગતઃ ॥ ૧૨.૧૫॥

દ્વિત્રિકક્ષાસુ યુક્તીનાં સત્ત્વેઽપ્યતે ન સન્તિ તાઃ ।
ન જાનામીત્યેવમન્તે વિષીદતિ હિ વાદિનઃ ॥ ૧૨.૧૬॥

યદન્તે શરણં સર્વવાદિનામવિવાદતઃ ।
તદજ્ઞાનમનિર્વાચ્યા માયેત્યાહુર્વિપશ્ચિતઃ ॥ ૧૨.૧૭॥

અનિર્વાચ્યેઽપિ યુક્તિં ચેદન્વિચ્છતિ સ મૂઢધીઃ ।
નીરૂપં ચક્ષુષા દ્રષ્ટુમિચ્છત્યેવાતિમોહિતઃ ॥ ૧૨.૧૮॥

સર્વકાર્યેષુ શક્તત્વાન્માયાઽઽક્ષેપં ન સાઽર્હતિ ।
દુર્ઘટસ્યેવ ઘટને સ્વભાવઃ સર્વસમ્મતઃ ॥ ૧૨.૧૯॥

તથાવિધાયાં માયાયાં પરાત્મા પ્રતિબિમ્બિતઃ ।
અવાન્તરાણિ વસ્તૂનિ કાલાદીન્યધિતિષ્ઠતિ ॥ ૧૨.૨૦॥

માયાવિશિષ્ટમીશાનં જગદાકારતાં ગતમ્ ।
સંસારચક્રમિત્યાહુઃ સંસારાખ્યનદીતિ ચ ॥ ૧૨.૨૧॥

પુનઃ પુનર્જાયમાનશ્ચક્રવત્પરિવર્તતે ।
અવિચ્છેદેન સંસારો નદીવત્પ્રવહેત્સદા ॥ ૧૨.૨૨॥

જીવોઽહઙ્કારોપહિતશ્ચક્રવદ્ભ્રામ્યતે સદા ।
માયોપહિત ઈશાનો જન્મસુ પ્રેરયેદમુમ્ ॥ ૧૨.૨૩॥

ઉપાધિદ્વયહીનં તુ બ્રહ્મ વેદેષુ બોધ્યતે ।
ઇત્થં વેદરહસ્યજ્ઞા ભવેયુર્બ્રહ્મતત્પરાઃ ॥ ૧૨.૨૪॥

જગત્સ્યાવ્યક્તમવ્યક્તં સૃષ્ટિસંહારયોઃ ક્રમાત્ ।
બિભર્તિ દ્વયમીશાનશ્ચિદાત્મા તુ વિમુક્તિભાક્ ॥ ૧૨.૨૫॥

ઈશાનીશાવજ્ઞાતજ્ઞૌ ભોક્તા ભોજયિતા ચ તૌ ।
તયોર્નિર્વાહિકા માયા બ્રહ્મણ્યારોપિતં ત્રયમ્ ॥ ૧૨.૨૬॥

જગદ્ભ્રમં જીવભેદં વાસના દેહધારણમ્ ।
ચતુષ્ટયં નિરાકુર્યાદભિધ્યાનાદિભિઃ ક્રમાત્ ॥ ૧૨.૨૭॥

અભિતો બ્રહ્મરૂપત્વધ્યાનાદ્યાતિ જગદ્ભ્રમઃ ।
બ્રહ્મત્વે યોજિતે સ્વસ્ય જીવભાવોઽપિ ગચ્છતિ ॥ ૧૨.૨૮॥

અદ્વયે ભાવિતે તત્ત્વે વાસના વિનિવર્તતે ।
આરબ્ધાન્તે દેહહાનિર્માયૈવં ક્ષીયતેઽખિલા ॥ ૧૨.૨૯॥

બ્રહ્મજ્ઞાનાત્પાશહાનૌ ક્ષીણક્લેશો ન જન્મભાક્ ।
પાશાશ્ચતુર્વિધાશ્ચૈવ શાસ્ત્રેષુ પ્રતિપાદિતાઃ ॥ ૧૨.૩૦॥

મલો માયા કર્મ તત્ત્વતિરોધાનં ચ તે મતાઃ ।
મલો જ્ઞાનક્રિયાશક્ત્યોશ્છાદકો દોષ ઇષ્યતે ॥ ૧૨.૩૧॥

રાગાદિહેતુર્માયોક્તા કર્મ પુણ્યં ચ પાતકમ્ ।
મૂઢૈસ્તત્ત્વતિરોધાનં સર્વૈરપ્યનુભૂયતે ॥ ૧૨.૩૨॥

ક્લેશાન્ પતઞ્જલિઃ પ્રાહ તેષ્વવિદ્યાદિરસ્મિતા ।
દ્વિતીયા દ્વેષરાગૌ ચાભિનિવેશસ્તુ પઞ્ચમઃ ॥ ૧૨.૩૩॥

ભોક્તા ભોગ્યં પ્રેરકશ્ચ ત્રયં બ્રહ્મેતિ તત્ત્વધીઃ ।
ઉપાયેન બ્રહ્મધીઃ સ્યાદરણિસ્થાગ્નિલાભવત્ ॥ ૧૨.૩૪॥

ઉપાયઃ પ્રણવેનાત્મધ્યાનં તેનૈષ લભ્યતે ।
તિલાત્તૈલાદયો યદ્વલ્લભ્યાસ્તત્તદુપાયતઃ ॥ ૧૨.૩૫॥

સર્વવ્યાપિનમાત્માનં ક્ષીરે સર્પિરિવાર્પિતમ્ ।
આત્મવિદ્યાતપોભ્યાં તમુપલભ્ય વિમુચ્યતે ॥ ૧૨.૩૬॥

યદુક્તં પ્રણવધ્યાનં સ યોગસ્તત્ર યત્નવાન્ ।
મનો બ્રહ્મણિ યુઞ્જાનસ્તત્સાક્ષાત્કુરુતે ધિયા ॥ ૧૨.૩૭॥

ઉરોંસમૂર્ધસ્થાનેષુ ત્રિષુ દેહં સમુન્નતમ્ ।
અવસ્થાપ્યાસનં જિત્વા પ્રત્યાહારં સમાચરેત્ ॥ ૧૨.૩૮॥

હૃદ્યક્ષાણાં નિરોધો યઃ પ્રત્યાહારઃ સ ઉચ્યતે ।
જયેત્પ્રાબલ્યમક્ષાણાં પ્રાણાયામેન ધૈર્યવાન્ ॥ ૧૨.૩૯॥

પ્રાણાધીનવ્યાપૃતીનામક્ષાણાં પ્રાણરોધનાત્ ।
નિરોધઃ સ્યાત્તતશ્ચિત્તં ધારયેતાપ્રમાદતઃ ॥ ૧૨.૪૦॥

સમે શુચૌ શર્કરાદિમશકાદિવિવર્જિતે ।
મનોઽનુકૂલેઽવસ્થાય દેશે ધ્યાનં સમાચરેત્ ॥ ૧૨.૪૧॥

નાડીરૂપાણિ નીહારધૂમાન્યત્ર વિભાન્તિ ચેત્ ।
બ્રહ્મસન્નિધિમાપ્નાધીરિતિ નિશ્ચીયતાં તદા ॥ ૧૨.૪૨॥

નિર્જરત્વવિતૃષ્ણત્વશુભગન્ધાદિ ચેદ્ભવેત્ ।
યોગસિદ્ધિઃ પ્રવૃત્તેતિ જ્ઞાત્વા યોગે સ્થિરો ભવેત્ ॥ ૧૨.૪૩॥

મેઘચ્છન્નં ચન્દ્રબિમ્બં મેઘાપાયેઽતિનિર્મલમ્ ।
તથૈવ બુદ્ધિચાઞ્ચલ્યશાન્તાવાત્મા પ્રસીદતિ ॥ ૧૨.૪૪॥

સ્વાત્મતત્ત્વપ્રસાદેન બ્રહ્મતત્ત્વં પ્રસીદતિ ।
શાસ્ત્રાદ્બુદ્ધં બ્રહ્મતત્ત્વમાત્મત્વેનાનુભૂયતામ્ ॥ ૧૨.૪૫॥

અજં ધ્રુવં માયિકૈસ્તૈઃ કાર્યૈઃ સર્વૈર્વિવર્જિતમ્ ।
જ્ઞાત્વા દેવં પરાત્માનં સર્વપાપૈર્વિમુચ્યતે ॥ ૧૨.૪૬॥

એષ દેવઃ સર્વદિક્ષુ વહ્ન્યાદિષ્વખિલેષુ ચ ।
વર્તતે તં વિચિન્ત્યાથ પ્રણમેત્સર્વદૈવ તમ્ ॥ ૧૨.૪૭॥

તત્ત્વયોગૌ સમુદ્દિષ્ટાવુત્તમસ્યાધિકારિણઃ ।
અથ સોપાધિકં વસ્તુ મન્દં પ્રત્યભિધીયતે ॥ ૧૨.૪૮॥

ઐન્દ્રજાલિકવન્માયાજાલવાનેક ઈશ્વરઃ ।
નિયચ્છન્ શક્તિભિર્લોકાન્ સૃજતે સંહરત્યપિ ॥ ૧૨.૪૯॥

એક એવેશ્વરસ્તાદૃક્દ્વિતીયો નૈવ વિદ્યતે ।
જનાનાં પ્રત્યગાત્માઽસૌ જગત્સૃષ્ટ્યાદિકાર્યપિ ॥ ૧૨.૫૦॥

સ વિરાડ્રૂપતાં પ્રાપ્ય વિશ્વતશ્ચક્ષુરાદિમાન્ ।
સર્વેષાં ચક્ષુરાદ્યા યે તદીયા એવ તેઽખિલાઃ ॥ ૧૨.૫૧॥

યો દેવાનામિતિ પ્રોક્તૈસ્ત્રિભિર્મન્ત્રૈસ્તમીશ્વરમ્ ।
મુમુક્ષુઃ પ્રાર્થયેતૈવ સદા બુદ્ધિવિશુદ્ધયે ॥ ૧૨.૫૨॥

તતઃ શુદ્ધમતિર્બ્રહ્મ સર્વભૂતેષ્વવસ્થિતમ્ ।

અન્તર્બહિશ્ચ સંવ્યાપ્તં જ્ઞાત્વા સ્યાન્મૃતિવર્જિતઃ ॥ ૧૨.૫૩॥

શ્વેતાશ્વતરનામાઽહં પુરુષં વેદ્મિ તં પ્રભુમ્ ।
અન્યોઽપિ તં વિદિત્વૈવ મૃત્યુમત્યેતિ નાન્યથા ॥ ૧૨.૫૪॥

યસ્માત્પરં નાપરં વા કિઞ્ચિદસ્તિ તદદ્વયમ્ ।
વૃક્ષવન્નિશ્ચલં તેન પૂર્ણં સર્વમિદં જગત્ ॥ ૧૨.૫૫॥

એતદ્વિદુર્મૃત્યુહીનાસ્તે સ્યુર્યે તુ ન તદ્વિદુઃ ।
તે દુઃખમેવ ગચ્છન્તિ ન તત્સોપાધિકેક્ષણે ॥ ૧૨.૫૬॥

દુર્લક્ષ્યો નિરુપાધ્યાત્મા સૂક્ષ્મધીવર્જિતૈર્નરૈઃ ।
સુલક્ષ્ય એવ સોપાધિસ્તસ્માદેવં સ્મરેદમુમ્ ॥ ૧૨.૫૭॥

સર્વાનન શિરોગ્રીવઃ સર્વભૂતગુહાશયઃ ।
વશી સર્વસ્ય લોકસ્ય સ્થાવરસ્ય ચરસ્ય ચ ॥ ૧૨.૫૮॥

વિશ્વાકારજનેઃ પ્રાક્ચ સર્વવ્યવહૃતિક્ષમઃ ।
અપાણિપાદો જવનો ગ્રહીતા સર્વશક્તિયુક્ ॥ ૧૨.૫૯॥

અણોરણીયાન્દુર્લક્ષ્યો મહીયાન્મહતઃ સ્ફુટઃ ।
ઇત્યાત્માનં શાસ્ત્રદૃષ્ટ્યા પશ્યતો નાસ્તિ દુઃખિતા ॥ ૧૨.૬૦॥

સ્થૂલદર્શી તુ સાકારે સર્વાત્મ્યે વાસિતે સતિ ।
નિરાકારં તતો બોદ્ધું પ્રાર્થયેતૈશ્વરં વપુઃ ॥ ૧૨.૬૧॥

ય એકોઽવર્ણ ઇત્યાદિ સ્તુવન્મન્ત્રચતુષ્ટયાત્ ।
પ્રાર્થ્યાથ માયાજીવૌ ચ બુદ્ધસુપ્તૌ (બન્ધમુક્તૌ/બદ્ધમુક્તૌ) વિચારયેત્ ॥ ૧૨.૬૨॥

લોકે કાચિદજા વર્ણત્રયોપેતા બહુપ્રજાઃ ।
સૃજતે તામજઃ કશ્ચિત્સેવતેઽન્યસ્તુ તાં ત્યજેત્ ॥ ૧૨.૬૩॥

તેજોઽબન્નાત્મિકા તદ્વન્માયા વર્ણૈસ્ત્રિભિર્યુતા ।
આસક્તો ભજતે માયાં વિરક્તસ્તુ વિમુચ્યતિ ॥ ૧૨.૬૪॥

વિરક્તઃ કર્ત્રકર્તારૌ વિચિત્યાત્સ્વસ્ય વિગ્રહે ।
ચિચ્છાયાવાનહઙ્કારઃ કર્તા ચિદ્ભાતિ કેવલા ॥ ૧૨.૬૫॥

પાદપે ક્ષુધિતઃ પક્ષી ફલમત્તીતરઃ પુનઃ ।
પશ્યન્નાસ્તે તથા વિદ્યાદ્ભોક્તૃતત્સાક્ષિણાવુભૌ ॥ ૧૨.૬૬॥

ચિચ્છાયાગતભોક્તૃત્વં સાક્ષિણ્યારોપ્યતે ભ્રમાત્ ।
અનીશ્વરોઽયં સાક્ષીતિ શોકો ભવતિ મોહતઃ ॥ ૧૨.૬૭॥

નિત્યતૃપ્તેશ્વરત્વં તત્સાક્ષિતત્ત્વં તદીક્ષતે ।
યદા તદા વીતશોકો મહિમાનમવાપ્નુયાત્ ॥ ૧૨.૬૮॥

ઋચો દેવાશ્ચ શબ્દાર્થા યસ્મિન્નાત્મનિ કલ્પિતાઃ ।
યસ્તં ન વેદ તસ્યર્ચા કિં સ્યાદ્યો વેત્ત્યસૌ કૃતી ॥ ૧૨.૬૯॥

છન્દાંસિ યજ્ઞાનન્યચ્ચ માયાવી સૃજતેઽખિલમ્ ।
જીવાત્મના પ્રવિશ્યાસ્તે સન્નિરુદ્ધો વપુષ્યયમ્ ॥ ૧૨.૭૦॥

માયાં તુ પ્રકૃતિં વિદ્યાન્માયિનં તુ મહેશ્વરમ્ ।
તસ્યાવયવભૂતૈસ્તુ વ્યાપ્તં સર્વમિદં જગત્ ॥ ૧૨.૭૧॥

ઈશો યઃ સ્વત એકઃ સન્ જીવાકારૈરનેકશઃ ।
યોનિં યોનિં વ્રજત્યેતમીશં જ્ઞાત્વા ન સંસરેત્ ॥ ૧૨.૭૨॥

પ્રતિબન્ધસ્ય બાહુલ્યાદ્યો દેવેત્યાદિમન્ત્રતઃ ।
પુનઃ પુનર્ભજેતેશં પ્રતિબન્ધનિવૃત્તયે ॥ ૧૨.૭૩॥

અદૃષ્ટપ્રતિબન્ધો યો નિવર્ત્ય ભજનેન તમ્ ।
દૃષ્ટો યઃ પ્રતિબન્ધસ્તં વિચારેણ જયેત્પુનઃ ॥ ૧૨.૭૪॥

સૂક્ષ્મેભ્યઃ પરમાણુભ્યોઽપ્યતિસૂક્ષ્મો ન લક્ષ્યતે ।
બહિર્મુખૈઃ સ્વતઃ સોઽયં વિશ્વં વ્યાપ્યાઽવતિષ્ઠતે ॥ ૧૨.૭૫॥

જગતઃ પાલનેનાયમસ્તીત્યાદૌ વિબુધ્યતામ્ ।
બ્રહ્મર્ષયો દેવતાશ્ચ યોગેનૈતં વિજાનતે ॥ ૧૨.૭૬॥

ક્ષીરે ઘૃતનિમિત્તં યત્સારં તદ્ધીમતેક્ષ્યતે ।
તથા વૃત્તિનિરોધિન્યા સૂક્ષ્મં વસ્તુ ધિયેક્ષ્યતામ્ ॥ ૧૨.૭૭॥

દિવારાત્રિસ્તમશ્ચાન્યદ્યસ્મિન્નાસ્તિ ન કિઞ્ચન ।
નોર્ધ્વં ન તિર્યગ્તદ્વસ્તુ ન દૃષ્ટાન્તોઽસ્ય વિદ્યતે ॥ ૧૨.૭૮॥

દૃગ્ગોચરે તસ્ય રૂપં નાસ્ત્યતઃ કોઽપિ નેક્ષતે ।
અજાત ઇતિ મન્ત્રાભ્યામન્તર્દૃષ્ટ્યા ભજેત તેમ્ ॥ ૧૨.૭૯॥

પુનશ્ચૈવં વિવેક્તવ્યં વિદ્યાવિદ્યે નિજાત્મગે ।
અવિદ્યયા બદ્ધ્યતેઽસૌ વિદ્યયા તુ વિમુચ્યતે ॥ ૧૨.૮૦॥

અવિદ્યાકલ્પિતોપાધિભેદાદીશત્વજીવતે ।
ચૈતન્યસ્ય ભવેતાં યે કથ્યેતે તે ક્રમાદિહ ॥ ૧૨.૮૧॥

હિરણ્યગર્ભમુત્પન્નમાદૌ જ્ઞાનૈર્બિભર્તિ યઃ ।
એકૈકમન્તઃકરણં બહુધા વિકરોત્યયમ્ ॥ ૧૨.૮૨॥

અધશ્ચોર્ધ્વં દિશઃ સર્વા ભ્રાજતેઽસૌ પ્રકાશયન્ ।
ભારં વહેદ્યથાઽનડ્વાન્ જગદ્ભારં વહેત્તથા ॥ ૧૨.૮૩॥

યો ભાવાન્ ક્ષીરબીજાદીન્દધિવૃક્ષાદિરૂપતઃ ।
પરિણામં નયેત્સોઽયં ગુણાંસ્ત્રીન્ વિનિયોજયેત્ ॥ ૧૨.૮૪॥

અવિદ્યાકૃતમીશત્વં તદિદં સ્પષ્ટમીરિતમ્ ।
વેદગુહ્યોપનિષદા તસ્ય તત્ત્વમુદીરિતમ્ ॥ ૧૨.૮૫॥

અવિદ્યાકૃતજીવત્વમથ સ્પષ્ટમુદીર્યતે ।
સત્ત્વં રજસ્તમશ્ચેતિ ગુણૈર્જીવઃ સમન્વિતઃ ॥ ૧૨.૮૬॥

સ ફલાર્થં કર્મ કુર્યાદ્ભુઙ્ક્તે તસ્યૈવ તત્ફલમ્ ।
દક્ષિણોદગધોમાર્ગૈઃ સંસરત્યેષ કર્મભિઃ ॥ ૧૨.૮૭॥

અઙ્ગુષ્ઠમાત્રહૃન્નિષ્ઠઃ સ્વપ્રકાશઃ સ સૂર્યવત્ ।
અહઙ્કારોપાધિકઃ સન્ સઙ્કલ્પાન્ કુરુતે બહૂન્ ॥ ૧૨.૮૮॥

બુદ્ધિવૃત્ત્યાત્મચૈતન્યસંયોગાદેષ ચેતનઃ ।
સ સઙ્કોચવિકાસાભ્યાં તૈસ્તૈર્દેહૈઃ સમો ભવેત્ ॥ ૧૨.૮૯॥

નૈવ સ્ત્રી ન પુમાનેષ નૈવ ચાયં નપુંસકઃ ।
યદ્યચ્છરીરમાદત્તે તેન તેન સ કથ્યતે ॥ ૧૨.૯૦॥

અવિદ્યાધીનજીવેશાવુક્તૌ યત્તત્ત્વમેતયોઃ ।
તદ્વિદ્યાસિદ્ધયે કાલસ્વભાવાદીન્ વિચારયેત્ ॥ ૧૨.૯૧॥

મૂલકારણતૈતેષાં ન યુક્તા જનિમત્ત્વતઃ ।
દેવસ્ય મહિમા યોઽસૌ માયાખ્યસ્તસ્ય યુજ્યતે ॥ ૧૨.૯૨॥

તન્મહિમ્નાવૃતં સર્વં કાલં ચ કલયત્યસૌ ।
ભૂતભવ્યાદિરૂપેણ ભિન્નોઽસૌ જાયતે તતઃ ॥ ૧૨.૯૩॥

જલાગ્ન્યાદિસમુત્પત્તૌ સ્વભાવઃ સહ જાયતે ।

યદૃચ્છા પઞ્ચભૂતાનિ પ્રધાનં ચેતિ માયિકમ્ ॥ ૧૨.૯૪॥

મૂલકારણતાઽસ્ત્યેવ માયાયા જન્યભાવતઃ ।
અવાન્તરં કારણત્વં કાલાદીનાં ભવત્વિદમ્ ॥ ૧૨.૯૫॥

એકં પ્રધાનં દ્વે પુણ્યપાપે સત્ત્વાદિકાસ્ત્રયઃ ।
અષ્ટૌ પ્રકૃતયો ભૂમિમુખ્યાસ્તૈર્જાયતે વપુઃ ॥ ૧૨.૯૬॥

યો માયાવી સ સર્વેષામાદિઃ કાલત્રયાત્પરઃ ।
વિશ્વરૂપં સ્વચિત્તસ્થં તમુપાસ્ય પ્રસાદયેત્ ॥ ૧૨.૯૭॥

સંસારવૃક્ષાત્કાલાદિશાખાયુક્તાત્પરોઽવ્યયમ્ ।
ધર્માવહં પાપનુદં સ્વચિત્તસ્થં તમીક્ષ્યતામ્ ॥ ૧૨.૯૮॥

વિષ્ણ્વાદીનામીશ્વરાણાં પરમં તં મહેશ્વરમ્ ।
દેવાનાં પરમં દેવં વિદામોઽસ્ય પ્રસાદતઃ ॥ ૧૨.૯૯॥

ન તસ્ય વપુરક્ષં ચ વિદ્યતે તત્સમોઽપિ ન ।
પરાસ્ય શક્તિર્વિવિધા બલજ્ઞાનક્રિયાદિકા ॥ ૧૨.૧૦૦॥

સોઽધિષ્ઠાનતયા સર્વકારણં કારણાધિપઃ ।
યે જીવા અધિપસ્તેષાં નાન્યોઽસ્યાધિપતિર્ભવેત્ ॥ ૧૨.૧૦૧॥

યસ્તન્તુનાભ ઇત્યાદિમન્ત્રેણ પ્રાર્થયેત્તતઃ ।
એકો દેવઃ સર્વદેહે ગૂઢો વ્યાપી ચ સર્વતઃ ॥ ૧૨.૧૦૨॥

સર્વપ્રાણ્યન્તરાત્માઽસાવધ્યક્ષઃ સર્વકર્મણામ્ ।
સર્વભૂતાશયઃ સાક્ષી નિર્ગુણઃ શુદ્ધચિદ્વપુઃ ॥ ૧૨.૧૦૩॥

યે તુ પશ્યન્તિ તં ધીરાસ્તેષાં સ્યાચ્છાશ્વતં સુખમ્ ।
નિત્યં તં ચેતનં બુદ્ધ્વા પ્રાપ્નુયાચ્છાન્તિમક્ષયામ્ ॥ ૧૨.૧૦૪॥

અશક્યં યત્સુખં વક્તું તદેતદનુભૂયતે ।
ઇતિ તત્ત્વવિદઃ પ્રાહુરુપાયઃ શ્રૂયતામિહ ॥ ૧૨.૧૦૫॥

વિવેકયોગસ્તદ્બોધહેતુસ્તત્ત્વવિવેકતઃ ।
યથાશાસ્ત્રં વિવિચ્યાનુભવન્તિ દૃઢયોગતઃ ॥ ૧૨.૧૦૬॥

સૂર્યચન્દ્રાદયઃ સર્વભાસકા અપિ તત્સુખમ્ ।
નૈવ ભાસયિતું શક્તા ભાસ્યન્તે કિન્તુ તેન તે ॥ ૧૨.૧૦૭॥

ચિત્સુખાત્મા સ્વપ્રકાશો ભાસતે પ્રથમં સ્વયમ્ ।
સૂર્યાદયસ્તસ્ય ચિતા ભાસન્તે ન ચિતાઽન્યયા ॥ ૧૨.૧૦૮॥

એકાકી સૂર્યવદ્યોઽયં સર્વં વ્યાપ્નોતિ ભાસયન્ ।
તં યો વેત્તિ સ એવેશો નાસ્ત્યન્યો હેતુરીશને ॥ ૧૨.૧૦૯॥

જ્ઞાન્યેવ વિશ્વકૃત્કાલકાલઃ સત્ત્વાદિભાસકઃ ।
પ્રધાનજીવયોઃ સ્વામી હેતુઃ સંસારમોક્ષયોઃ ॥ ૧૨.૧૧૦॥

વિદ્યાફલમિદં બાહ્યધીયો ન સ્યાત્કદાચન ।
તદ્ધીશાન્ત્યૈ પ્રાર્થયેત તં યો બ્રહ્માણમીશ્વરમ્ ॥ ૧૨.૧૧૧॥

હિરણ્યગર્ભં સૃષ્ટ્વાદૌ વેદાંસ્તસ્મૈ દદાતિ યઃ ।
તં ભાસકં સ્વાત્મધિયો મુમુક્ષુઃ શરણં ભજે ॥ ૧૨.૧૧૨॥

નિષ્કલં નિષ્ક્રિયં શાન્તં નિરવદ્યં નિરઞ્જનમ્ ।
ભજે સ્વયં ભાસમાનં તં દગ્ધેન્ધનવહ્નિવત્ ॥ ૧૨.૧૧૩॥

નિષ્કલોઽવયવૈર્હીનો હેતુહીનો નિરઞ્જનઃ ।
નિરિન્ધનાગ્નિસામ્યં તુ માયાતત્કાર્યવર્જનાત્ ॥ ૧૨.૧૧૪॥

તાદૃશં પરમાત્માનં વિદિત્વૈવ વિમુચ્યતે ।
વિના જ્ઞાનં ન મુક્તિઃ સ્યાદિતરૈઃ કોટિસાધનૈઃ ॥ ૧૨.૧૧૫॥

યદા ચર્મવદાકાશં વેષ્ટયિષ્યતિ માનવાઃ ।
તદા દેવમવિજ્ઞાય મુક્તિર્ન ત્વસ્તિ તદ્ધયમ્ ॥ ૧૨.૧૧૬॥

તપસા દેવમારાધ્ય શ્વેતાશ્વતરનામકઃ ।
અત્યાશ્રમિભ્યઃ પ્રોવાચ બ્રહ્મવિદ્યામૃષિપ્રિયામ્ ॥ ૧૨.૧૧૭॥

વેદાન્તે પરમં ગુહ્યં નાનોપાખ્યાનવર્ણિતમ્ ।
નાઽપ્રશાન્તાય દાતવ્યં દેયં શિષ્યાય ધીમતે ॥ ૧૨.૧૧૮॥

યસ્ય દેવે પરા ભક્તિર્યથા દેવે તથા ગુરૌ ।
તસ્યૈતે કથિતા હ્યર્થાઃ પ્રકાશન્તે મહાત્મનઃ ॥ ૧૨.૧૧૯॥

અન્તઃપ્રવિષ્ટઃ શાસ્તેતિ યોઽતર્યામી શ્રુતીરિતઃ ।
સોઽસ્માન્મુખ્યગુરુઃ પાતુ વિદ્યાતીર્થમહેશ્વરઃ ॥ ૧૨.૧૨૦॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
શ્વેતાશ્વતરવિવરણો નામ દ્વાદશોઽધ્યાયઃ ॥ ૧૨॥

## ૧૩. બૃહદારણ્યકે કાણ્વવિદ્યાપ્રકાશો નામ ત્રયોદશોઽધ્યાયઃ ।

કાણ્વો યાજુષશાખાયાં નાનાખ્યાનોપબૃંહિતામ્ ।
બ્રહ્મવિદ્યામુવાચેમાં સઙ્ગ્રહેણ બ્રવીમ્યહમ્ ॥ ૧૩.૧॥

બૃહદારણ્યકપ્રોક્તૈઃ વિરાટ્સૂત્રાદ્યુપાસનૈઃ ।
સ્યાદ્વિરાડાદિરૂપત્વં સ વિરાડિહ કથ્યતે ॥ ૧૩.૨॥

ઉપાસ્તેર્મહિમા તેન ભાત્યુપાસનમિચ્છતઃ ।
મુમુક્ષુસ્તુ વિરાડાદિદોષાન્દૃષ્ટ્વા વિરજ્યતે ॥ ૧૩.૩॥

અધ્યાયસ્ય તૃતીયસ્ય ચતુર્થબ્રાહ્મણે શ્રુતમ્ ।
વૈરાજં વપુરેતચ્ચ શરીરાન્તરકારણમ્ ॥ ૧૩.૪॥

ઇદં નરગવાશ્વાદિ વપુસ્તત્સૃષ્ટિતઃ પુરા ।
આત્માસીત્પુરુષાકારો બ્રહ્માણ્ડાખ્યશરીરભૃત્ ॥ ૧૩.૫॥

પ્રત્યગ્રૂપઃ પરાગ્રૂપાદ્વ્યાવૃત્તોઽનુભવાત્મકઃ ।
પ્રથતે યઃ સ આત્મેતિ પ્રાહુરાત્મવિદો બુધાઃ ॥ ૧૩.૬॥

બહિર્મુખેન ન જ્ઞાતં પ્રત્યક્તત્ત્વમતિં વિના ।
યદજ્ઞાતં પરં તત્ત્વં તદ્ભવેત્સર્વકારણમ્ ॥ ૧૩.૭॥

વિરાડપિ તતો જજ્ઞે ત્રૈલોક્યાત્મકદેહવાન્ ।
યથોક્તજ્ઞાનકર્મભ્યામેવં પ્રત્યગ્વિરાડભૂત્ ॥ ૧૩.૮॥

સ એષ પરમોઽપ્યાત્મા કોશપઞ્ચકધારણાત્ ।
સંવૃત્તઃ પુરુષાકારઃ કામાવિદ્યાદ્યુપપ્લુતઃ ॥ ૧૩.૯॥

સોઽનુવીક્ષ્યાત્મમોહોત્થં વૈરાજં રૂપમાત્મનઃ ।
નાપશ્યદપરં કિઞ્ચિત્સોઽહમસ્મીત્યથાભ્યધાત્ ॥ ૧૩.૧૦॥

અહમિત્યેવ નામાસ્ય સમ્પન્નં તેન લૌકિકાઃ ।
તત્પૃષ્ટાઃ (તત્સૃષ્ટાઃ) સ્વં સ્વમાત્માનમહમિત્યભિચક્ષતે ॥ ૧૩.૧૧॥

કોશપઞ્ચકયુક્તસ્ય પ્રત્યક્તત્ત્વસ્ય નામ તત્ ।
વિરાજા કૃતમિત્યેતત્સર્વસાધારણં મતમ્ ॥ ૧૩.૧૨॥

અસાધારણદેહસ્ય તત્તત્પિત્રાદિના કૃતમ્ ।

દેવદત્તાદિકં નામ જઘન્યં પૂર્વનામતઃ ॥ ૧૩.૧૩॥

કસ્ત્વમિત્યેષ પૃષ્ટઃ સન્નાદાવહમિતિ બ્રુવન્ ।
પશ્ચાજ્જઘન્યં નામેદં વક્તિ જિજ્ઞાસવે જનઃ ॥ ૧૩.૧૪॥

ચિદેકરસ આત્મૈવ કશ્મલે કોશપઞ્ચકે ।
એકતામભિસમ્પન્નોઽહઙ્કારોત્યભિમાનતઃ ॥ ૧૩.૧૫॥

બહવોઽતીતકલ્પેઽન્ય આસન્યદ્યપ્યુપાસકાઃ ।
તથાપિ ભાવનાધિક્યાદેક એવ વિરાડભૂત્ ॥ ૧૩.૧૬॥

નિઃશેષેણાસુરં પાપં દગ્ધવાન્ બહુજન્મભિઃ ।
તતો વિરાડભૂદન્યોઽપ્યેવં દગ્ધ્વા ભવેદ્વિરાટ્ ॥ ૧૩.૧૭॥

દુગ્ધપાપોઽપ્યનાત્મજ્ઞો દેહાદાવભ્યમન્યત ।
તતઃ સ્વનાશમાશઙ્ક્ય સોઽબિભેદસ્મદાદિવત્ ॥ ૧૩.૧૮॥

સ્રજં હિ કલ્પયિત્વાસ્તે તદ્ભયાદાકુલેન્દ્રિયઃ ।
એવં નશ્વરદેહાદિ પ્રતીચ્યારોપ્ય કમ્પતે ॥ ૧૩.૧૯॥

આલોચયેત્સ્રજસ્તત્ત્વં ભીતિધ્વસ્ત્યૈ યથા નરઃ ।
વિરાડાલોચયત્તદ્વત્પ્રતીચસ્તત્ત્વમાદરાત્ ॥ ૧૩.૨૦॥

આલોચયન્યથા તત્ત્વમપાસ્તધ્વાન્તતદ્ભયમ્ ।
અનન્યાનુભવં સાક્ષાદ્દદર્શૈકાત્મ્યમાત્મનિ ॥ ૧૩.૨૧॥

પ્રત્યગ્યાથાત્મ્યવિજ્ઞાનશિખાપ્લુષ્ટમહાતમાઃ ।
આત્માશેષપુમર્થોઽયં સોઽમન્યત તતો વિરાટ્ ॥ ૧૩.૨૨॥

દેહેન્દ્રિયમનોબુદ્ધિભાવાભાવાદિસાક્ષિણઃ ।
પ્રતીચોઽન્યત્કિમપ્યત્ર નાસ્તિ કસ્માદ્બિભેમ્યહમ્ ॥ ૧૩.૨૩॥

અન્વયવ્યતિરેકાભ્યાં સ્વમાત્માનં યદા પુમાન્ ।
પ્રતીચ્યેવાનુસન્ધત્તે બ્રહ્માસ્મીતિ તદેક્ષતે ॥ ૧૩.૨૪॥

પ્રત્યગ્દૃષ્ટ્યા તદજ્ઞાનં ન તજ્જં ચેક્ષતે સ્વતઃ ।
બ્રહ્મ પ્રતીચોરૈકાત્મ્યાત્તદ્દૂરીકૃત્ય ગર્જતિ ॥ ૧૩.૨૫॥

પ્રત્યક્તા બ્રહ્મણો રૂપં બ્રહ્મતા ચાત્મનઃ સ્વતઃ ।
એવં સતિ કુતો મે ભીરિતિ વિદ્વાઁસ્ત્રપાયતે ॥ ૧૩.૨૬॥

બ્રહ્મવિદ્યામૃતે નાન્યદ્ભયહેતુવિનાશકૃત્ ।
અતોઽવબોધાદેવાસ્ય ભયં વીયાય સર્વતઃ ॥ ૧૩.૨૭॥

કસ્માદભેષ્યદીશોઽયં દ્વિતીયાત્ખલુ તદ્ભયમ્ ।
દ્વિતીયો નેશ્વરસ્યાસ્તિ તતો નિર્ભય એવ સઃ ॥ ૧૩.૨૮॥

નનુ પ્રજાપતેરૈક્યદર્શનં કુત ઉદ્બભૌ ।
શાસ્ત્રાચાર્યાદિતદ્ધેતોરસત્વાત્તદસમ્ભવઃ ॥ ૧૩.૨૯॥

ઉચ્યતે મહતા પુણ્યપુઞ્જપાકેન તત્પદમ્ ।
વૈરાજં લબ્ધવાંસ્તેન જ્ઞાનમસ્યોદ્બભૌ સ્વતઃ ॥ ૧૩.૩૦॥

જ્ઞાનમપ્રતિઘં યસ્ય વૈરાગ્યં ચ જગત્પતેઃ ।
ઐશ્વર્યં ચૈવ ધર્મશ્ચ સહસિદ્ધમિતિ સ્મૃતિઃ ॥ ૧૩.૩૧॥

એવં સતિ સ્વયંભાતવેદત્વાદ્બુદ્ધવાન્ સ્વયમ્ ।
બોધધ્વસ્તાત્મમોહસ્યાપ્યરતિસ્સમજાયત ॥ ૧૩.૩૨॥

સ્વાભીષ્ટવસ્ત્વલાભેન ચેતસો યાનવસ્થિતિઃ ।
અરતિઃ સા સિસૃક્ષોઃ સા વસ્ત્વલાભાદજાયત ॥ ૧૩.૩૩॥

નનુ વિજ્ઞાનવિધ્વસ્તાવવિદ્યાયાઃ કુતોઽરતિઃ ।
ધ્વસ્તાન્ધ્યસ્યાપિ સા ચેત્સ્યાતનિર્મોક્ષઃ પ્રસજ્યતે ॥ ૧૩.૩૪॥

અપ્યુત્પન્નાત્મબોધાનામધિકારાસમાપ્તિતઃ ।
અરત્યાદિ યથા દૃષ્ટં તથૈવ સ્યાત્પ્રજાપતેઃ ॥ ૧૩.૩૫॥

અધિકારો યસ્ય યાવાન્ ભુક્તે ભોગે સ તાવતિ ।
કુતો ન મુચ્યતે મુક્તિ પ્રતિબન્ધસ્ય સઙ્ક્ષયાત્ ॥ ૧૩.૩૬॥

સત્યામપ્યાત્મવિદ્યાયાં યો દોષો ન નિવર્તતે ।
તેન દોષેણાનુમેયોઽધિકારો વિદુષામસૌ ॥ ૧૩.૩૭॥

પ્રબલારબ્ધવેગેન કામુકઃ સન્ પ્રજાપતિઃ ।
એકં દેહં સ્વભોગાર્થમસૃજન્મિથુનાત્મકમ્ ॥ ૧૩.૩૮॥

તદ્દ્વેધાપાતયદ્દેહમભૂતાં દમ્પતી ઉભૌ ।
મનુઃ પુમાન્ વધૂર્યોષા શતરૂપાત્ર નામતઃ ॥ ૧૩.૩૯॥

તયોઃ સમ્ભોગતો જાતા મનુષ્યા દમ્પતી પુનઃ ।
નાનાદેહાનગૃહ્ણીતાં તાભ્યાં દ્વન્દ્વાનિ જજ્ઞિરે ॥ ૧૩.૪૦॥

ગવાશ્વરાસભાજાવિપ્રમુખા આપિપીલિકમ્ ।
પ્રાણિનો મિથુનાત્માનો જાતાઃ કર્માનુસારતઃ ॥ ૧૩.૪૧॥

મુખબાહૂરુપાદેભ્યો વહ્નીન્દ્રવસુભૂમિકાઃ ।
દેવતા અસૃજદ્બ્રહ્મા ચાતુર્વર્ણ્યનિયામિકાઃ ॥ ૧૩.૪૨॥

તત્રેન્દ્રાદીન્ ભિન્નદેવાન્મન્યન્તે યાગભૂમિષુ ।
કર્મિણસ્તદસજ્જ્ઞેયં વિરાડેવાખિલા ઇમે ॥ ૧૩.૪૩॥

અવિદ્વદધિકારિત્વાત્કર્મણાં ભિન્નદેવતાઃ ।
ઉચ્યન્તાં કર્મકાણ્ડેન વસ્તુતસ્તુ ન તત્તથા ॥ ૧૩.૪૪॥

વિરાજો જીવતામાહુઃ કેચિદન્યે પરાત્મતામ્ ।
ઉભયં યુક્તમેવૈતત્વિવક્ષાયાઃ વિશેષતઃ ॥ ૧૩.૪૫॥

સોપાધિકવિવક્ષાયાં જીવ એવ વિરાટ્ ભવેત્ ।
નિરુપાધિવિવક્ષાયાં પરમાત્મૈવ નેતરઃ ॥ ૧૩.૪૬॥

વયમપ્યેવમેવેતિ યદ્યુચ્યેત તથાસ્તુ તત્ ।
સૃષ્ટ્વા વિરાટ્ ભોક્તૃવર્ગં ભોગ્યમન્નમચીક્લૃપત્ ॥ ૧૩.૪૭॥

પૂર્વજન્મનિ મર્ત્યઃ સન્  કૃત્વાસૌ જ્ઞાનકર્મણી ।
અમૃતાનસૃજદ્દેવાન્યદ્યપ્યેતન્મહાદ્ભુતમ્ ॥ ૧૩.૪૮॥

સૃષ્ટ્વાખિલમવેત્સૃષ્ટમહમસ્મ્યખિલં જગત્ ।
ઈદૃશો મહિમા જ્ઞેયઃ કૃતયોર્જ્ઞાનકર્મણોઃ ॥ ૧૩.૪૯॥

વર્ણિતેત્થં પ્રયત્નેન જ્ઞાનકર્મફલોર્જિતઃ ।
ઉપાસિતુઃ પ્રવૃત્ત્યર્થં નિવૃત્ત્યર્થં મુમુક્ષુતઃ ॥ ૧૩.૫૦॥

સૃષ્ટ્યૈશ્વર્યે સ્વતન્ત્રત્વં તત્કામી બહુ મન્યતે ।
દોષાનેવ વિવેક્યત્ર બહૂનુત્પ્રેક્ષતે ધિયા ॥ ૧૩.૫૧॥

અવિદ્યા પટસંવીતચક્ષુષામિયદેવ હિ ।
વૈદિકં સાધનં જ્ઞેયં જ્ઞાનકર્મસ્વભાવકમ્ ॥ ૧૩.૫૨॥

તચ્ચ કર્ત્રાદિસાપેક્ષં વિરચ્ચ્યન્તફલપ્રદમ્ ।
જન્માદિવિક્રિયાષટ્કયુતં સાતિશયં જડમ્ ॥ ૧૩.૫૩॥

દુઃખાનિ ચ વિચિત્રાણિ સન્ત્યેવ બહુજન્મસુ ।

અનેન ક્લેશયુક્તેન દુર્લભં તપસા વિના ॥ ૧૩.૫૪॥

કથઞ્ચિત્સાધિતેઽપ્યસ્મિન્ પરાનન્દઘનં પ્રભુમ્ ।
અન્તર્ભાવ્ય વિરાટ્પિણ્ડે સ્થાતવ્યં હિ જુગુપ્સિતે ॥ ૧૩.૫૫॥

ન કેવલં પિણ્ડવાસસ્તાદાત્મ્યં ચાભિમાનતઃ ।
તતો ભયં ભક્ષણાય પિતુર્મુખવિદારણાત્ ॥ ૧૩.૫૬॥

ચાણ્ડાલાનાં તુ નેયં ભીઃ કિન્તુ પન્નગજન્મનઃ ।
કો ભેદઃ સ્યાદ્વિરાડ્જન્મન્યુરગાત્પુત્રભક્ષિણઃ ॥ ૧૩.૫૭॥

કૃચ્છ્રાદ્ભયે પ્રશાન્તેઽપિ જગ્રાહાથારતિગ્રહઃ ।
ક્રિયમાણે પ્રતીકારે ગર્દભાદિશરીરતા ॥ ૧૩.૫૮॥

એકયોનૌ સકૃજ્જાતઃ ક્લેશં સોઢું ન શક્નુયાત્ ।
અનન્તયોનિષ્વસકૃજ્જાયમાનસ્ય કા કથા ॥ ૧૩.૫૯॥

નિસ્તરેદ્વિદ્યયા ચેત્કિં બકબન્ધપ્રયાસતઃ ।
અથ વિદ્યામુપેક્ષ્યોર્ધ્વં કિં વિદ્યાં પ્રાર્થયિષ્યતે ॥ ૧૩.૬૦॥

ક્લેશેન મહતોપાસ્ય બહુયોનીઃ પ્રવિશ્ય ચ ।
વિદ્યાન્વેષણતઃ શ્રેય ઇદાનીમેવ વેદનમ્ ॥ ૧૩.૬૧॥

એવં વિચાર્ય બહુશસ્તૂર્ણમેવ મુમુક્ષતિ ।
નિવૃત્તઃ સર્વબાહ્યાર્થાત્પ્રમેયં માતુમર્હતિ ॥ ૧૩.૬૨॥

અધિકારી સાધિતૈઃ સ્યાદેવં ફલવિચારતઃ ।
તેન પ્રમાતું યદ્યોગ્યં તદિદાનીં નિરૂપ્યતે ॥ ૧૩.૬૩॥

ઉપાદેયસ્ય મેયસ્ય વાચ્યા સમ્ભાવના યથા ।
હેયસંસારહેતુશ્ચ વક્તવ્યો યત્નતસ્તથા ॥ ૧૩.૬૪॥

સંસારાખ્યમહાવ્યાધેઃ કિં મૂલમિતિ ચિન્તિતે ।
તદ્ધ્વસ્તયે ચિકિત્સેયં તદા ફલવતી ભવેત્ ॥ ૧૩.૬૫॥

અવિજ્ઞાતનિદાનેન ભિષજા યચ્ચિકિત્સિતમ્ ।
તદ્ધ્વસ્તયે ચિકિત્સેયં તદા ફલવતી ભવેત્ ॥ ૧૩.૬૬॥

માયામૂલં દ્વૈતમેતદિત્યજ્ઞાતે કથં ત્વિદમ્ ।
અદ્વૈતં બુદ્ધિમારોહેત્સ્યાદતોઽન્યા તુ નૈવ ધીઃ ॥ ૧૩.૬૭॥

દેહાદૃષ્ટિક્રિયાકર્તૃરાગાધ્યાસાર્થસપ્તકાત્ ।
દ્વારા સંસારહેતુઃ સ્યાદાત્માજ્ઞાનં તુ લોકવત્ ॥ ૧૩.૬૮॥

આત્માજ્ઞાનમનર્થાનાં મૂલં લોકેઽપિ નેતરત્ ।
સ્વપરાક્રમમજ્ઞાત્વા યુધ્યન્મ્રિયત એવ હિ ॥ ૧૩.૬૯॥

એવં સ્વાત્માનમજ્ઞાત્વા સંસારાનર્થમાપ્નુયાત્ ।
અનર્થાજ્ઞાનયોઃ કાર્યકારણત્વં પ્રપઞ્ચ્યતે ॥ ૧૩.૭૦॥

જિહાસિતસ્યાનર્થસ્ય હેતુઃ સ્યાત્સશરીરતા ।
ન પ્રિયાપ્રિયવિચ્છેદઃ સશરીરસ્ય કસ્યચિત્ ॥ ૧૩.૭૧॥

ધર્માધર્મૌ ચ દેહસ્ય યોનિરિત્યાગમોઽબ્રવીત્ ।
વિહિતં પ્રતિષિદ્ધં ચ કર્મ મૂલં તયોરપિ ॥ ૧૩.૭૨॥

કર્તુરેવ ભવેત્કર્મ રાગદ્વેષાચ્ચ કર્તૃતા ।
શોભનાશોભનાધ્યાસૌ રાગદ્વેષપ્રયોજકૌ ॥ ૧૩.૭૩॥

ઉક્તાધ્યાસોઽપ્યન્યવસ્તુસદ્ભાવાત્સ્યાન્ન ચાન્યથા ।
વસ્ત્વન્તરસ્ય સદ્ભાવ આત્માજ્ઞાનેન કલ્પિતઃ ॥ ૧૩.૭૪॥

એવં દેહાદિવસ્ત્વન્તસપ્તકવ્યવધાનતઃ ।
સંસારાનર્થહેતુઃ સ્યાદાત્માજ્ઞાનં જગત્સૃજેત્ ॥ ૧૩.૭૫॥

પ્રત્યગ્યાથાત્મ્યસંમોહાત્જગત્સદિવ ભાસતે ।
પ્રત્યગ્યાથાત્મ્યસંબુદ્ધૌ ન સત્તાન્નાસદુચ્યતે ॥ ૧૩.૭૬॥

અશેષાનર્થરૂપસ્ય પ્રત્યગજ્ઞાનરૂપિણઃ ।
ધ્વસ્તૌ ધ્વસ્તિરનર્થાનામાનન્દશ્ચ સમાપ્યતે ॥ ૧૩.૭૭॥

નિરસ્તાતિશયાનન્દરૂપતા પ્રત્યગાત્મનિ ।
યો વૈ ભૂમા તત્સુખં સ્યાદિત્યાદિ શ્રુતિસંમતમ્ ॥ ૧૩.૭૮॥

Verses 66-78 are not found in certain texts. They are added for completion and rest renumbered accordingly.

સ્વત આનન્દયાથાત્મ્યેઽપ્યબોધાદ્દુઃખસમ્પ્લુતિઃ ।
સોઽબોધોઽનર્થહેતુત્વાન્નિર્દેષ્ટવ્યશ્ચિકિત્સિતુમ્ ॥ ૧૩.૭૯॥

અબુદ્ધમાત્મનસ્તત્ત્વં પ્રમાતું યોગ્યમાગમૈઃ ।

નિર્દેષ્ટવ્યં તદપ્યત્ર સમ્ભાવયિતુમઞ્જસા ॥ ૧૩.૮૦॥

તમઁબોધં તચ્ચ મેયમવ્યાકૃતગિરા શ્રુતિઃ ।
નિરદિક્ષચ્છ્રુતિઃ સા તુ ન્યાયેનાત્ર વિચાર્યતે ॥ ૧૩.૮૧॥

તદ્ભેદં તર્હ્યવિસ્પષ્ટમાસીદવ્યાકૃતાભિધમ્ ।
ઇત્યેતસ્મિન્શ્રૌતવાક્યે પદાર્થસ્તાવદીર્યતે ॥ ૧૩.૮૨॥

અજ્ઞાનાત્મન્યશેષેણ લીનં બીજસ્વરૂપધૃક્ ।
તચ્છબ્દેન જગત્પ્રોક્તં પરોક્ષાર્થાભિધાયિના ॥ ૧૩.૮૩॥

અવ્યાકૃતસ્ય જગતો ભૂતકાલાભિસઙ્ગતેઃ ।
બુભુત્સું પ્રતિ પારોક્ષ્યાત્તચ્છબ્દસ્તત્ર યુજ્યતે ॥ ૧૩.૮૪॥

ઐતિહ્યાર્થે હશબ્દઃ સ્યાત્સુખેનાર્થાવબુદ્ધયે ।
તર્કેણોક્તે ધિયઃ ક્લેશઃ પરમાણ્વનુમાનવત્ ॥ ૧૩.૮૫॥

અચિન્ત્યાઃ ખલુ યે ભાવાઃ ન તાંસ્તર્કેણ યોજયેત્ ।
નાપ્રતિષ્ઠિતતર્કેણ ગમ્ભીરાર્થસ્ય નિશ્ચયઃ ॥ ૧૩.૮૬॥

નામરૂપાદિવિકૃતં પરાઙ્માનેન ભાસિતમ્ ।
ઇદંશબ્દેન નિખિલં જગદેતદુદીર્યતે ॥ ૧૩.૮૭॥

સામાનાધિકરણ્યેન તદિદમ્પદયોઃ શ્રુતમ્ ।
કાર્યકારણયોરૈક્યં વ્યાકૃતાવ્યાકૃતાત્મનોઃ ॥ ૧૩.૮૮॥

એકસ્ય જગતોઽવસ્થે વ્યાકૃતાવ્યાકૃતાત્મકે ।
અવસ્થયોર્વિભેદેઽપિ તદ્ધર્મી ન હિ ભિદ્યતે ॥ ૧૩.૮૯॥

બાલ્યયૌવનભેદેઽપિ દેવદત્તો ન ભિદ્યતે ।
તતો જગદભેદેન સામાનાધિકરણ્યગીઃ ॥ ૧૩.૯૦॥

નામરૂપાદ્યભિવ્યક્તેઃ પ્રાક્તનઃ કાલ ઉચ્યતે ।
તર્હીત્યનેન શબ્દેન સ કાલો લોકકલ્પિતઃ ॥ ૧૩.૯૧॥

યદ્યપ્યવ્યાકૃતે કાલવ્યક્તિર્નાસ્તિ તથાપ્યમી ।
લોકાઃ પ્રલયકાલત્વવ્યવહારં પ્રકુર્વતે ॥ ૧૩.૯૨॥

જગતોઽસ્યાનભિવ્યક્તિવ્યાકૃતગિરોચ્યતે ।
ન જગત્પ્રાગવસ્થાયાં વ્યક્તં ગર્ભસ્થપુત્રવત્ ॥ ૧૩.૯૩॥

આસીદિતિ ચ સત્તત્ત્વમધિષ્ઠાનતયોદિતમ્ ।
તથા ચ ભાવરૂપત્વાજ્જગદ્વ્યાકૃતિમર્હતિ ॥ ૧૩.૯૪॥

અવ્યાકૃતવચસ્ત્વેવમવતાર્યાસ્ય વર્ણિતાઃ ।
પદાર્થા અથ વાક્યાર્થો ન્યાયેનૈવ નિરૂપ્યતે ॥ ૧૩.૯૫॥

યસ્ય વેદાન્તમેયત્વં કારણં જગતશ્ચ યત્ ।
અવ્યાકૃતં તદેવાત્ર વાક્યાર્થો દ્વિવિધં હિ તત્ ॥ ૧૩.૯૬॥

ચિત્પ્રાધાન્યાદવિદ્યાયાઃ પ્રાધાન્યાચ્ચ દ્વિધાઽદ્વયમ્ ।
યચ્ચિદ્વસ્તુ પ્રમેયં તદવિદ્યા તુ વિકારકૃત્ ॥ ૧૩.૯૭॥

ન ચિદ્વસ્તુ વિવાદાર્હં તેન સર્વાર્થસિદ્ધિતઃ ।
અજ્ઞોઽહમિત્યવિદ્યાપિ પ્રસિદ્ધૈવાનુભૂતિતઃ ॥ ૧૩.૯૮॥

નાસદાસીન્નો સદાસીત્તમ આસીદિતિ શ્રુતિઃ ।
આસીદિદં તમોભૂતમપ્રજ્ઞાતમિતિ સ્મૃતિઃ ॥ ૧૩.૯૯॥

અજ્ઞાનત્વાત્પ્રમાણેન જ્ઞાતવ્યમિતિ મેયતા ।
અજ્ઞાનસ્ય વિકારિત્વાત્કારણત્વં ચ સમ્ભવેત્ ॥ ૧૩.૧૦૦॥

માયાં તુ પ્રકૃતિં વિદ્યાદીશો માયીતિ હિ શ્રુતિઃ ।
દૈવી હ્યેષા ગુણમયી મમ માયેતિ ચ સ્મૃતિઃ ॥ ૧૩.૧૦૧॥

ઇત્યવ્યાકૃતવાક્યાર્થો ન્યાયેન સુનિરૂપિતઃ ।
અથ વ્યાકૃતવાક્યાર્થઃ ક્રમાત્પ્રાપ્તો નિરૂપ્યતે ॥ ૧૩.૧૦૨॥

વ્યાકૃતં દ્વિવિધં દેહસૃષ્ટિર્જીવપ્રવેશનમ્ ।
દેહાદિર્વિષયત્વેન પ્રવેશાત્પૂર્વમુચ્યતે ॥ ૧૩.૧૦૩॥

અવ્યાકૃતં યત્પૂર્વોક્તમરૂપકમનામકમ્ ।
તદિદં નામરૂપાભ્યામેવ વ્યાક્રિયતે સ્વયમ્ ॥ ૧૩.૧૦૪॥

સુષુપ્તાદુત્થિતી રાજ્ઞઃ સ્વયમેવ યથા તથા ।
જગ્ધાશેષજગન્મૂર્તેરવ્યક્તાદ્વ્યાકૃતિર્મુહુઃ ॥ ૧૩.૧૦૫॥

નામરૂપે તુ શબ્દાર્થૌ ન તાભ્યામતિરિચ્યતે ।
જગત્કિઞ્ચિદ્ઘટાદૌ હિ દ્વયમેવ સમીક્ષ્યતે ॥ ૧૩.૧૦૬॥

પ્રક્રિયાનિયમો નાત્ર પુંવ્યુત્પત્તિપ્રધાનતઃ ।
અતઃ શ્રુતિષુ સૃષ્ટ્યાદિવિગાનં બહુધેક્ષ્યતે ॥ ૧૩.૧૦૭॥

યયા યયા ભવેત્પુંસાં વ્યુત્પત્તિઃ પ્રત્યગાત્મનિ ।
સા સૈવ પ્રક્રિયેહ સ્યાત્સાધ્વી સા ચાનવસ્થિતા ॥ ૧૩.૧૦૮॥

વિસ્પષ્ટત્વં વ્યાકુલત્વં શુક્તિકારજતાદિવત્ ।
સ્પષ્ટમવ્યાકૃતાન્મોહાત્મિથ્યાજ્ઞાનમિદં જગત્ ॥ ૧૩.૧૦૯॥

નામરૂપાધ્યાસ એવં વ્યાકૃતઃ પ્રતિપાદિતઃ ।
પ્રવેશ્યઃ તત્ર (પ્રવેશ્યસ્યાત્ર) જીવસ્ય પ્રવેશઃ પ્રતિપાદ્યતે ॥ ૧૩.૧૧૦॥

સર્વશાસ્ત્રારમ્ભ એષ યદર્થસ્તદ્વિબુદ્ધયે ।
સ એષ ઇહ દેહેષુ પ્રવિષ્ટ ઇતિ ગીયતે ॥ ૧૩.૧૧૧॥

સ એષોઽત્રાનખાગ્રેભ્યઃ પ્રવિષ્ટ ઇતિ વેદગીઃ ।
વ્યાખ્યાયતેઽસૌ પદશઃ આદૌ મીમાંસ્યતે ત્વથ ॥ ૧૩.૧૧૨॥

સ ઇત્યનેન શબ્દેન પ્રકૃતાર્થાઽવમર્શિના ।
અવ્યાકૃતાધ્યક્ષ આત્મા યઃ પુરોક્તઃ સ ઉચ્યતે ॥ ૧૩.૧૧૩॥

યદ્વા વિરાડધિષ્ઠાનં બ્રાહ્મણાદાવુદીરિતમ્ ।
આત્મશબ્દેન તસ્યાત્ર પરામર્શો ભવિષ્યતિ ॥ ૧૩.૧૧૪॥

તચ્છબ્દેન પરામૃષ્ટઃ સાક્ષ્યવ્યાકૃતભાસકઃ ।
એતચ્છબ્દેન કાર્યસ્થઃ પ્રત્યક્ષ ઉપદિશ્યતે ॥ ૧૩.૧૧૫॥

અદ્વિતીયમધિષ્ઠાનં કાર્યસ્થઃ સદ્વયસ્તયોઃ ।
સ એષ ઇત્યભેદોક્તિર્દુષ્કરેતિ ન ચોદ્યતામ્ ॥ ૧૩.૧૧૬॥

અજ્ઞાતવાસ્તુતત્ત્વસ્ય દુષ્કરં નાસ્તિ કિઞ્ચન ।
નીલીકૃતં નભઃ પશ્યેચ્ચક્ષુષા નીલવસ્ત્રવત્ ॥ ૧૩.૧૧૭॥

યોગ્યાયોગ્યવ્યવસ્થેયં માનવ્યવહૃતૌ ભવેત્ ।
કલ્પનામાત્રનિષ્પત્તેર્નાપેક્ષાજ્ઞાનભૂમિષુ ॥ ૧૩.૧૧૮॥

ઇહેત્યનેન સૂત્રાદિસ્થાણુપર્યન્તવિગ્રહાઃ ।
ઉચ્યન્તે તેષુ જીવોઽયં વિસ્પષ્ટમુપલભ્યતે ॥ ૧૩.૧૧૯॥

પ્રવિષ્ટ ઇતિ શબ્દેન ચિદાભાસતમોન્વિતા ।
જીવત્વેનોપલબ્ધિર્યા ચિતઃ સૈષાભિધીયતે ॥ ૧૩.૧૨૦॥

ચિદાભાસપ્રવેશસ્તુ પ્રત્યઙ્મોહે સ્વતો ભવેત્ ।

તત્કાર્યેષ્વનુવૃત્તઃ સ ઉપાધિશ્ચિત્પ્રવેશને ॥ ૧૩.૧૨૧॥

જપાકુસુમરક્તત્વં સ્ફટિકે કલ્પ્યતે યથા ।
ચિદાભાસપ્રવેશોઽયં ચિત્યધ્યારોપ્યતે તથા ॥ ૧૩.૧૨૨॥

સૂત્રાદિસ્થાણુપર્યન્તં જગત્સૃષ્ટ્વા સ્વમાયયા (જગત્સૃષ્ટ્વાત્મમાયયા) ।
સ્વાભાસૈકસહાયેન સ એવ પ્રાવિશત્પરઃ ॥ ૧૩.૧૨૩॥

આનખાગ્રેભ્ય ઇત્યુક્ત્યા મર્યાદાઽસ્ય પ્રવેશને ।
ઉક્તા સ્પર્શેન ચૈતન્યં નખાગ્રાવધિ લક્ષ્યતે ॥ ૧૩.૧૨૪॥

સામાન્યેન વિશેષાચ્ચ ચિદ્દેહં વ્યાપ્ય વર્તતે ।
દૃષ્ટાન્તાભ્યાં દ્વયી વૃત્તિર્દ્વિવિધાભ્યામિહોચ્યતે ॥ ૧૩.૧૨૫॥

દારુ કૃત્સ્નમભિવ્યાપ્ય યથાગ્નિર્દારુણિ સ્થિતઃ ।
સંવ્યાપ્ય તદ્વદખિલં દેહમાત્મા વ્યવસ્થિતઃ ॥ ૧૩.૧૨૬॥

તસ્થાવસંવ્યાપ્ય યથા ક્ષુરપાત્રં ક્ષુરસ્તથા ।
શ્રોત્રાદિનાડિમધ્યસ્થસ્તનુમવ્યાપ્ય સંસ્થિતઃ ॥ ૧૩.૧૨૭॥

ક્ષુરપાત્રે સ્થાનભેદાદ્વિભિદ્યન્તે યથા ક્ષુરાઃ ।
ચૈતન્યાનિ વિભિદ્યન્તે તથા નાડીવિભેદતઃ ॥ ૧૩.૧૨૮॥

પ્રાપ્નોતિ વૃત્તી દ્વે જીવઃ સ્વપ્નજાગ્રદવસ્થયોઃ ।
સામાન્યવૃત્તિમેવૈકાં સુષુપ્તે પ્રતિપદ્યતે ॥ ૧૩.૧૨૯॥

સામાન્યવૃત્તિર્યા સાઽત્ર જીવનાયોપપદ્યતે ।
વિશેષવૃત્તયો દેહે શબ્દાદ્યાલોચનોદ્યતાઃ ॥ ૧૩.૧૩૦॥

મવેશવાક્યં પદશસ્તાત્પર્યાચ્ચ સ્ફુટીકૃતમ્ ।
તદનુગ્રાહકો ન્યાય ઇદાનીં પ્રવિચાર્યતે ॥ ૧૩.૧૩૧॥

દેવદત્તઃ પરિચ્છિન્નઃ સાંશશ્ચાઽતો ગૃહં વિશેત્ ।
નિરંશઃ સર્વગશ્ચાત્મા કથં દેહે વિશેદસૌ ॥ ૧૩.૧૩૨॥

અપ્રવિષ્ટસ્વભાવોઽયં દિગ્દેશાદ્યનભિપ્લુતઃ ।
કલ્પિતોઽસ્ય પ્રવેશઃ સ્યાજ્જલપાત્રાર્કબિમ્બવત્ ॥ ૧૩.૧૩૩॥

વિભાગાદ્યંશવૈષમ્યેઽપ્યસ્તિ સામ્યં વિવક્ષિતમ્ ।
ઉપાધિસ્થોપલબ્ધ્યાદિસામ્યં કેન નિવાર્યતે ॥ ૧૩.૧૩૪॥

ઉપાધાવુપલભ્યત્વમન્યથાત્વેન ભાસનમ્ ।
બહુત્વભાનમિત્યેતદ્દૃષ્ટદાર્ષ્ટાન્તયોઃ સમમ્ ॥ ૧૩.૧૩૫॥

તેજોધિકં રવેર્બિમ્બમશક્યં દ્રષ્ટુમઞ્જસા ।
તથાપિ જલમધ્યે તદ્બિમ્બં સમ્યગવેક્ષ્યતે ॥ ૧૩.૧૩૬॥

સ્વયમ્પ્રકાશ આત્મૈવં નોપલભ્યોઽનુપાધિકઃ ।
જડદેહાદ્યુપાધૌ તુ વિસ્પષ્ટમુપલભ્યતે ॥ ૧૩.૧૩૭॥

જીવત્વભ્રાન્તિરેષૈવં પ્રત્યગ્બોધોપયોગતઃ ।
જલપાત્રાર્કસામ્યેન પ્રવેશ ઇતિ કલ્પ્યતે ॥ ૧૩.૧૩૮॥

યથા સૃષ્ટ્યાદયઃ ક્લૃપ્તાઃ પ્રવેશોઽપિ તથેક્ષ્યતામ્ ।
યુક્ત્યા નૈવોપપદ્યન્તે સૃષ્ટ્યાદ્યાઃ કલ્પિતાસ્તતઃ ॥ ૧૩.૧૩૯॥

નન્વેવં પર એવાત્ર પ્રવિષ્ટશ્ચેત્તદા જનાઃ ।
પશ્યન્ત્યેતં વિનાશાસ્ત્રમિતિ શાસ્ત્રં વૃથા ભવેત્ ॥ ૧૩.૧૪૦॥

અહં પ્રાણિમ્યહં વચ્મિ પશ્યામ્યેતચ્છૃણોમિ તત્ ।
મન્યેઽહમિત્યહમ્બુદ્ધ્યાઃ દૃષ્ટ એવાખિલૈઃ પરઃ ॥ ૧૩.૧૪૧॥

ઉચ્યતે, તન્ન પશ્યન્તિ પ્રવિવિક્તં સ્વતો જનાઃ ।
નો શ્વાસભાષણે દૃષ્ટિશ્રુતી વા સ્તોઽસ્ય નો મતિઃ ॥ ૧૩.૧૪૨॥

પ્રવિષ્ટસ્યાસ્તિ ચેચ્છ્વાસભાષણાદ્યસ્તુ તાવતા ।
પ્રવેષ્ટરિ કિમાયાતં શાસ્ત્રબોધ્યઃ સ એવ હિ ॥ ૧૩.૧૪૩॥

પ્રવિષ્ટસ્ય પ્રવેષ્ટુશ્ચ રૂપાભેદેઽપિ ભિન્નતામ્ ।
પ્રવિષ્ટત્વાપ્રવિષ્ટત્વધર્માભ્યાં કો નિવારયેત્ ॥ ૧૩.૧૪૪॥

પ્રવિષ્ટં યેઽત્ર પશ્યન્તિ નાપ્રવિષ્ટમમી વિદુઃ ।
વ્યાધત્વેન પ્રપશ્યન્તો ન વિદુઃ રાજપુત્રતામ્ ॥ ૧૩.૧૪૫॥

વ્યાધોઽયમિત્યસાવુક્તિર્યોજયેત્પ્રાણસઙ્કટે ।
રાજદેવાદિકોક્તિસ્તુ ભવેદ્બહુફલપ્રદા ॥ ૧૩.૧૪૬॥

તદ્વત્પ્રવિષ્ટદૃષ્ટિર્યા સા સંસારે નિયોજયેત્ ।
અપ્રવિષ્ટાત્મદૃષ્ટિસ્તુ મોચયેત્સર્વ સઙ્કટાત્ ॥ ૧૩.૧૪૭॥

અતોઽપ્રવિષ્ટદૃષ્ટ્યર્થં નિન્દ્યતે હિ પ્રવિષ્ટદૃક્ ।
પ્રવિષ્ટદર્શનં યત્સ્યાન્ન તદ્દર્શનમાત્મનઃ ॥ ૧૩.૧૪૮॥

સ્વતઃ પરોઽપિ દેહાદૌ પ્રવિષ્ટોઽકાત્સ્ન્ર્યદોષતઃ ।
દૂષિતો દર્શનં તસ્ય ન ભવેત્પરદર્શનમ્ ॥ ૧૩.૧૪૯॥

અકૃત્સ્નત્વં યથાઽસ્ય સ્યાદ્વ્યવહારે તથોચ્યતે ।
શ્વાસયોગાત્પ્રાણિતા સ્યાદ્વક્તા વદનયોગતઃ ॥ ૧૩.૧૫૦॥

દ્રષ્ટા દર્શનયોગેન શ્રોતા શ્રવણયોગતઃ ।
મન્તા મનનયોગેન સ્પ્રષ્ટાદૌ યોજયેત્તથા ॥ ૧૩.૧૫૧॥

એવં ચાહં પ્રાણિતેતિ જ્ઞાતે વક્ત્રાદ્યસઙ્ગ્રહઃ ।
વક્તાહમિત્યપિ જ્ઞાતે પ્રાણિત્રાદેરસઙ્ગ્રહઃ ॥ ૧૩.૧૫૨॥

યતિદીક્ષિતચોરાદિભૂમિકાં ધારયેન્નટઃ ।
તત્ર દૃષ્ટે દીક્ષિતેઽન્યે દૃષ્ટા યત્યાદયો ન હિ ॥ ૧૩.૧૫૩॥

પ્રાણનાદિકૃતાં મધ્યે એકૈકં યઃ સમીક્ષ્યતે ।
ન સ જાનાત્યકૃત્સ્નત્વાદેતદીક્ષિતવસ્તુનઃ ॥ ૧૩.૧૫૪॥

ઇત્યુક્તં વ્યાકૃતં સર્વં જડાજડવિભાગવત્ ।
આરોપોઽયં તન્નિવૃત્ત્યૈ વિદ્યાસૂત્રમિહોચ્યતે ॥ ૧૩.૧૫૫॥

આત્મેત્યેવમુપાસીતેત્યેતત્સૂત્રમુદાહૃતમ્ ।
ઉક્ત્વા પદાર્થં સૂત્રાનુગ્રાહકો ન્યાય ઉચ્યતે ॥ ૧૩.૧૫૬॥

યચ્ચાપ્નોતિ યદાદત્તે યચ્ચાત્તિ વિષયાનિહ ।
યચ્ચાસ્ય સન્તતો ભાવસ્તસ્માદાત્મેતિ કથ્યતે ॥ ૧૩.૧૫૭॥

વ્યાપ્નોત્યનવશેષેણ સર્પાદીન્ સ્રગિવાખિલાન્ ।
કલ્પનાધિષ્ઠાનતયા પ્રત્યઙ્ઙાત્મા ભવેત્તતઃ ॥ ૧૩.૧૫૮॥

સર્વાધિષ્ઠાનસન્માત્ર ઇત્યશેષજગત્પ્રતિ ।
અધિષ્ઠાનતયા વ્યાપ્તિં શ્રુતિર્બ્રૂતે સદાત્મનઃ ॥ ૧૩.૧૫૯॥

સ્વચિદાભાસમોહેન તદુત્થાનખિલાન્યતઃ ।
આદત્તેઽનાત્મનઃ પ્રાજ્ઞસ્તત આત્મેતિ તં વિદુઃ ॥ ૧૩.૧૬૦॥

પરે આત્મનિ સર્વેઽપિ સમ્પ્રતિષ્ઠન્તે એકલે ।
પૃથિવ્યાદ્યા અનાત્માન ઇતિ ચાથર્વણે વચઃ ॥ ૧૩.૧૬૧॥

આત્માભાસાઃ પરાચીના ધીવૃત્તિર્વિષયોન્મુખાઃ ।

પ્રત્યઙ્ભાત્તિ યતોઽતોઽસાવાત્મેત્યુક્તો મનીષિભિઃ ॥ ૧૩.૧૬૨॥

વિશ્વો હિ સ્થૂલભુઙ્નિત્યં તૈજસઃ પ્રવિવિક્તભુક્ ।
આનન્દભુક્તથા પ્રાજ્ઞ ઇતિ ચાગમશાસનમ્ ॥ ૧૩.૧૬૩॥

અવ્યાવૃતાનનુગતઃ પૂર્ણઃ સ્વાત્મન્યવસ્થિતઃ ।
યતોઽસ્ય સન્તતો ભાવસ્તસ્માદાત્મેતિ શબ્દ્યતે ॥ ૧૩.૧૬૪॥

તદ્વિષ્ણોરિતિ મન્ત્રોઽપિ વિષ્ણોસ્તત્પરમં પદમ્ ।
ચક્ષુર્વદાતતં વ્યોમ્નિ વ્યાચષ્ટે પ્રત્યગાત્મનિ ॥ ૧૩.૧૬૫॥

ચતુર્વિધનિરુક્ત્યાત્ર ચત્વારોઽર્થાઃ પ્રકીર્તિતાઃ ।
અધિષ્ઠાનં કારણત્વં જીવભાવો વિમુક્તતા ॥ ૧૩.૧૬૬॥

યન્મુક્તરૂપં સાક્ષિત્વાદ્વ્યાકૃતેઽવ્યાકૃતેઽપિ તત્ ।
અતિરોહિતમત્રાત્મશબ્દેનૈતથિ સૂત્રિતમ્ ॥ ૧૩.૧૬૭॥

આત્મશબ્દધિયોરાત્મા વિષયો નેતિ ભાષિતુમ્ ।
સૂત્રેઽસ્મિન્નિતિશબ્દોઽયં યથૈતત્સ્યાત્તથોચ્યતે ॥ ૧૩.૧૬૮॥

યત્રેતિ પરશબ્દઃ સ્યાત્તત્રોપચરિતં વચઃ ।
જ્યેષ્ઠં પિતેતિ પશ્યન્તીત્યાદાવેવમવેક્ષણાત્ ॥ ૧૩.૧૬૯॥

વ્યાકૃતાવ્યાકૃતે યે દ્વે કલ્પિતે તે વિચારતઃ ।
એતે વારયિતું સૂત્રે એવકારમસૂત્રયત્ ॥ ૧૩.૧૭૦॥

ઉપેતિ સામીપ્યવાચી તન્નિષ્ઠા પ્રત્યગાત્મનિ ।
કાર્યકારણરૂપાભ્યાં પ્રત્યઙ્નેદીય ઈક્ષ્યતે ॥ ૧૩.૧૭૧॥

એતસ્ય બ્રહ્મસામીપ્યં તત્ત્વમસ્યાદિનોચ્યતે ।
આસીતેતિ તુ શબ્દેન કૂટસ્થત્વમસૂત્રયત્ ॥ ૧૩.૧૭૨॥

વ્યુત્થાય કારણાત્કાર્યાત્તત્તત્ત્વજ્ઞાનવર્ત્મના ।
ઉપેત્ય કૂટસ્થમજમાસીતાપરિણામવાન્ ॥ ૧૩.૧૭૩॥

ઇત્યાત્મસૂત્રે શબ્દાર્થો વાક્યાર્થશ્ચોપવર્ણિતઃ ।
તદનુગ્રાહકો ન્યાયઃ આશઙ્કાપૂર્વમુચ્યતે ॥ ૧૩.૧૭૪॥

વ્યાકૃતાવ્યાકૃતાભ્યાં તદ્વસ્તુતત્ત્વં તિરોહિતમ્ ।
ઇતિ યચ્છઙ્કિતં તન્ન સ્વરૂપસ્યાતિરોહિતેઃ ॥ ૧૩.૧૭૫॥

સ્વસ્વરૂપં તિરોધાતું ન હિ કેનાપિ શક્યતે ।
વિસ્ફાર્યતામિહાક્ષાણિ કિમક્ષૈરપરાધ્યતે ॥ ૧૩.૧૭૬॥

આપાદયેયુઃ શબ્દાદીન્યદ્યક્ષાણિ તથાપિ તે ।
કા હાનિસ્તસ્ય શબ્દાદેરેવ તત્ત્વં વિબુધ્યતામ્ ॥ ૧૩.૧૭૭॥

તૈઃ શબ્દાદિતયા ભાતિ તત્ત્વરૂપતયા ન તુ ।
ઇતિ ચેદત એવૈતદ્વેદવાક્યેન બુધ્યતામ્ ॥ ૧૩.૧૭૮॥

ન પરોક્ષત્વમાશઙ્ક્યં સ્વસ્વરૂપત્વહેતુતઃ ।
શબ્દાદિતત્ત્વં યદ્બોદ્ધુઃ સ્વરૂપં તન્ન ચેતરમ્ ॥ ૧૩.૧૭૯॥

એકસ્યાપ્યત્ર ચિત્તસ્ય સહકારિવિભેદતઃ ।
ક્રમેણ ગ્રહણં તત્ત્વે શબ્દાદૌ ચ કુતો ન હિ ॥ ૧૩.૧૮૦॥

ઇતિ શઙ્કોત્તરં પ્રોક્તમેતત્સૂત્રેણ સૂચિતમ્ ।
સ્વરૂપવાચ્યાત્મશબ્દાદતિરોધાનભાસનાત્ ॥ ૧૩.૧૮૧॥

નનુ પ્રાણાદિયુક્તાત્મબોધોઽકાત્સ્ન્ર્યેન દૂષિતઃ ।
સોઽકાત્સ્ન્ર્યદોષઃ શુદ્ધાત્મબોધે કસ્માન્ન સમ્ભવેત્ ॥ ૧૩.૧૮૨॥

ઇત્યાશઙ્કાપનુત્ત્યર્થમત્રેદં શ્રૂયતે સ્ફુટમ્ ।
અત્ર હ્યેતે સર્વ એકીભવન્તીતિ શ્રુતેર્વચઃ ॥ ૧૩.૧૮૩॥

પ્રાણાદ્યુપાધ્યુપહિતાઃ સર્વેઽપ્યાત્માન ઈશ્વરે ।
શુદ્ધાત્મન્યેકતાં યાન્તિ પુત્રભ્રાત્રાદયો યથા ॥ ૧૩.૧૮૪॥

પુત્રો ભ્રાતા પિતેત્યેકો ભિદ્યતે પ્રતિયોગિભિઃ ।
પુત્રાદયસ્ત એકસ્મિંસ્તસ્મિન્યાન્ત્યેકતાં સ્વતઃ ॥ ૧૩.૧૮૫॥

આત્મનોઽનવશેષેણ સમ્બન્ધોઽનાત્મવસ્તુનઃ ।
રજ્જુસર્પાદિવન્નાતઃ પ્રતીચઃ શિષ્યતે પરાઙ્ ॥ ૧૩.૧૮૬॥

સર્વમજ્ઞાતમેવ સ્યાદ્યસ્મિન્નજ્ઞાત આત્મનિ ।
જ્ઞાતે જ્ઞાતં ચ કૃત્સ્નોઽસૌ તાવત્ત્વાત્સર્વવસ્તુનઃ ॥ ૧૩.૧૮૭॥

પ્રમાભાસત્વમેતેન વાક્યેનાસ્ય નિવારિતમ્ ।
માત્વં સમ્ભાવ્યતે તસ્ય પદનીયત્વવાક્યતઃ ॥ ૧૩.૧૮૮॥

અસ્ય સર્વસ્ય જગત આત્મેતિ યદુદીરિતમ્ ।
તદેતત્પદનીયં સ્યાદિતિ વાક્યસ્ય યોજના ॥ ૧૩.૧૮૯॥

પદનીયેતિ શબ્દેન પ્રમાતું યોગ્યતોચ્યતે ।
અજ્ઞાતત્વાત્પુમર્થત્વાત્પ્રમાતું યોગ્યતાત્માનઃ ॥ ૧૩.૧૯૦ ॥

અવ્યાકૃતવ્યાકૃતયોરજ્ઞાનાત્મકતા યતઃ ।
અતઃ આત્માતિરેકેણ નાજ્ઞાતાર્થોઽસ્તિ કશ્ચન ॥ ૧૩.૧૯૧ ॥

જ્ઞેયાર્થાનન્દયોર્યસ્માત્સમાપ્તિઃ પ્રત્યગાત્મનિ ।
પરમઃ પુરુષાર્થોઽત આત્મા ભવતિ નેતરઃ ॥ ૧૩.૧૯૨ ॥

અજ્ઞાતત્વં પુરા પ્રોક્તમવ્યાકૃતગિરા યથા ।
જ્ઞેયાર્થસ્ય સમાપ્તિં તાં વક્ત્યનેનેતિ વાક્યતઃ ॥ ૧૩.૧૯૩ ॥

અનેનૈતદ્વેદ સર્વમિત્યાત્મજ્ઞાનમાત્રતઃ ।
સાર્વજ્ઞ્યમુક્તમાનન્દસમાપ્તિસ્તુ પ્રવક્ષ્યતે ॥ ૧૩.૧૯૪ ॥

અન્યજ્ઞાનેન નાન્યસ્ય ક્વચિદસ્ત્યવબુદ્ધતા ।
આત્મજ્ઞાનેન સર્વસ્ય જ્ઞાનં કથમુદીર્યતે ॥ ૧૩.૧૯૫ ॥

સત્યમેવં ભવેદેતદ્યદ્યાત્માપ્યન્ય ઇષ્યતે ।
આત્માસાવન્ય ઇતિ ચ નાનુન્મત્તસ્ય ગીરિયમ્ ॥ ૧૩.૧૯૬ ॥

પ્રત્યક્તત્ત્વે પરિજ્ઞાતે જગત્તત્ત્વં પ્રબુદ્ધ્યતે ।
ઇત્યત્ર પદદૃષ્ટાન્તો યથાવત્સ વિવિચ્યતે ॥ ૧૩.૧૯૭ ॥

એકં પાદં યથાશ્વસ્ય દૃષ્ટ્વાશ્વત્વમશેષતઃ ।
દૃષ્ટવાનેવ ભવતિ દૃષ્ટોઽશ્વ ઇતિ વર્ણનાત્ ॥ ૧૩.૧૯૮ ॥

એવં સ્વદેહમાત્રસ્થે સાક્ષિતત્વેઽવલોકિતે ।
અશેષજગતસ્તત્ત્વં લભ્યતૈવ ન સંશયઃ ॥ ૧૩.૧૯૯ ॥

આનન્દસ્ય સમાપ્તિર્યા પ્રત્યગાત્મનિ સાધુના ।
પ્રદર્શ્યતેઽનુભૂત્યાત્ર સ્પષ્ટં સાર્વજનીનયા ॥ ૧૩.૨૦૦ ॥

વિત્તાત્પુત્રઃ પ્રિયઃ પુત્રાત્પિણ્ડઃ પિણ્ડાત્તથેન્દ્રિયમ્ ।
ઇન્દ્રિયેભ્યઃ પ્રિયઃ પ્રાણઃ આત્મા પ્રિયતમસ્તતઃ ॥ ૧૩.૨૦૧ ॥

સ્વાત્મભોગસ્ય હેતુત્વાત્પ્રાણાદૌ પ્રીતિરિષ્યતે ।
ન સ્વતોતો ન સા મુખ્યા વેશ્યાપ્રીતિર્યથા તથા ॥ ૧૩.૨૦૨ ॥

પ્રતીચિ નિર્નિમિત્તૈવ સર્વાવસ્થાસ્વપીષ્યતે ।

પ્રીતિરગ્ન્યુષ્ણવત્તસ્માન્મુખ્યાસાવિતિ ગમ્યતામ્ ॥ ૧૩.૨૦૩॥

સર્વાન્તરતરત્વેન યુજ્યતે નિર્નિમિત્તતા ।
બાહ્યેષુ સનિમિત્તત્વં પ્રીતેઃ સ્પષ્ટં ગવાદિષુ ॥ ૧૩.૨૦૪॥

વ્યાધ્યાદ્યુપદ્રુતો લોકો મૃતિમપ્યભિવાઞ્છતિ ।
નિર્નિમિત્તપ્રિયત્વે તુ દેહાદેસ્તન્ન યુજ્યતે ॥ ૧૩.૨૦૫॥

અનાત્મા પ્રિય ઇત્યેવં યો મુહ્યતિ સ પામરઃ ।
વિનાશિત્વમુદાહૃત્ય મૂઢં તં બોધયેદ્બુધઃ ॥ ૧૩.૨૦૬॥

અનાત્મા ભોગકાલેઽસ્ય સુખં યાવત્પ્રયચ્છતિ ।
તત્સહસ્રગુણં દુઃખં નાશકાલે પ્રયચ્છતિ ॥ ૧૩.૨૦૭॥

યા પ્રીતિરવિવેકાનાં વિષયેષ્વનપાયિની ।
વ્યુત્થાપ્ય (વ્યુત્થાય) વિષયેભ્યસ્તાં પ્રતીચ્યેવ નિવેશયેત્ ॥ ૧૩.૨૦૮॥

વિષયા ઇવ ન પ્રત્યક્કદાચિદપિ નશ્યતિ ।
અતો દુઃખપ્રદત્વં તુ શઙ્કિતું ન ચ શક્યતે ॥ ૧૩.૨૦૯॥

સૂત્રાર્થજ્ઞમનુષ્યાણાં મતિં વિજ્ઞાય કેચન ।
મુમુક્ષવો ગુરું પ્રાપ્ય ચોદયન્ત્યતિસમ્ભ્રમાત્ ॥ ૧૩.૨૧૦॥

યદ્બ્રહ્મવિદ્યયા સર્વભાવાપ્તિં મન્વતે નરાઃ ।
તદ્બ્રહ્મ કિં વિદિત્વાભૂત્સર્વમિત્યેતદીર્યતામ્ ॥ ૧૩.૨૧૧॥

એવં મુમુક્ષુભિશ્ચોદ્યે કૃતે કરુણયા ગુરુઃ ।
અનાયાસેન તચ્ચોદ્યં પરિહર્તું વચોઽબ્રવીત્ ॥ ૧૩.૨૧૨॥

બ્રહ્મૈવ બોધાત્પ્રાગ્જીવો ભૂત્વાત્માનમવેત્પુનઃ ।
અહં બ્રહ્મેતિ તદ્બોધાત્સર્વાત્મકમભૂત્તદા ॥ ૧૩.૨૧૩॥

અવેત્સોપાધિરાત્માયમાત્માનં નિરુપાધિકમ્ ।
જ્ઞાતૃજ્ઞાનજ્ઞેયભેદાન્ન દોષોઽત્ર મનાગપિ ॥ ૧૩.૨૧૪॥

અવિવિક્તસ્તુ દેહાદ્યૈરાત્મા ભવતિ વેદિતા ।
વિવિક્તાત્મા વેદિતવ્યો ધીવૃત્તિર્વેદનં ભવેત્ ॥ ૧૩.૨૧૫॥

અવિદ્યારોપનિહ્નુત્યૈ તદાત્માનમવેદિતિ ।
આત્માભિમુખધીવૃત્તિરાત્મવેદનમુચ્યતે ॥ ૧૩.૨૧૬॥

આત્માનમેવ તદવેદિત્યુક્તાદેવકારતઃ ।
નિર્માલ્યવત્પરિત્યાજ્યં દેહાદીત્યવગમ્યતે ॥ ૧૩.૨૧૭॥

ત્યજ્યમાને (ત્યાજ્યમાને) તુ દેહાદાવાત્મૈવૈકોઽવશિષ્યતે ।
પરિત્યક્તુમશક્યત્વાદાત્માનં નિહ્નુતેઽત્ર કઃ ॥ ૧૩.૨૧૮॥

અહં બ્રહ્માસ્મિ નો જીવ ઇત્યવેદ્બ્રહ્મરૂપતામ્ ।
શોધિતસ્યાહમર્થસ્ય યુજ્યતે બ્રહ્મરૂપતા ॥ ૧૩.૨૧૯॥

બ્રહ્મતા નાત્મનોઽન્યત્ર નાત્મતા બ્રહ્મણોઽન્યતઃ ।
તદ્યાથાત્મ્યાપ્રબોધાત્તુ તયોરેષ વિપર્યયઃ ॥ ૧૩.૨૨૦॥

અબ્રહ્માનાત્મતાહેતૌ પ્રત્યગ્ધ્વાન્તે નિવર્તિતે ।
આત્માનમેવ બ્રહ્મેતિ નિર્વિઘ્નં પ્રતિપદ્યતે ॥ ૧૩.૨૨૧॥

નિવર્ત્યભેદાદ્ભિન્નોઽર્થો બ્રહ્માહમ્પદયોર્ભવેત્ ।
અબ્રહ્માનાત્મતે વાર્યે એકસ્મિન્નેવ વસ્તુનિ ॥ ૧૩.૨૨૨॥

સ્વાનુભૂત્યવસેયેઽસ્મિન્પ્રતીચ્યબ્રહ્મતાં જનાઃ ।
આરોપ્ય શાસ્ત્રગમ્યેઽસ્મિનનાત્મત્વમકલ્પયન્ ॥ ૧૩.૨૨૩॥

અનુભૂત્યવસેયોઽહં બ્રહ્મ શાસ્ત્રસમર્પિતમ્ ।
અસ્મીતિ બોધાદારોપદ્વયમત્ર નિવર્તતે ॥ ૧૩.૨૨૪॥

અસ્મીતિ વર્તમાનોક્તેર્વિદ્યાકાલૈવ મુક્તતા ।
સિદ્ધાતોઽસૌ ન સાધ્યા સ્યાદગ્નિહોત્રાદિકાર્યવત્ ॥ ૧૩.૨૨૫॥

તસ્માત્તત્સર્વમભવદિતિ વાક્યેન વેદનાત્ ।
ઉચ્યતે સર્વભાવાપ્તિરસર્વજ્ઞત્વાપવાદતઃ ॥ ૧૩.૨૨૬॥

સ્વતઃ સર્વાત્મકમ્બ્રહ્મ ભાત્યસર્વમિવ ભ્રમાત્ ।
વિદ્યયા ભ્રાન્તિબાધેઽસ્ય સર્વત્વમવશિષ્યતે ॥ ૧૩.૨૨૭॥

નન્વસૌ સર્વભાવાપ્તિર્ન વિદ્યામાત્રતો ભવેત્ ।
વિનોત્તમત્વાનુષ્ઠાનકાલદેવાદ્યનુગ્રહમ્ ॥ ૧૩.૨૨૮॥

વિપ્રસ્ય ફલદો વેદો ન શૂદ્રસ્યાધમત્વતઃ ।
દેવાદેરુત્તમસ્યૈવ તથા વિદ્યા ફલપ્રદા ॥ ૧૩.૨૨૯॥

યાગજ્ઞાનમનુષ્ઠાનાદ્વિના ન સ્વર્ગદં તથા ।
બ્રહ્મજ્ઞાનમનુષ્ઠાનાદ્વિના સર્વાપ્તિદં કથમ્ ॥ ૧૩.૨૩૦॥

ગર્ભાધાનમૃતાવેવ નાન્યકાલે તથોત્તમે ।
વિદ્યા કૃતયુગે સર્વભાવં યચ્છતિ નાન્યદા ॥ ૧૩.૨૩૧॥

રાજ્ઞા કૃષિફલં યદ્વત્કરાર્થં પ્રતિબધ્યતે ।
સર્વભાવસ્તથા દેવૈર્યાગભુગ્ભિર્નિવાર્યતે ॥ ૧૩.૨૩૨॥

તસ્માદનુત્તમે જન્મન્યનનુષ્ઠાયિનઃ કલૌ ।
યુગે દેવાદ્યૃણવતો ન વિદ્યા સર્વભાવદા ॥ ૧૩.૨૩૩॥

ઇતિ ચોદયિતુર્યેઽત્રચત્વારશ્ચોદ્યહેતવઃ ।
તદ્યો ય ઇત્યાદિ વાક્યૈશ્ચતુર્ભિસ્તાન્નિરસ્યતિ ॥ ૧૩.૨૩૪॥

ન તાવદુત્તમં જન્મ સર્વભાવપ્રયોજકમ્ ।
ઉત્તમસ્યાપિ દેવાદેઃ સર્વત્વં બ્રહ્મબોધતઃ ॥ ૧૩.૨૩૫॥

યો દેવાનાં ઋષીણાં વા મધ્યે બ્રહ્મ વ્યબુધ્યત ।
અસાવસાવેવ સર્વમભૂન્નાન્યસ્તુ કશ્ચન ॥ ૧૩.૨૩૬॥

મનુષ્યાણાં તથા મધ્યે બ્રહ્મવિત્સર્વભાવભાક્ ।
વિદ્યાવિદ્યે એવ તસ્માત્સર્વત્વાલ્પત્વકારણે ॥ ૧૩.૨૩૭॥

બ્રહ્મ વા ઇદમગ્રેઽભૂદિતિ વિદ્યાધિકારિતા ।
શ્રૂયતે બ્રાહ્મણો બ્રહ્મ સર્વજાતિષુ તત્સમમ્ ॥ ૧૩.૨૩૮॥

ન પશ્વાદેઃ સર્વભાવપ્રસઙ્ગો બોધવર્જનાત્ ।
શૂદ્રજાતિશ્ચ વિદુરઃ સતિ બોધે વિમુચ્યતે ॥ ૧૩.૨૩૯॥

યાગવિદ્યેવાત્મવિદ્યા નાનુષ્ઠાનમપેક્ષતે ।
ફલદાન ઇતિ જ્ઞેયં વામદેવનિદર્શનાત્ ॥ ૧૩.૨૪૦॥

બ્રહ્માત્મત્વં વામદેવઃ પશ્યન્મન્વાદિરૂપતામ્ ।
પ્રતિપેદે હ્યનુષ્ઠાનાવસરસ્તત્ર કો વદ ॥ ૧૩.૨૪૧॥

ન ચિતો વામદેવે વા મનૌ વાઽન્યેષુ વા ભિદા ।
તેન મન્વાદિચિદ્વામદેવેન પ્રત્યપદ્યત ॥ ૧૩.૨૪૨॥

યત્તુ પુણ્યયુગે સર્વભાવો ન તુ કલાવપિ ।
તદસદ્બોધસાધ્યસ્ય પુણ્યકાલાનપેક્ષણાત્ ॥ ૧૩.૨૪૩॥

ન સૂર્યગ્રહણાપેક્ષો બોધાન્નિદ્રાક્ષયઃ ક્વચિત્ ।

તથા ન સર્વભાવોઽયં કાલભેદમપેક્ષતે ॥ ૧૩.૨૪૪॥

ય એતર્હ્યપિ વેદાઽહં બ્રહ્મઽસ્મીતિ (બ્રહ્માઽસ્મીતિ) તદૈવ સઃ ।
ઇદં સર્વં ભવત્યેવ યદિદં જગદીક્ષ્યતે ॥ ૧૩.૨૪૫॥

અવિચારિતરમ્યસ્ય નામરૂપાત્મકસ્ય યત્ ।
જગતો વાસ્તવં રૂપં સત્તત્ત્વં બ્રહ્મ તદ્ભવેત્ ॥ ૧૩.૨૪૬॥

નરાણામધર્મણત્વાત્સર્વભાવં દિવૌકસઃ ।
વારયન્તિ હવિર્ભોક્તું તૈર્દત્તમિતિ ચેન્ન તત્ ॥ ૧૩.૨૪૭॥

તસ્ય જ્ઞાતાત્મતત્વસ્ય (જ્ઞાતાત્મતાવસ્ય) પ્રધ્વસ્તતમસો યતઃ ।
ઇન્દ્રાદયોઽપિ નૈવાલં સર્વભાવાભિવારણે ॥ ૧૩.૨૪૮॥

યદ્યપીશા નૃણાં દેવાસ્તથાપિ બ્રહ્મવેદિનઃ ।
અનીશાઃ પ્રત્યુતૈતેષામાત્મા ભવતિ તત્ત્વવિત્ ॥ ૧૩.૨૪૯॥

ઇત્થમાદેયવિદ્યાયાઃ સૂત્રવૃત્તી ઉદાહૃતે ।
હેયાવિદ્યા સ્વકાર્યેણ યુક્તા સૂત્રયતિ શ્રુતિઃ ॥ ૧૩.૨૫૦॥

સ્વસ્માદન્યાં દેવતાં ય ઉપાસ્તે સ્વં ન વેદ સઃ ।
ઇતિ સૂત્રમવિદ્યાયાઃ સકાર્યાયાઃ શ્રુતીરિતમ્ ॥ ૧૩.૨૫૧॥

અચિન્ત્યશક્તિશ્ચિન્નિષ્ઠા સ્વાશ્રયં મોહયેત્ક્વચિત્ ।
અવિદ્યા સાઽબોધનાત્સ્યાત્ જીવત્વભ્રાન્તિકારિણી ॥ ૧૩.૨૫૨॥

નાશ્રયં મોહયેદ્યાસાવીશ્વરત્વસ્ય કલ્પિકા ।
વસ્તુત્વભ્રાન્તિરેવાસ્યાં હેયા સા ત્વવતિષ્ઠતે ॥ ૧૩.૨૫૩॥

સૃષ્ટિપ્રકરણે તત્ર માયાકારઃ પુરોદિતઃ ।
અવ્યાકૃતગિરા તસ્ય કાર્યં વ્યાકૃતમીરિતમ્ ॥ ૧૩.૨૫૪॥

કર્મપ્રકરણે ત્વસ્મિન્નવિદ્યાકાર ઈર્યતે ।
સ્વસ્માદ્ભિન્ના દેવતેતિ ધીરવિદ્યાવિજૃમ્ભિતા ॥ ૧૩.૨૫૫॥

સ્વસ્યતત્ત્વમવિજ્ઞાય યાગદાનાદિકર્મભિઃ ।
સ્વતોઽન્યા દેવતાઃ પાતિ હ્યનડ્વાન્વાણિજં યથા ॥ ૧૩.૨૫૬॥

અપિ ભૂરિપશોઃ પુંસ એકસ્મિન્નપિ તસ્કરૈઃ ।
હ્રિયમાણે પશૌ દુઃખં કિમુ સર્વાપહારતઃ ॥ ૧૩.૨૫૭॥

સર્વસ્વતુલ્યે નૃપશૌ બ્રહ્મધીપરિમોષિણા ।
હ્રિયમાણે મહદ્દુઃખં સર્વેષાં ચ દિવૌકસામ્ ॥ ૧૩.૨૫૮॥

તસ્માદેષાં ન પ્રિયં તદ્યન્મનુષ્યા વિજાનતે ।
બ્રહ્માત્મત્વમતો દેવાઃ પ્રતિબધ્નન્તિ વેદનમ્ ॥ ૧૩.૨૫૯॥

સ્પષ્ટીકૃતં પારતન્ત્ર્યં પશુદૃષ્ટાન્તતો નૃણામ્ ।
વર્ણાશ્રમાદિ તદ્ધર્મસૃષ્ટિઃ કર્માર્થમીરિતા ॥ ૧૩.૨૬૦॥

નન્વેવં તસ્ય મુક્તિશ્ચ સ્યાદેવાત્મધિયં વિના ।
અજ્ઞાનકર્મણોઃ શ્રુત્યા સાદરેણોપવર્ણનાત્ ॥ ૧૩.૨૬૧॥

મૈવમાત્મા કિમજ્ઞાતો મુક્તિદઃ કર્મ વા મહત્ ।
આમ્નાયકૃષિવન્નાયમજ્ઞાતાત્મા ફલપ્રદઃ ॥ ૧૩.૨૬૨॥

અનધીતો યથા વેદો નાર્થજ્ઞાનેન પાલયેત્ ।
અકૃતા વા કૃષિઃ પાતિ નાકર્તારં ફલાર્થિનમ્ ॥ ૧૩.૨૬૩॥

તથા સ્વાત્માપ્યવિજ્ઞાતો મુમુક્ષું મોક્ષદાનતઃ ।
ન પાલયત્યતો મુક્તિરજ્ઞસ્ય ન હિ કસ્યચિત્ ॥ ૧૩.૨૬૪॥

સ્વાત્માખ્યલોકમજ્ઞાત્વા યો દેહાખ્યસ્વલોકતઃ ।
પ્રૈત્યસૌ પુનરપ્યન્યં દેહલોકં વ્રજેદ્દૃઢમ્ ॥ ૧૩.૨૬૫॥

અનાત્મવિન્મહત્પુણ્યમશ્વમેધાદિકં યદિ ।
કુર્યાન્નિત્યફલાયૈતદથાપ્યન્તે વિનશ્યતિ ॥ ૧૩.૨૬૬॥

કૃતસ્ય હિ ક્ષયોઽવશ્યં કોષ્ઠાગારાદિવદ્ભવેત્ ।
ન મોક્ષાયાદરસ્તસ્માત્શ્રુતાવજ્ઞાનકર્મણોઃ ॥ ૧૩.૨૬૭॥

કિન્તુ જીવન્મુક્તિકાલે બોધહેયં વિવેચિતમ્ ।
મુક્તિસ્તુ વિદ્યાસૂત્રેણ સૂચિતા સ્યાદ્વિચારતઃ ॥ ૧૩.૨૬૮॥

આત્માનમેવ નિર્દ્વૈતં સ્વપ્રભં પ્રવિચારયેત્ ।
વિચારયતિ યસ્તસ્ય ફલં ન ક્ષીયતે ક્વચિત્ ॥ ૧૩.૨૬૯॥

કામી કામયતે યદ્યત્સુખં સ્વર્ગાદિજં પુમાન્ ।
અસ્માદેવાત્મનસ્તત્તત્સૃજતે કર્મપૂજિતાત્ ॥ ૧૩.૨૭૦॥

અવિનાશોઽખિલાનન્દહેતુત્વં ચેત્યદો દ્વયમ્ ।
ન કર્મણાં ફલે યુક્તં યુક્તં વિદ્યાફલે તુ તત્ ॥ ૧૩.૨૭૧॥

સિદ્ધસ્ય વ્યઞ્જિકા વિદ્યાવ્યક્તાત્મા ફલમુચ્યતે ।
ન હ્યાત્મનો વિનાશોઽસ્તિ નિત્યં વિદ્યાફલં તતઃ ॥ ૧૩.૨૭૨॥

સાર્વભૌમાદિકાઃ પ્રોક્તા ઉત્તરોત્તરવૃદ્ધિતઃ ।
હિરણ્યગર્ભપર્યન્તા આનન્દા આત્મબિન્દવઃ ॥ ૧૩.૨૭૩॥

બ્રહ્માનન્દસ્ય ભૂતાનિ માત્રાં યાન્તીત્યુદીરણાત્ ।
તત્તત્કર્માનુસારેણ બ્રહ્માનન્દઃ સ્ફુરેન્નૃણામ્ ॥ ૧૩.૨૭૪॥

તત્તદ્વિષયકામેન ચિત્તેઽસ્મિન્વ્યાકુલીકૃતે ।
આનન્દ આત્મભૂતોઽપિ સ તિરોધીયતે નૃણામ્ ॥ ૧૩.૨૭૫॥

પુણ્યેન વિષયે લબ્ધે ચિત્તે સ્વાસ્થ્યમુપાગતે ।
આત્માનન્દઃ સ્ફુરેત્તાવદ્યાવન્ન વ્યાકુલાન્તરમ્ ॥ ૧૩.૨૭૬॥

એવં ચ વિષયાનન્દા બ્રહ્માનન્દસ્ય બિન્દવઃ ।
સર્વાનન્દનિધિર્વિદ્યાફલમિત્યેતદીરિતમ્ ॥ ૧૩.૨૭૭॥

આનન્દબિન્દ્વભિવ્યક્તિહેતુકર્મપ્રસિદ્ધયે ।
બ્રહ્મક્ષત્રાદિવર્ણાનાં સૃષ્ટિર્યત્નેન વર્ણિતા ॥ ૧૩.૨૭૮॥

વર્ણાશ્રમાભિમાની સન્નતત્ત્વજ્ઞઃ પરાઙ્મતિઃ ।
દેવાદીનામાશ્રયઃ સ્યાત્સર્વેષામાપિપીલિકમ્ ॥ ૧૩.૨૭૯॥

દેવાનાં યાગહોમાભ્યામૃષીણાં વેદપાઠતઃ ।
પિતૄણાં શ્રાદ્ધતો નૃણાં વસ્ત્રાન્નગૃહદાનતઃ ॥ ૧૩.૨૮૦॥

પશૂનાં તૃણનીરાભ્યામુચ્છિષ્ટકણધાન્યતઃ ।
શ્વાખુટિટ્ટિભમુખ્યાનામેવં સર્વાશ્રયો ગૃહી ॥ ૧૩.૨૮૧॥

કર્મણા નાર્જિતો યસ્માન્ન કશ્ચિદુપકારકૃત્ ।
ગૃહી દેવાદિભિસ્તસ્માદર્જિતોઽભૂત્સ્વકર્મભિઃ ॥ ૧૩.૨૮૨॥

સ્વસ્વકર્માર્જિતત્વેન દેવાદ્યાઃ સ્વસ્વદેહવત્ ।
અવિનાશં સદેચ્છન્તિ ગૃહિણઃ સ્વોપકારિણઃ ॥ ૧૩.૨૮૩॥

તત્ત્વં બુધ્વાનનુષ્ઠાનં નાશોઽયં ગૃહિણો મહાન્ ।
એષ દેવાદિભિઃ સર્વૈ ન હિ શક્યશ્ચિકિત્સિતુમ્ ॥ ૧૩.૨૮૪॥

કર્મણામનનુષ્ઠાનં મૃતિરોગાદિના તુ યત્ ।

નાસાવાત્યન્તિકો નાશો યસ્માત્પશ્ચાત્કરિષ્યતિ ॥ ૧૩.૨૮૫॥

મા ભૂત્સર્વસ્વહાનિર્નો બ્રહ્મયાથાત્મ્યવિદ્યયા ।
ઇતિ દેવાદયો વિદ્યાં પ્રતિબધ્નન્તિ યત્નતઃ ॥ ૧૩.૨૮૬॥

નન્વનર્થકરે કેન ગૃહીત્વેવં (ગૃહીત્વાયં) પ્રવર્તિતઃ ।
પારતન્ત્ર્યમ્ ઋતે (પારતન્ત્ર્યેઽમૃતે) નૈવ ધીમાનત્ર પ્રવર્તતે ॥ ૧૩.૨૮૭॥

દેવાદિપારતન્ત્ર્યં તુ ગૃહિણામધિકારિણામ્ ।
મિથ્યાધીમાત્રહેતુત્વાન્નાપ્યવિદ્યા પ્રવર્તિકા ॥ ૧૩.૨૮૮॥

તર્હિ પ્રવર્તકં બ્રૂમઃ કામ એવ પ્રવર્તકઃ ।
કામ એષ ક્રોધ એષ ઇત્યાદિસ્મૃતિવાક્યતઃ ॥ ૧૩.૨૮૯॥

અકામતઃ ક્રિયા કાચિદ્દૃશ્યતે નેહ કસ્યચિત્ ।
યદ્યદ્ધિ કુરુતે જન્તુસ્તત્તત્કામસ્ય ચેષ્ટિતમ્ ॥ ૧૩.૨૯૦॥

તસ્માત્કામયતે પૂર્વં બ્રહ્મચારી ચતુષ્ટયમ્ ।
જાયા મે સ્યાદથાપત્યમથ વિત્તમથ ક્રિયા ॥ ૧૩.૨૯૧॥

એતાવાનેવ સંસારે કામો નાતોઽધિકઃ ક્વચિત્ ।
લોકાન્તરં કર્મફલં કર્મોક્ત્યૈવેરિતં ભવેત્ ॥ ૧૩.૨૯૨॥

અસમ્ભવે તુ જાયાદેર્મનોવાગાદિષુ ક્રમાત્ ।
આત્મા જાયાદિ સઙ્કલ્પ્ય ધ્યાયેજ્જાયાદિસિદ્ધયે ॥ ૧૩.૨૯૩॥

એવં કામપ્રેરિતઃ સન્યાતિ કર્માધિકારિતામ્ ।
અવરુન્ધન્તિ ગૃહિણં દેવાદ્યા અધિકારિણમ્ ॥ ૧૩.૨૯૪॥

ઇત્યવિદ્યાસૂત્ર ઉક્તોઽનર્થો યત્નેન વિસ્તૃતઃ ।
અયં નિવર્ત્યો વિદુષા જીવતેતિ શ્રુતેર્મતિઃ ॥ ૧૩.૨૯૫॥

કર્મોપાસ્તિફલં કણ્વઃ પ્રાહાત્મબ્રાહ્મણે તથા ।
અવ્યાકૃતં વ્યાકૃતં ચ વિદ્યાવિદ્યે હ્યતિસ્ફુટમ્ ॥ ૧૩.૨૯૬॥

અથાધ્યાયે ચતુર્થે ચ કણ્વઃ પઞ્ચમષષ્ઠયોઃ ।
ઉપાખ્યાનાનિ બહુધા વક્ષ્યત્યાત્માવબુદ્ધયે ॥ ૧૩.૨૯૭॥

અજાતશત્રુર્મૈત્રેયો દધ્યઙ્ઙિત્યુક્તનામભિઃ ।
આખ્યાનાન્યઙ્કિતાનિ સ્યુશ્ચતુર્થાધ્યાયગાનિ હિ ॥ ૧૩.૨૯૮॥

આશ્વલશ્ચાર્તભાગશ્ચ ભુજ્યૂષસ્તકહોલકાઃ ।
ગાર્ગ્યુદ્દાલકશાકલ્યાઃ પઞ્ચમાધ્યાયગા ઇમે ॥ ૧૩.૨૯૯॥

આખ્યાનાન્યેતદીયાનિ સ્યુઃ ષષ્ઠાધ્યાય ઈરિતમ્ ।
જનકસ્ય હ્યુપાખ્યાનં સઙ્ગ્રહાદ્વિસ્તરાદપિ ॥ ૧૩.૩૦૦॥

ઉપાખ્યાનેષુ સર્વેષુ પ્રત્યેકં બ્રહ્મ વર્ણિતમ્ ।
શ્રુતૈરેતૈરુપાખ્યાનૈર્બ્રહ્મવિદ્યા દૃઢા ભવેત્ ॥ ૧૩.૩૦૧॥

યામાત્મબ્રાહ્મણે વિદ્યાં કણ્વઃ પ્રોવાચ સા સ્ફુટમ્ ।
વ્યાખ્યાતા પ્રીયતાં તેન વિદ્યાતીર્થમહેશ્વરઃ ॥ ૧૩.૩૦૨॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
બૃહદારણ્યકે કાણ્વવિદ્યાપ્રકાશો નામ ત્રયોદશોઽધ્યાયઃ ॥ ૧૩॥

## ૧૪. અજાતશત્રુવિદ્યાપ્રકાશો નામ ચતુર્દશોઽધ્યાયઃ ।

અજાતશત્રુરધ્યાયે ચતુર્થે બ્રાહ્મણૈસ્ત્રિભિઃ ।
વિદ્યાં બાલાકયે પ્રાહ તાં વિસ્પષ્ટમિતો બ્રુવે ॥ ૧૪.૧॥

અજાતશત્રુર્બ્રહ્માત્મવેદનાચ્છૌર્યતોઽપિ ચ ।
અન્તર્બહિશ્ચ નિઃશત્રુઃ કાશ્યાં રાજા બભૂવ સઃ ॥ ૧૪.૨॥

ગર્ગગોત્રજવિપ્રોઽયં બાલાકિર્નૈવ તત્ત્વવિત્ ।
કિન્તુપ્રાણોપાસકોઽયં દર્પેણ મહતા વૃતઃ ॥ ૧૪.૩॥

અધ્યાત્મમ્ અધિદૈવં ચ બ્રહ્મ સ્યાત્પ્રાણદેવતા ।
સમષ્ટિવ્યષ્ટિરૂપાઽસાવિતિ ગાર્ગ્યસ્ય નિશ્ચયઃ ॥ ૧૪.૪॥

રવ્યાદ્યા વ્યષ્ટયઃ પ્રોક્તાઃ સમષ્ટિસ્તુ વિરાડ્ભવેત્ ।
ન મુખ્યબ્રહ્મતૈતેષામિતિ રાજ્ઞો વિનિર્ણયઃ ॥ ૧૪.૫॥

તસ્માદુપાસકો ગાર્ગ્યો ન મુખ્યં બ્રહ્મ વેત્ત્યતઃ ।
અન્વયવ્યતિરેકાભ્યાં બોધયામાસ તં નૃપઃ ॥ ૧૪.૬॥

સ્યાદ્વિજ્ઞાનમયો ભોક્તા ન પ્રાણ ઇતિ જાગરે ।
વિવેકો દુઃશકો યસ્માદત્ર દ્વાવપિ સુસ્થિતૌ ॥ ૧૪.૭॥

યો વિજ્ઞાનમયઃ સુપ્તાવસાવુપરતિં ગતઃ ।
વર્તતે પૂર્વવત્પ્રાણો વિવેકઃ સુશકસ્તદા ॥ ૧૪.૮॥

તસ્માત્સુષુપ્તં પુરુષમામન્ત્ર્ય પ્રાણનામભિઃ ।
અપ્રબોધાદભોક્તૃત્વં પ્રાણસ્યાઽસ્પષ્ટયન્નૃપઃ ॥ ૧૪.૯॥

યદિ ભોક્તા ભવેત્પ્રાણો જાગ્રદ્વચ્છબ્દમ્ આગતમ્ ।
અશ્રોષ્યન્નાઽશ‌ૃણોત્તસ્માન્ન સ્યાદ્ભોક્તોપલાદિવત્ ॥ ૧૪.૧૦॥

શ્રોત્રાદીનામ્ ઉપાધીનાં સુપ્તાવુપરતત્વતઃ ।
યથા જીવો ન વેત્ત્યેવં પ્રાણોઽપીત્યસદુચ્યતે ॥ ૧૪.૧૧॥

નેન્દ્રિયાણાં ભવેત્સ્વાપો યદિ પ્રાણપ્રધાનતા ।
નામાત્યાઃ શેરતે યસ્માદ્રાજ્ઞિ સ્વામિનિ જાગ્રતિ ॥ ૧૪.૧૨॥

દેવતાપ્રતિષેધાર્થં બોધ્યતે ચન્દ્રનામભિઃ ।
તદબોધાદભોક્તૃત્વં દેવતાયાઃ સુનિશ્ચિતમ્ ॥ ૧૪.૧૩॥

પ્રાણસ્યાભોક્તૃતાં ગાર્ગ્યો વ્યબુધ્યત તતો નૃપઃ ।
વિજ્ઞાનમયબોધાય ચક્રે યત્નમુપાયતઃ ॥ ૧૪.૧૪॥

આપિષ્યાપિષ્ય બહુશઃ સુપ્તં રાજા વ્યબોધયત્ ।
આપેષણોત્થસંક્ષોભાત્તતોઽસૌ પ્રત્યબુધ્યત ॥ ૧૪.૧૫॥

મૃતકલ્પમિમં દેહં સ્વચિતાઽઽવેશયન્નિવ ।
જ્વલન્નિવ સમુત્તસ્થૌ યઃ સ ભોક્તેતિ ગમ્યતામ્ ॥ ૧૪.૧૬॥

વિજ્ઞાનમન્તઃકરણં તસ્મિન્નાત્મોપલભ્યતે ।
રાહુશ્ચન્દ્રે યથા તદ્વદ્વિજ્ઞાનમયતા તતઃ ॥ ૧૪.૧૭॥

સ્વાભાસવદવિદ્યોત્થબુદ્ધ્યાદિવ્યાપ્તિવિભ્રમાત્ ।
તદાત્મત્વાભિમાની સન્નહમિત્યુપલભ્યતે ॥ ૧૪.૧૮॥

યદ્વોપલબ્ધિમાત્રોઽપિ વિજ્ઞાનાધ્યસ્તકર્તૃતામ્ ।
પ્રાપ્યોપલબ્ધા સ્યાત્તેન વિજ્ઞાનમય ઉચ્યતે ॥ ૧૪.૧૯॥

સ્ફટિકો રક્તતાં પ્રાપ્ય જપાકુસુમકલ્પિતામ્ ।
પદ્મરાગાયતે તદ્વદુપલબ્ધૃત્વમ્ આત્મનઃ ॥ ૧૪.૨૦॥

યદ્વોપલભ્યો દેહાદેર્વિજ્ઞાનેન વિવેચિતઃ ।
સ્યાદ્વિજ્ઞાનમયસ્તેન પુરુષઃ પરિપૂરણાત્ ॥ ૧૪.૨૧॥

અશેષાન્ કલ્પિતાનેષ વિજ્ઞાનાદીનનાત્મનઃ ।

આત્મા પૂરયતિ પ્રત્યક્સર્પાદીન્રશના યથા ॥ ૧૪.૨૨॥

યો વિજ્ઞાનમયસ્તસ્ય દ્વૈતધીઃ સ્વપ્નજાગ્રતોઃ ।
અસ્તિ સુપ્તૌ તુ સા નાસ્તિ સ્વભાવોઽસ્યાત્ર કો ભવેત્ ॥ ૧૪.૨૩॥

તસ્ય સ્વભાવં નિર્ણેતું સુપ્તૌ ક્વાભૂદયં પુનઃ ।
કુત આગાદિમં દેહમિત્યેતદિહ ચિન્ત્યતે ॥ ૧૪.૨૪॥

બુદ્ધાવક્ષેષુ ચાત્માઽયં ચિદ્રૂપઃ પ્રતિબિમ્બતિ ।
તાદૃગ્બુદ્ધીન્દ્રિયોપાધિર્જાગર્ત્યાત્મેતિ ભણ્યતે ॥ ૧૪.૨૫॥

કર્મક્ષયે બુદ્ધિરક્ષૈઃ સહાઽજ્ઞાને વિલીયતે ।
ચૈતન્યપ્રતિબિમ્બાશ્ચ લીયન્તે સ્વાશ્રયાનનુ ॥ ૧૪.૨૬॥

તદેન્દ્રિયાણાં વિજ્ઞાનં ધીવિજ્ઞાનેન સંયુતમ્ ।
વિજ્ઞાનમય આદત્તે ઇતિ શ્રુત્યોપવર્ણ્યતે ॥ ૧૪.૨૭॥

ધીવિજ્ઞાનોપસંહારે વિજ્ઞાનમયતાક્ષતૌ ।
નિર્વિકારાત્મચૈતન્યં કેવલં પરિશિષ્યતે ॥ ૧૪.૨૮॥

એતદેવ વિવક્ષિત્વા પ્રતિપાદયતિ શ્રુતિઃ ।
ય એષોઽન્તર્હૃદાકાશસ્તસ્મિન્ શેતે ઇતીદૃશી ॥ ૧૪.૨૯॥

બુદ્ધિર્હૃદયશબ્દેન હૃન્નિષ્ઠત્વાદ્વિવક્ષ્યતે ।
આ સમન્તાત્કાશતેઽયમિત્યાકાશોઽત્ર ચિદ્વપુઃ ॥ ૧૪.૩૦॥

બુદ્ધેરન્તઃ પ્રતીચોઽન્યો નાર્થઃ સમ્ભાવ્યતે યતઃ ।
તસ્માદાકાશશબ્દેન પ્રત્યગાત્મેહ ગૃહ્યતે ॥ ૧૪.૩૧॥

પ્રાણાદીનાં યતો જન્મ વક્ષ્યતે પ્રત્યગાત્મનઃ ।
તસ્માદાકાશશબ્દેન બ્રહ્મૈવાત્રાભિધીયતે ॥ ૧૪.૩૨॥

અધિષ્ઠાનત્વમન્તસ્ત્વમપરિચ્છિન્નવસ્તુનઃ ।
અન્તર્બહિર્વિભાગોઽયં ન મુખ્ય ઉપપદ્યતે ॥ ૧૪.૩૩॥

પરાક્ પ્રમેયભૂમિભ્યો મનસિ વ્યુત્થિતે સતિ ।
અનન્યબોધપ્રાત્યક્ષ્યાદ્ય એષ ઇહ ભણ્યતે ॥ ૧૪.૩૪॥

સ્વતોઽવગમરૂપેઽસ્મિન્ કૂટસ્થે નિર્દ્વયાત્મનિ ।
કાત્સ્ન્યેનાવસ્થિતિર્ભોક્તુઃશેત ઇત્યભિધીયતે ॥ ૧૪.૩૫॥

ઘટભઙ્ગે ઘટાકાશો મહાકાશાન્ન ભિદ્યતે ।
વિજ્ઞાનલોપે વિજ્ઞાનમયસ્યૈવં પરાત્મતા ॥ ૧૪.૩૬॥

દેહાદ્યધ્યક્ષતાં હિત્વા સુપ્તૌ સ્વાત્મનિ વર્તતે ।
ઇત્યેતત્સાધ્યતે શ્રુત્યા સમાખ્યાયાશ્ચ યુક્તિતઃ ॥ ૧૪.૩૭॥

સુપ્તસ્ય સ્વપિતીત્યેષા સમાખ્યા સર્વસમ્મતા ।
નિરુક્તિમાહુશ્છન્દોગાઃ સ્વમપીત ઇતીદૃશીમ્ ॥ ૧૪.૩૮॥

અતઃ સમાખ્યયા સુપ્તૌ સ્વાભાવિક્યાત્મનિ સ્થિતિઃ ।
યુક્તિશ્ચોપાધિસંહારઃ સંસારિત્વનિવૃત્તયે ॥ ૧૪.૩૯॥

વાગાદ્યુપાધિસમ્બન્ધાત્સંસારિત્વમિવેક્ષ્યતે ।
તે તૂપસંહૃતાઃ સર્વે તતોઽસંસારિતાત્મનઃ ॥ ૧૪.૪૦॥

સર્વેન્દ્રિયવિયોગેઽપિ સુખિદુઃખિત્વમાત્મનઃ ।
સ્વપ્ને દૃષ્ટમતઃ સઙ્ગ આત્મનસ્તાત્ત્વિકો ભવેત્ ॥ ૧૪.૪૧॥

મૈવં મૃષાત્વાત્સ્વપ્નસ્ય મનોમાત્રવિજૃમ્ભણાત્ ।
બાહ્યેન્દ્રિયવિલોપેઽપિ ન મનો લુપ્યતે તદા ॥ ૧૪.૪૨॥

મહારાજાદયસ્તસ્ય સ્વપ્નાનુભવગોચરાઃ ।
ન વાસ્તવા ઇતિ જ્ઞેયાઃ શયાનેભ્યઃ પૃથક્ત્વતઃ ॥ ૧૪.૪૩॥

દૃશ્યં મિથ્યાસ્તુ તદ્દ્રષ્ટુર્દ્રષ્ટૃતા વાસ્તવી તતઃ ।
દૃશ્યં સાઽપેક્ષતેઽત્યેષા શઙ્કાત્ર વિનિવાર્યતે ॥ ૧૪.૪૪॥

ન કિઞ્ચન યદા વેદ તદા સુપ્ત ઇતીરણાત્ ।
આત્મનો જ્ઞાનકર્તૃત્વં સુપ્તૌ નાસ્તીતિ ગમ્યતે ॥ ૧૪.૪૫॥

સુપ્તૌ કેન ક્રમેણાયમુપાધિઃ પ્રવિલીયતે ।
તત્ક્રમયાવબોધાય હૃદયાદિ વિવિચ્યતે ॥ ૧૪.૪૬॥

આનાભિતસ્તથા કણ્ઠાદ્ધૃદયં મધ્યતઃ સ્થિતમ્ ।
સનાલં પદ્મકોશાભં પઞ્ચચ્છિદ્રમધોમુખમ્ ॥ ૧૪.૪૭॥

કદમ્બકુસુમોદ્ભૂતકેસરા ઇવ સર્વતઃ ।
પ્રસૃતા હૃદયાન્નાડ્યો બહ્વન્નરસપૂરિતાઃ ॥ ૧૪.૪૮॥

નિર્ગત્ય હૃદયાદ્બુદ્ધિસ્તાસુ સ્વપ્નં પ્રપશ્યતિ ।
તાભિર્દેહાદ્બહિર્ગત્વા જાગર્તીત્યભિધીયતે ॥ ૧૪.૪૯॥

પુનઃ પ્રત્યવસૃત્યૈષા પુરીતદ્વેષ્ટિતે હૃદિ ।
પ્રવિશ્ય લીયતે દેહં વ્યાપ્ય સામાન્યવૃત્તિતઃ ॥ ૧૪.૫૦॥

સર્વસંસારદુઃખાનામત્યન્તોપરમાત્તદા ।
આનન્દસ્ય પરા નિષ્ઠા દૃષ્ટાન્તૈઃ સોપમીયતે ॥ ૧૪.૫૧॥

ઇન્દ્રિયસ્યાપ્રરૂઢત્વાત્સ્વેષ્ટપ્રાપ્તેર્વિવેકતઃ ।
નીરાગાણાં બાલરાજબ્રાહ્મણાનાં ક્રમાત્સુખમ્ ॥ ૧૪.૫૨॥

દુઃખં રાગદ્વેષજન્યં તદભાવે સુખં સ્વતઃ ।
ઇતિ વ્યાપ્તિગૃહીત્યર્થં બહુદૃષ્ટાન્તવર્ણનમ્ ॥ ૧૪.૫૩॥

અદ્વયાનન્દરૂપત્વમિત્થં સુપ્તૌ પ્રદર્શિતમ્ ।
એતાવતા સ્વભાવોઽસ્ય નિર્ણીતઃ પ્રત્યગાત્મનઃ ॥ ૧૪.૫૪॥

ક્વાભૂદેષ ઇતિ પ્રશ્નં નિર્ણીય કુત આગતઃ ।
ઇતિ પ્રશ્નં વિનિર્ણેતુમૂર્ણનાભ્યાદિકા શ્રુતિઃ ॥ ૧૪.૫૫॥

યઃ સુપ્તૌ નિશ્ચિતઃ સ્વાત્મા તસ્ય બ્રહ્મત્વસિદ્ધયે ।
જગત્સૃષ્ટિર્વર્ણ્યતેઽસ્માત્સૃષ્ટૌ દૃષ્ટાન્ત ઉચ્યતે ॥ ૧૪.૫૬॥

અચેતનો યથાતન્તુરૂર્ણનાભેઃ સચેતનાત્ ।
જાતશ્ચિદાત્મનસ્તદ્વત્પ્રાણલોકાદ્યચેતનમ્ ॥ ૧૪.૫૭॥

વિસ્ફુલિઙ્ગા યથા ચાગ્નેર્જાયતેઽગ્નિસ્વભાવતઃ ।
તથા સુપ્તાત્મનો જીવા વિજ્ઞાનમયનામકાઃ ॥ ૧૪.૫૮॥

સ્વરૂપતો જન્મતશ્ચ પ્રાણાદિભ્રાન્તિકલ્પિતઃ ।
જીવસ્ય કલ્પિતં જન્મ સ્વરૂપં તુ ન કલ્પિતમ્ ॥ ૧૪.૫૯॥

ઉદ્ભૂતિસ્થિતિનાશાઃ સ્યુર્જગતોઽસ્ય પ્રતિક્ષણમ્ ।
અવિદ્યામાત્રહેતુત્વાન્નામીષાં વિદ્યતે ક્રમઃ ॥ ૧૪.૬૦॥

યસ્માદવિદ્યયૈવાત્મા પ્રાણક્ષેત્રજ્ઞરૂપભાક્ ।
સ્વતોઽતઃ સ પરં બ્રહ્મ તસ્યોપનિષદુચ્યતે ॥ ૧૪.૬૧॥

યદ્ગુહ્યં બ્રહ્મણો નામ બોધાયોપાસનાય વા ।
તત્સ્યાદુપનિષચ્છબ્દવાચ્યં તચ્ચાત્ર બુધ્યતે ॥ ૧૪.૬૨॥

સત્યસ્ય સત્યમિત્યેતન્નામબ્રહ્માઽવબોધકમ્ ।

પ્રાણા આપાતતઃ સત્યાઃ સત્યં બ્રહ્મૈવ વસ્તુતઃ ॥ ૧૪.૬૩॥

અસત્યો દેહ ઉદિત એકજન્મન્યુપક્ષયાત્ ।
સત્યાઃ પ્રાણા લિઙ્ગરૂપા આમોક્ષમનપક્ષયાત્ ॥ ૧૪.૬૪॥

મોક્ષેઽપ્યક્ષીણ આત્મા તુ સત્યસત્ય ઉદાહૃતઃ ।
સત્યસ્ય સત્યં પ્રોવાચ બ્રહ્મ બાલકયે નૃપઃ ॥ ૧૪.૬૫॥

પ્રાણા વૈ સત્યમિત્યુક્તં યત્સત્યં વ્યાવહારિકમ્ ।
બાલાક્યભિમતં તત્તુ દ્વિતીયબ્રાહ્મણે સ્ફુટમ્ ॥ ૧૪.૬૬॥

શિશુવદ્વિષયાસઙ્ગરહિતઃ પ્રાણ ઇષ્યતે ।
વાગાદીનામિવ યતો વિષયોઽસ્ય ન દૃશ્યતે ॥ ૧૪.૬૭॥

શરીરમસ્યાધાનં સ્યાદ્દેહમાપાદમસ્તકમ્ ।
સામાન્યવૃત્ત્યા સંવ્યાપ્ય ચેષ્ટયત્યનિશં યતઃ ॥ ૧૪.૬૮॥

પ્રત્યાધાનં શિરો જ્ઞેયં પ્રતિચ્છિદ્રં વ્યવસ્થિતઃ ।
પ્રસારયતિ નેત્રાદીન્ પ્રાણો મૂર્ધ્નિ વ્યવસ્થિતઃ ॥ ૧૪.૬૯॥

પ્રાણસ્ય બન્ધનસ્તમ્ભઃ શરીરબલમિષ્યતે ।
દૌર્બલ્યે સતિ દેહસ્ય પ્રાણોત્ક્રાન્તિર્હિ દૃશ્યતે ॥ ૧૪.૭૦॥

બન્ધનાયાસ્ય દામાન્નં વત્સબન્ધનરજ્જુવત્ ।
અન્ને ત્રિધા વિભક્તેઽસ્મિન્ ભાગાભ્યાં બધ્યતે સ્વયમ્ ॥ ૧૪.૭૧॥

સ્થૂલો ભાગઃ પુરીષં સ્યાન્મધ્યમો દેહપોષકઃ ।
પ્રાણં તર્પયતે સૂક્ષ્મ ઇતિ બદ્ધં વપુર્દ્વયમ્ ॥ ૧૪.૭૨॥

એવં વિવેચિતં પ્રાણં ય ઉપાસ્તે રુણદ્ધિ સઃ ।
ભ્રાતૃવ્યાન્દ્વિષતઃ સપ્ત મૂર્ધ્નિ છિદ્રવ્યવસ્થિતાન્ ॥ ૧૪.૭૩॥

ભ્રાતૃવ્યાઃ સ્યુઃ સહોત્પત્તેઃ શબ્દાદ્યાઃ સઙ્ગવૃત્તયઃ ।
દ્વિષન્તિ ચ મુમુક્ષું તાઃ પ્રત્યગ્દૃષ્ટ્યાપહારતઃ ॥ ૧૪.૭૪॥

સેવતેઽક્ષિસ્થિતં પ્રાણં સપ્ત રુદ્રાદિદેવતાઃ ।
અક્ષીણા ઇત્યુપાસ્તે યઃ સોઽન્નમક્ષયમશ્નુતે ॥ ૧૪.૭૫॥

કર્ણાદિસપ્તચ્છિદ્રેષુ ગૌતમાદ્યૃષિનામકાઃ ।
સ્થિતાઃ પ્રાણા ઇતિ ધ્યાયેદ્વાચં ચ બ્રાહ્મવાદિનીમ્ ॥ ૧૪.૭૬॥

હિરણ્યગર્ભરૂપેણ સર્વભુક્ સ્યાદુપાસકઃ ।
ઇતિ ગાર્ગ્યમતં બ્રહ્મ બ્રાહ્મણેઽસ્મિન્ પ્રપઞ્ચિતમ્ ॥ ૧૪.૭૭ ॥

ગાર્ગ્યોક્તં બ્રહ્મ વિસ્તૃત્ય તન્નિરાસાય સામ્પ્રતમ્ ।
તૃતીયબ્રાહ્મણે પ્રાહ રાજ્ઞોક્તં બ્રહ્મ વિસ્તૃતમ્ ॥ ૧૪.૭૮ ॥

પ્રથમબ્રાહ્મણે રાજા બ્રહ્મ યદ્યપ્યશેષતઃ ।
ઉવાચાથાપિ સત્યસ્ય સત્યતા નૈવ વિસ્તૃતા ॥ ૧૪.૭૯ ॥

સત્યસત્યત્વવિસ્તારમુખેન પ્રતિપાદ્યતે ।
નિષ્પ્રપઞ્ચબ્રહ્મતત્ત્વં તૃતીયબ્રાહ્મણે સ્ફુટમ્ ॥ ૧૪.૮૦ ॥

દ્વે એવ બ્રહ્મણો રૂપે પ્રપઞ્ચત્વમુપાગતે ।
મૂર્તામૂર્તાત્મકે યાભ્યામરૂપં બ્રહ્મ રૂપ્યતે ॥ ૧૪.૮૧ ॥

મૂર્તામૂર્ત પ્રપઞ્ચશ્ચ વાસના ચેતિ વા દ્વયમ્ ।
સવાસનમિદં રૂપમનિદં ચેતિ વા દ્વયમ્ ॥ ૧૪.૮૨ ॥

સન્નિવેશો નેત્રદૃશો યસ્ય તન્મૂર્તમુચ્યતે ।
ક્ષિત્યમ્બ્વગ્નિત્રયં મૂર્તમમૂર્તમિતરદ્દ્વયમ્ ॥ ૧૪.૮૩ ॥

મૂર્તં મર્ત્યં શીઘ્રનાશાત્પરિચ્છેદાત્સ્થિતં તથા ।
પ્રત્યક્ષત્વાત્સદિત્યુક્તમમૂર્તે તુ વિપર્યયઃ ॥ ૧૪.૮૪ ॥

તન્નશ્યતિ વિલમ્બેનેત્યમૃતં વ્યાપ્તિમત્વતઃ ।
યત્પરોક્ષમતસ્ત્યત્સ્યાન્મૂર્તામૂર્તાત્મકં જગત્ ॥ ૧૪.૮૫ ॥

અધ્યાત્મમધિદૈવં ચ દ્વિધા સત્યં વ્યવસ્થિતમ્ ।
પ્રસિદ્ધમુભયત્રાપિ સ્થૂલસૂક્ષ્મવપુર્દ્વયમ્ ॥ ૧૪.૮૬ ॥

સ્થૂલસારતયા જ્ઞેયે ચક્ષુરાદિત્યમણ્ડલે ।
મૂર્તમર્ત્યપરિચ્છિન્નપ્રત્યક્ષત્વવિશેષિતે ॥ ૧૪.૮૭ ॥

અમૂર્તામૃતસંવ્યાપ્તપરોક્ષત્વૈસ્તુ સંયુતમ્ ।
ઉભયત્ર સ્થિતં લિઙ્ગમમૂર્તરસ ઉચ્યતે ॥ ૧૪.૮૮ ॥

સારાસારયુતે રૂપે મૂર્તામૂર્તે ઉદીરિતે ।
અરૂપં બ્રહ્મરૂપાભ્યાં વ્યવહારે નિરૂપ્યતે ॥ ૧૪.૮૯ ॥

મૂર્તામૂર્તે બ્રહ્મરૂપે ઇતિ પક્ષો નિરૂપિતઃ ।
પ્રપઞ્ચતદ્વાસને દ્વે રૂપે ઇત્યેષ વર્ણ્યતે ॥ ૧૪.૯૦ ॥

પ્રપઞ્ચો નામ પૂર્વોક્તં મૂર્તામૂર્તદ્વયં ભવેત્ ।
સદ્વાસના વિચિત્રાઃ સ્યુરનન્તા લિઙ્ગમાશ્રિતાઃ ॥ ૧૪.૯૧॥

અનેકવાસનાચિત્રં તલ્લિઙ્ગં પટભિત્તિવત્ ।
માયેન્દ્રજાલસદૃશં વ્યામોહાસ્પદમાત્મનઃ ॥ ૧૪.૯૨॥

એતાવન્માત્ર આત્મેતિ તત્ર ભ્રાન્તા નિરાગમાઃ ।
બૌદ્ધકાણાદસાઙ્ખ્યાદ્યાસ્તર્કમાત્રોપજીવિનઃ ॥ ૧૪.૯૩॥

એકૈકાં વાસનાં તત્ર પ્રતિક્ષણવિનશ્વરીમ્ ।
આહુઃ ક્ષણિકમાત્માનં બૌદ્ધા વિજ્ઞાનવાદિનઃ ॥ ૧૪.૯૪॥

આત્મનો દ્રવ્યભૂતસ્ય ગુણા બુદ્ધ્યાદયો નવ ।
વાસનાત્વેન વેદોક્તા ઇતિ વૈશેષિકાદયઃ ॥ ૧૪.૯૫॥

ત્રિગુણં યત્પ્રધાનં તત્પુરુષાર્થેન હેતુના ।
પ્રવર્તતે વાસનાત્વક્લૃપ્તિસ્તત્રેતિ કાપિલાઃ ॥ ૧૪.૯૬॥

અનન્તકલ્પોપચિતા અનન્તા એવ વાસનાઃ ।
ઉદાહરણમાત્રં તુ દૃષ્ટાન્તૈરિહ વર્ણ્યતે ॥ ૧૪.૯૭॥

હારિદ્રં વસનં યદ્વત્સંસર્ગાત્પીતતાં વ્રજેત્ ।
તદ્વન્નાર્યાદિસંસર્ગાલ્લિઙ્ગં રાગાદિમદ્ભવેત્ ॥ ૧૪.૯૮॥

ઈષત્પાણ્ડુશ્ચ પરુષઃ સ્યાત્સ્વતઃ શ્વેતકમ્બલઃ ।
તથૈષચ્છ્રદ્ધયા યુક્તં સ્વતો રોષાદિભાગપિ ॥ ૧૪.૯૯॥

ઇન્દ્રગોપોઽતિરક્તઃ સ્યાત્સ્વત એવ તથા મનઃ ।
વિવિક્તદેશસ્થસ્યાપિ વિષયપ્રવણં ક્વચિત્ ॥ ૧૪.૧૦૦॥

અગ્નેરર્ચિર્યથા ભાસ્વદ્દહત્યપિ તથા ક્વચિત્ ।
વેદશાસ્ત્રવિદપ્યન્યાન્ બાધેતેર્ષ્યાદ્યુપદ્રવૈઃ ॥ ૧૪.૧૦૧॥

સિતામ્ભોજં યથા સૌમ્યં સુગન્ધિ મૃદુ ચ સ્વતઃ ।
જન્મનૈવ તથા ચિત્તં યુક્તં શમદમાદિભિઃ ॥ ૧૪.૧૦૨॥

તીવ્રવિદ્યુદ્યથાત્યન્તં ઘનધ્વાન્તાપનોદકૃત્ ।
તથા હિરણ્યગર્ભસ્ય સર્વજ્ઞા વાસના ભવેત્ ॥ ૧૪.૧૦૩॥

તામુપાસીન આપ્નોતિ શ્રિયમત્યન્તમૂર્જિતામ્ ।

રજઃસત્ત્વતમોયોગાદ્વાસનાનાં વિચિત્રતા ॥ ૧૪.૧૦૪॥

પ્રપઞ્ચવાસને બ્રહ્મરૂપે ઇત્યેતદીરિતમ્ ।
તથેદમનિદંરૂપે ઇતિ પક્ષોઽધુનોચ્યતે ॥ ૧૪.૧૦૫॥

સવાસનં જગત્સર્વં તત્રેદં રૂપમીરિતમ્ ।
સચ્ચ ત્યચ્ચેતિ સત્યં તત્પ્રોચ્યતે પાઞ્ચભૌતિકમ્ ॥ ૧૪.૧૦૬॥

સત્યસ્ય સત્યમનિદં વક્તવ્યં શિષ્યતે તતઃ ।
આદેશોઽનન્તરં તસ્ય ક્રિયતેઽનન્યમાનિનઃ ॥ ૧૪.૧૦૭॥

આદેશો નેતિ નેતીતિ બ્રહ્મતત્ત્વાવબોધકઃ ।
યથાયમુપપદ્યેત તથા સમ્યઙ્નિરૂપ્યતે ॥ ૧૪.૧૦૮॥

ઇતિશબ્દેન ચિદ્ભાસ્યમનૂદ્ય પ્રતિષિધ્યતે ।
નકારેણ દ્વિરુક્તિસ્તુ વીપ્સા કૃત્સ્નનિષિદ્ધયે ॥ ૧૪.૧૦૯॥

મૂર્તં વા યદિ વામૂર્તમજ્ઞાનં વાસનાથવા ।
અધ્યાત્મમધિદૈવં વા તત્સર્વં પ્રતિષિધ્યતે ॥ ૧૪.૧૧૦॥

અથવાત્રેતિ શબ્દૌ દ્વૌ જીવેશોપાધિવાચિનૌ ।
નકારાભ્યામુપાધી દ્વૌ નિષિધ્ય બ્રહ્મ લક્ષ્યતે ॥ ૧૪.૧૧૧॥

યથા માત્રાદિસત્તેયં પ્રત્યક્ સંવિત્સસાક્ષિકા ।
પ્રમાત્રાદેરભાવોઽપિ તથાઽતસ્તેન લક્ષ્યતે ॥ ૧૪.૧૧૨॥

અતિરોહિતસંવિત્કો દૃષ્ટિમાત્રાત્મકત્વતઃ ।
વિનૈવ વાચકં શબ્દં બોધ્યો લક્ષણયાઽપ્યતઃ ॥ ૧૪.૧૧૩॥

અનન્યાનુભવેનૈવ ભાવાભાવાત્મભૂમિષુ ।
પ્રત્યક્કૂટસ્થમાત્માનં પશ્યન્નાસ્તે ફલાત્મનઃ ॥ ૧૪.૧૧૪॥

અતો માત્રાદિસમ્ભેદો યત્ર યત્ર નિવર્તતે ।
તત્ર તત્રૈકકઃ પ્રત્યક્ સ્વમહિમ્નૈવ સિદ્ધ્યતિ ॥ ૧૪.૧૧૫॥

એતદ્વસ્તુ સ્વતઃ સિદ્ધં પ્રમાત્રાદ્યનપેક્ષતઃ ।
સર્વસ્યૈવ તતઃ સિદ્ધે કથં સિદ્ધ્યેત્તદન્યતઃ ॥ ૧૪.૧૧૬॥

તદિત્થં નેતિ નેતીતિ વાક્યં બ્રહ્માત્મબોધકમ્ ।
જીવેશોપાધિનિહ્નુત્યા લક્ષ્યાખણ્ડાવસાનતઃ ॥ ૧૪.૧૧૭॥

ઇત્યેવમનિદં રૂપં બ્રહ્મણઃ પ્રતિપાદિતમ્ ।
નિર્નામ્નસ્તસ્ય નામૈતત્સત્યસત્યમિતિ શ્રુતમ્ ॥ ૧૪.૧૧૮॥

સચ્ચ ત્યચ્ચેતિ સત્યાખ્યાઃ પ્રાણાસ્તે બ્રહ્મણાત્મના ।
આત્મવન્તસ્તતો બ્રહ્મ સત્યસત્યમિતીરિતમ્ ॥ ૧૪.૧૧૯॥

અજાતશત્રુર્યાં વિદ્યાં બ્રાહ્મણૈસ્ત્રિભિરુક્તવાન્ ।
તદ્વ્યાખ્યાનેન સન્તુષ્યાદ્વિદ્યાતીર્થમહેશ્વરઃ ॥ ૧૪.૧૨૦॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
અજાતશત્રુવિદ્યાપ્રકાશો નામ ચતુર્દશોઽધ્યાયઃ ॥ ૧૪॥

## ૧૫. બૃહદારણ્યોપનિષદિ મૈત્રેયીવિદ્યાપ્રકાશો નામ પઞ્ચદશોઽધ્યાયઃ ।

મૈત્રેય્યૈ યાજ્ઞવલ્ક્યો યાં ચતુર્થબ્રાહ્મણેઽબ્રવીત્ ।
સસાધનાં બ્રહ્મવિદ્યાં વિસ્પષ્ટં વ્યાકરોતિ તામ્ ॥ ૧૫.૧॥

વિત્તસ્ય કર્મહેતુત્વાત્તત્ત્યાગો જ્ઞાનસાધનમ્ ।
ઇતિ દર્શયિતું પ્રાહ શ્રુતિરાખ્યાયિકાં શુભામ્ ॥ ૧૫.૨॥

એષણાત્રયસંન્યાસો વિત્તત્યાગેન લક્ષ્યતે ।
જ્ઞાનસ્ય હેતુઃ સંન્યાસ ઇતિ શાસ્ત્રેષુ ડિણ્ડિમઃ ॥ ૧૫.૩॥

દ્વિવિધઃ કર્મસંન્યાસઃ ફલસાધનભેદતઃ ।
ફલાય જ્ઞાનિનસ્ત્યાગો જિજ્ઞાસોર્જ્ઞાનસિદ્ધયે ॥ ૧૫.૪॥

જ્ઞાનિત્વાદ્યાજ્ઞવલ્ક્યોઽયં જીવન્મુક્તિફલેચ્છયા ।
ચિત્તવિક્ષેપબાહુલ્યં ગાર્હસ્થ્યં ત્યક્તુમિચ્છતિ ॥ ૧૫.૫॥

નિદિધ્યાસસ્વેતિ શબ્દાત્સર્વત્યાગફલં જગૌ ।
ન હ્યન્યચિન્તામત્યક્ત્વા નિદિધ્યાસિતુમર્હતિ ॥ ૧૫.૬॥

નિરન્તરં વિચારો યઃ શ્રુતાર્થસ્ય ગુરોર્મુખાત્ ।
તન્નિદિધ્યાસનં પ્રોક્તં તચ્ચૈકાગ્ર્યેણ લભ્યતે ॥ ૧૫.૭॥

અનાત્મન્યરુચિશ્ચિત્તે રુચિશ્ચાત્મનિ ચેદ્ભવેત્ ।
પુણ્યપુઞ્જેન શુદ્ધં તચ્ચિત્તમૈકાગ્ર્યમર્હતિ ॥ ૧૫.૮॥

શુધ્યદ્દુરિતમૈકાગ્ર્યં વિવેકેનાભિવર્ધયેત્ ।
પ્રિયાપ્રિયવિવેકોઽતો મૈત્રેય્યા ઉપદિશ્યતે ॥ ૧૫.૯॥

પતિજાયાદિ ભોગેષુ (ભોજ્યેષુ) ભોક્તર્યાત્મનિ ચેક્ષ્યતે ।
પ્રીતિસ્તત્ર ક્વ મુખ્યેયં કુત્રામુખ્યેતિ ચિન્ત્યતામ્ ॥ ૧૫.૧૦॥

સદા ભૂયાસમેવાહં મા ન ભૂવં કદાચન ।
ઇત્યનોપાધિકી પ્રીતિઃ પ્રાણિનામાત્મનીક્ષ્યતે ॥ ૧૫.૧૧॥

સ્વસમ્બન્ધોપાધિનૈવ ભોગ્યે પ્રીતિર્ન તુ સ્વતઃ ।
અન્યથા વૈરિભોગ્યેઽપિ ભોગ્યત્વાત્પ્રીતિરાપતેત્ ॥ ૧૫.૧૨॥

અવિચારેણ પુત્રાદૌ યા પ્રીતિસ્તાં વિચારતઃ ।
આત્મન્યેવોપસંહૃત્ય ચિત્તૈકાગ્ર્યં વિવર્ધયેત્ ॥ ૧૫.૧૩॥

ઐકાગ્ર્યમચલં કૃત્વા નિદિધ્યાસનકારણમ્ ।
આત્મા દ્રષ્ટવ્ય ઇત્યેતત્સૂત્રં વ્યાખ્યાતુમાદદે ॥ ૧૫.૧૪॥

આહાત્મશબ્દઃ પ્રત્યગ્ચં તથા લોકેઽનુભૂતિતઃ ।
અનેનાઽત્રાઽઽત્મશબ્દેન પ્રમેયં નિર્દિદિક્ષિતમ્ ॥ ૧૫.૧૫॥

દ્રષ્ટવ્ય ઇતિ નિર્દિષ્ટા પ્રમિતિર્દૃશિધાતુના ।
અજ્ઞાતજ્ઞાપનં તવ્યપ્રત્યયેનાઽભિધીયતે ॥ ૧૫.૧૬॥

અજ્ઞાત આત્મા વેદાન્તજન્યજ્ઞાનેન મીયતે ।
ઇત્યેષ એવ વાક્યાર્થો નાઽપ્રવૃત્તપ્રવર્તનમ્ ॥ ૧૫.૧૭॥

નન્વહમ્પ્રત્યયેનાત્મા વેદાન્તશ્રવણાત્પુરા ।
વિજ્ઞાત ઇતિ ચેન્મૈવં સાર્વાત્મ્યાઽનવબોધનાત્ ॥ ૧૫.૧૮॥

લિઙ્ગદેહપરિચ્છિન્નરૂપગ્રાહિણ્યહમ્મતિઃ ।
સાર્વાત્મ્યમાત્મનસ્તત્ત્વં તદજ્ઞાતમહન્ધિયા ॥ ૧૫.૧૯॥

સર્વાસૂપનિષત્સ્વેતત્સાર્વાત્મ્યં પ્રતિપદ્યતે ।
કાર્યજ્ઞેયસમાપ્તિઃ સ્યાત્સાર્વાત્મ્યસ્યાઽવબોધતઃ ॥ ૧૫.૨૦॥

આત્મા દ્રષ્ટવ્ય ઇત્યુક્ત્યા તત્ત્વધીરુપદર્શિતા ।
શ્રોતવ્ય ઇત્યાદિના તુ વિચાર ઉપદર્શ્યતે ॥ ૧૫.૨૧॥

શ્રુત્યર્થાવિષ્કૃતેર્હેતુઃ શબ્દશક્તિવિવેકકૃત્ ।
શ્રુતિલિઙ્ગાદિકો ન્યાયઃ પ્રોક્તઃ શ્રોતવ્ય ઇત્યતઃ ॥ ૧૫.૨૨॥

અર્થાઽસમ્ભાવનોચ્છેદી તર્કો મનનમીરિતમ્ ।

વેદશાસ્ત્રાऽવિરોધ્યત્ર તર્કો ગ્રાહ્યો ન ચેતરઃ ॥ ૧૫.૨૩॥

અપરાયત્તબોધોऽત્ર નિદિધ્યાસનમુચ્યતે ।
ધ્યાનાશઙ્કાનિવૃત્ત્યર્થં વિજ્ઞાનેનેત્યુદીરણાત્ ॥ ૧૫.૨૪॥

દ્રષ્ટવ્ય ઇતિ વિજ્ઞાનમુદ્દિશ્ય શ્રવણં તથા ।
મનનં ચ વિધાયાऽથ વિજ્ઞાનમવધિં જગૌ ॥ ૧૫.૨૫॥

નન્વનાત્મા ન વિજ્ઞાત આત્મદર્શનમાત્રતઃ ।
તતોऽકૃત્સ્નત્વદોષશ્ચેન્મૈવં સર્વસ્ય વેદનાત્ ॥ ૧૫.૨૬॥

આત્મનો દર્શનેનેદં દૃષ્ટં સ્યાદખિલં જગત્ ।
પ્રત્યઙ્માત્રૈકયાથાત્મ્યાત્કાર્યકારણવસ્તુનઃ ॥ ૧૫.૨૭॥

કાર્યાત્મા કારણાત્મા ચ દ્વાવાત્માનૌ પરાત્મનઃ ।
પ્રત્યગ્યાથાત્મ્યમોહોત્થૌ મોહે નષ્ટે વિનશ્યતઃ ॥ ૧૫.૨૮॥

મોહતત્કાર્યયોર્બાધે પ્રત્યક્ સર્વમિતીર્યતે ।
અતઃ પ્રતીચિ વિજ્ઞાતે સુલભં સર્વવેદનમ્ ॥ ૧૫.૨૯॥

તત્રૈવં સતિ યો મૂઢઃ સમસ્તવ્યસ્તરૂપતામ્ ।
જ્ઞાતવ્યાં મનુતે તાં તુ વેદ એવ નિષેધતિ ॥ ૧૫.૩૦॥

યો વિપ્રજાતિશ્ચૈતન્યાદન્યદ્વસ્ત્વિતિ મન્યતે ।
કૈવલ્યાત્તં પરાકુર્યાત્વિપ્રજાતિઃ પરાઙ્મુખમ્ ॥ ૧૫.૩૧॥

બ્રાહ્મણોऽહમિતિ ભ્રાન્ત્યા બૃહસ્પતિસવાદિષુ ।
પ્રવૃત્તો લભતે જન્મેત્યેષૈવાસ્ય પરાક્રિયા ॥ ૧૫.૩૨॥

વિપ્રત્વવત્ક્ષત્રલોકદેવભૂતાદિકં જગત્ ।
સ્વસ્માદ્ભેદેન પશ્યન્તં ક્લેશયેદપરાધિનમ્ ॥ ૧૫.૩૩॥

યદસ્તિ તન્ન જાનાતિ યન્નેહાસ્તિ તદીક્ષતે ।
ઇત્યેવમપરાધોऽસ્ય વિદ્યતે ભેદદર્શિનઃ ॥ ૧૫.૩૪॥

યોऽન્યથા સન્તમાત્માનમન્યથા પ્રતિપદ્યતે ।
કિં તેન ન કૃતં પાપં ચોરેણાત્માપહારિણા ॥ ૧૫.૩૫॥

અપોદિતત્વાજ્જાત્યાદિદર્શનસ્યેહ કિં પુનઃ ।
દ્રષ્ટવ્યમિત્યતો વક્તિ સર્વાખણ્ડત્વદર્શનમ્ ॥ ૧૫.૩૬॥

પ્રત્યક્ત્વેન ચ આભાતિ પ્રત્યગ્બુદ્ધિપ્રમાણકઃ ।
તાવન્માત્રૈકયાથાત્મ્યમુક્તજાત્યાદિ દૃશ્યતામ્ ॥ ૧૫.૩૭ ॥

એવં શ્રોતવ્ય આત્માયં સમાપ્તઃ શ્રવણે વિધિઃ ।
કથં મન્તવ્ય ઇત્યત્ર દુન્દુભ્યાદિ નિદર્શનમ્ ॥ ૧૫.૩૮ ॥

સ્થિતૌ જનૌ લયેઽપ્યેતજ્જગદાત્માતિરેકતઃ ।
નાસ્તીત્યેતત્ક્રમેણાઽત્ર દૃષ્ટાન્તૈઃ પ્રતિપાદ્યતે ॥ ૧૫.૩૯ ॥

યથા દુન્દુભિશબ્દત્વસામાન્યાદુત્થિતાન્પૃથક્ ।
નાદાતું શક્નુયાત્કશ્ચિદ્વિશેષાનસિકોશવત્ ॥ ૧૫.૪૦ ॥

તદ્વદાત્માતિરેકેણ નાત્મીયોઽર્થો મનાગપિ ।
યતઃ સમીક્ષિતું શક્યસ્તેનાસૌ રજ્જુસર્પવત્ ॥ ૧૫.૪૧ ॥

સામાન્યં તદ્વિશેષશ્ચ તદ્વિશેષા ઇતિ ત્રયઃ ।
દુન્દુભિસ્તસ્ય ચાઘાતઃ શબ્દશ્ચેત્યેભિરીરિતાઃ ॥ ૧૫.૪૨ ॥

સામાન્યં દૌન્દુભઃ શબ્દો વીરાદિરસસંયુતઃ ।
વિશેષસ્તદ્વિશેષાસ્તુ નીચોચ્ચાદિવિભેદિનઃ ॥ ૧૫.૪૩ ॥

નીચાદિભેદિનઃ શબ્દાઃ વીરાદિરસસંયુતે ।
અન્તર્ભવન્તિ સોઽપ્યન્તર્ભૂતઃ સ્યાદ્દૌન્દુભધ્વનૌ ॥ ૧૫.૪૪ ॥

એવં શઙ્ખેઽપિ વીણાયાં યોજયિત્વા પુનઃ (તતઃ) પુનઃ ।
શઙ્ખદુન્દુભિવીણાખ્યધ્વનીનન્યત્ર યોજયેત્ ॥ ૧૫.૪૫ ॥

ધ્વનિત્રયં મહાશબ્દસામાન્યેઽતર્ભવેદિતિ ।
વિવક્ષયા શઙ્ખભેરીવીણાસ્તિસ્ર ઉદીરિતાઃ ॥ ૧૫.૪૬ ॥

યથા વિશેષસામાન્યતત્સામાન્યપરમ્પરા ।
શબ્દે સ્થિતા તથા સર્વમુપલબ્ધિસ્થમીક્ષતે ॥ ૧૫.૪૭ ॥

ઉપલબ્ધોઽસ્તિ સન્ કુમ્ભો લમ્બોષ્ઠો દેશકાલવાન્ ।
પૂર્વાઽપૂર્વાઽતિરેકેણ નોત્તરોઽર્થોઽનુભૂયતે ॥ ૧૫.૪૮ ॥

એવં ચિદન્વયાત્સર્વં ચિદધ્યસ્તં તથા સતિ ।
ચિદાત્મૈવાસ્ય સર્વસ્ય તાત્ત્વિકં રૂપમીક્ષ્યતામ્ ॥ ૧૫.૪૯ ॥

સ્થિતિકાલે યથૈકાત્મ્યં શક્યતે જ્ઞાતુમઞ્જસા ।
યથોક્તન્યાયતસ્તદ્વદુત્પત્તાવપિ શક્યતે ॥ ૧૫.૫૦ ॥

ધૂમાર્ચિર્વિસ્ફુલિઙ્ગાદિ વિભાગજનનાત્પુરા ।
અગ્નિરેવ ન ધૂમાદ્યાસ્તથૈકાત્મ્યં જનેઃ પુરા ॥ ૧૫.૫૧॥

સ્વાર્થસાધનયત્નાદીનનપેક્ષ્ય યથા સૃજેત્ ।
ધૂમાદીન્હુતભુક્તદ્વદ્દૃગાદીન્પ્રત્યગીશ્વરઃ ॥ ૧૫.૫૨॥

નાર્થં બુધ્વા વેદસૃષ્ટિઃ કાલિદાસાદિવાક્યવત્ ।
કિન્તુ શ્વાસ ઇવાયત્નાત્સ્યાદતોઽપૌરુષેયતા ॥ ૧૫.૫૩॥

મન્ત્રાશ્ચતુર્વિધા જ્ઞેયા ઋગ્વેદાદિગિરોદિતાઃ ।
બ્રાહ્મણં ચેતિહાસાદિરૂપમષ્ટવિધં ભવેત્ ॥ ૧૫.૫૪॥

પ્રસિદ્ધાશ્ચેતિહાસાદ્યાઃ ઋગ્વેદાદ્યુપબૃંહકાઃ ।
નિખિલાપિ જગત્સૃષ્ટિઃ શબ્દસૃષ્ટ્યોપલક્ષ્યતે ॥ ૧૫.૫૫॥

પ્રજ્ઞાનવ્યતિરેકેણ યથૈવ સ્થિતિસર્ગયોઃ ।
વસ્ત્વન્તરં ન સમ્ભાવ્યં પ્રલયેઽપિ તથોચ્યતે ॥ ૧૫.૫૬॥

સ્વાભાવિકાઽઽત્યન્તિકૌ દ્વૌ પ્રલયૌ જગતસ્તયોઃ ।
સ્વાભાવિકઃ સ્યાત્કલ્પાન્તે બોધાદાત્યન્તિકો મતઃ ॥ ૧૫.૫૭॥

સમુદ્રખિલ્યૌ દૃષ્ટાન્તૌ ક્રમાત્પ્રલયયોર્મતૌ ।
લીયતેઽબ્ધૌ જલં યદ્વત્તથા બ્રહ્મણિ તજ્જગત્ ॥ ૧૫.૫૮॥

સાક્ષાદ્વાઽથ પ્રણાડ્યા વા જલમબ્ધૌ પ્રલીયતે ।
સાક્ષાદ્ગઙ્ગાદિકા નદ્યસ્તત્પ્રણાડ્યા જલાન્તરમ્ ॥ ૧૫.૫૯॥

તથૈવ કારણં વસ્તુ સાક્ષાદ્બ્રહ્મણિ લીયતે ।
કાર્યં તુ કારણદ્વારેત્યેતદત્ર વિવક્ષિતમ્ ॥ ૧૫.૬૦॥

વિષયપ્રલયેનાક્ષપ્રલયસ્યોદિતત્વતઃ ।
લયઃ સર્વસ્ય જગતો બ્રહ્મણીત્યત્ર સુસ્થિતમ્ ॥ ૧૫.૬૧॥

એવં મન્તવ્ય આત્માઽયમ્ અર્થાસમ્ભવનુત્તયે ।
દુન્દુભ્યાદ્યુક્તદૃષ્ટાન્તન્યાયમાર્ગેણ યત્નતઃ ॥ ૧૫.૬૨॥

અપરાયત્તબોધાખ્યનિદિધ્યાસનસિદ્ધયે ।
આત્યન્તિકલયં વક્તું ખિલ્યદૃષ્ટાન્ત ઉચ્યતે ॥ ૧૫.૬૩॥

સામુદ્રમમ્ભો લવણક્ષેત્રે ભાનુવિપાકતઃ ।

લવણોપલતાં પ્રાપ્ય સૈન્ધવઃ ખિલ્ય ઉચ્યતે ॥ ૧૫.૬૪॥

સ ખિલ્ય ઉદધૌ ક્ષિપ્તસ્તાપશાન્તૌ વિલીયતે ।
અશક્યઃ પુનરુદ્ધર્તું ખિલ્યરૂપેણ પૂર્વવત્ ॥ ૧૫.૬૫॥

ખિલ્યોદ્ધૃત્યૈ નીરમબ્ધાવાદદીત યતો યતઃ ।
તત્ર તત્ર રસો લભ્યઃ ખિલ્યસ્ત્વેષ ન કુત્રચિત્ ॥ ૧૫.૬૬॥

સામુદ્રસ્યામ્ભસસ્તાપાત્ખિલ્યતૈવં પરાત્મનઃ ।
આબ્રહ્મસ્તમ્બપર્યન્તં જીવતા સ્યાદવિદ્યયા ॥ ૧૫.૬૭॥

મહદ્ભૂતમનન્તં સ્યાદપારં ચિદ્ઘનં સ્વતઃ ।
દેહેન્દ્રિયાખ્યભૂતેભ્યો જીવત્વેન સમુત્થિતમ્ ॥ ૧૫.૬૮॥

મહત્ત્વં સર્વગત્વં સ્યાદ્ભૂતત્વં નિત્યસિદ્ધતા ।
અનન્તાપારશબ્દાભ્યાં વ્યાપ્તિનિત્યત્વસાધનમ્ ॥ ૧૫.૬૯॥

કાર્યકારણરાહિત્યં યદિ વેહોપલક્ષ્યતામ્ ।
અનન્તત્વમકાર્યત્વમપારત્વમહેતુતા ॥ ૧૫.૭૦॥

વિજ્ઞાનઘન એવેતિ જાત્યન્તરનિષેધનમ્ ।
તદિદં વસ્તુનસ્તત્ત્વં માયિકી સા સમુત્થિતિઃ ॥ ૧૫.૭૧॥

અબ્ધિસ્થાનીયમૈકાત્મ્યં જલસ્થાનં તુ સાક્ષિચિત્ ।
ક્ષેત્રસ્થાનં શરીરાદિ તાપસ્થાનં તુ વિભ્રમઃ ॥ ૧૫.૭૨॥

ખિલ્યસ્થાનં ચિદાભાસયોગાત્કર્તૃત્વભોક્તૃતે ।
દ્રષ્ટા શ્રોતા દ્વિજો ગૌરો ધની ગોમાન્ ભવેત્તતઃ ॥ ૧૫.૭૩॥

પ્રત્યગાત્મૈવ સદ્બ્રહ્મ પરોક્ષમભવત્તદા ।
બ્રહ્મૈવ સન્નયં ચાત્મા સંસારિત્વમવાપ્તવાન્ ॥ ૧૫.૭૪॥

ઇત્યેવં પરવસ્ત્વેવ પઞ્ચભૂતાખ્યમાયયા ।
જીવત્વેન સમુત્થાય સ્વતઃ શાસ્ત્રેણ બુદ્ધ્યતે ॥ ૧૫.૭૫॥

સર્વમાત્મૈવ સમ્યગ્ધીજન્મનૈવાખિલે ભ્રમે ।
નષ્ટે નશ્યતિ જીવત્વં જલે પ્રક્ષિપ્તખિલ્યવત્ ॥ ૧૫.૭૬॥

ક્ષેત્રજ્ઞેશ્વરભેદેન પુનઃ સંજ્ઞા ન વિદ્યતે ।
તદ્ધેતોસ્તમસો ધ્વંસાત્ખિલ્યાનુદ્ધરણં યથા ॥ ૧૫.૭૭॥

દૃષ્ટિમાત્રાત્મયાથાત્મ્યાત્કાર્યકારણવસ્તુનઃ ।
ન જ્ઞાતં કિઞ્ચિદપ્યસ્તિ નાનપાસ્તં તથા તમઃ ॥ ૧૫.૭૮॥

આત્યન્તિકોઽયં પ્રલયઃ પુનર્જન્મવિવર્જનાત્ ।
સ્વાભાવિકલયે શક્તિશેષાદસ્તિ પુનર્જનિઃ ॥ ૧૫.૭૯॥

વિજ્ઞાનૈકઘનસ્યાસ્ય સંજ્ઞા નાસ્તીતિ યદ્વચઃ ।
તદ્વ્યાહતિર્ન શક્યાત્ર તયોર્વિષયભેદતઃ ॥ ૧૫.૮૦॥

વિજ્ઞાનૈકઘનોક્ત્યાઽસ્ય કૃત્સ્નૈકાત્મ્યં પુરોદિતમ્ ।
સંજ્ઞા નાસ્તીતિ ચાવિદ્યાજન્યા બુદ્ધિર્નિષિધ્યતે ॥ ૧૫.૮૧॥

કાર્યકારણતાશેષિ સ્વતઃસિદ્ધમનન્યગમ્ ।
યદ્વસ્તુ તદલં સ્વાત્મસંવિત્ત્યૈ નિરપેક્ષતઃ ॥ ૧૫.૮૨॥

ઐકાત્મ્યં યદ્વિજ્ઞાતં તદ્દ્વૈતમિવ વિભ્રમાત્ ।
સ્યાદ્યત્ર તત્ર પુંસોઽસૌ કર્તૃકર્માદિભેદધીઃ ॥ ૧૫.૮૩॥

નનુ દ્વૈતમિવેત્યેતદુપમાનં કથં તવ ।
ઉપમેયદ્વૈતવસ્તુરાહિત્યાદિતિ ચેચ્છૃણુ ॥ ૧૫.૮૪॥

રામરાવણયોર્યુદ્ધં રામરાવણયોરિવ ।
ઇત્યાદાવુપમા દૃષ્ટા સ્વસ્ય સ્વેન તથેષ્યતામ્ ॥ ૧૫.૮૫॥

યદ્વલ્લોકે ચન્દ્રભેદઃ કલ્પિતત્વેન સમ્મતઃ ।
જગદ્ભેદોપમા સા સ્યાન્મિથ્યાત્વં તેન સિદ્ધ્યતિ ॥ ૧૫.૮૬॥

સમસ્તવ્યસ્તરૂપત્વં યો વક્તીહાત્મનઃ શ્રુતેઃ ।
તત્પક્ષસ્ય નિષેધાય દ્વૈતમિથ્યાત્વવર્ણનમ્ ॥ ૧૫.૮૭॥

જ્ઞાતૃજ્ઞાનજ્ઞેયરૂપં પ્રાપ્ય સ્વપ્ને યથા મૃષા ।
એકો વ્યવહરત્યેવમજ્ઞો વ્યવહરેન્મૃષા ॥ ૧૫.૮૮॥

યસ્યામવિદ્યાવસ્થાયાં ભેદભ્રાન્તિસ્તદા પુમાન્ ।
ઘ્રાતૃઘ્રેયઘ્રાણસંજ્ઞામાપ્નોત્યન્યાં તથા ત્રિધા ॥ ૧૫.૮૯॥

અવિદ્યાયાં વિનષ્ટાયાં ઘ્રાતૃઘ્રાણાદિભેદધીઃ ।
વિનશ્યતીત્યભિપ્રેત્ય સંજ્ઞા નાસ્તીતિ વર્ણિતમ્ ॥ ૧૫.૯૦॥

અભિજ્ઞોઽપ્યજ્ઞવદ્ભેદં ઘ્રાતૃઘ્રાણાદિલક્ષણમ્ ।
વિજાનાતીતિ ચેન્મૈવં વિદ્યાયાં તદસમ્ભવાત્ ॥ ૧૫.૯૧॥

યસ્યાં તુ વિદ્યાવસ્થાયામાત્મૈવાસ્યાભવજ્જગત્ ।
તદા કઃ કેન કિં જિઘ્રેદદ્વૈતે પરવસ્તુનિ ॥ ૧૫.૯૨॥

દૃષ્ટગોચરવત્સર્વં કાર્યકારણવજ્જગત્ ।
ધ્વસ્તાત્માન્ધ્યસ્ય વિદુષઃ સમ્યગ્જ્ઞાનોદયે ભવેત્ ॥ ૧૫.૯૩॥

ગ્રાહકાદિવિભાગોઽત્ર નાસ્તિ તદ્ધેત્વસમ્ભવાત્ ।
ચિન્માત્રસ્ય સ્વતઃ સિદ્ધેર્વિજ્ઞાનઘનતેરિતા ॥ ૧૫.૯૪॥

મુક્તસ્ય વ્યવહારસ્તુ ભ્રાન્તિવાસનયા કૃતઃ ।
ભ્રાન્તિનાશેઽપિ સંસ્કારાનુવૃત્તિર્દૃશ્યતે ખલુ ॥ ૧૫.૯૫॥

વાસનામાત્રસંજ્ઞા તુ દેહે સતિ ન વાર્યતે ।
વસ્તુત્વભ્રાન્તિસંજ્ઞૈવ પ્રબુદ્ધસ્યાત્ર વાર્યતે ॥ ૧૫.૯૬॥

જ્ઞાતૃજ્ઞાનજ્ઞેયરૂપા ન સંજ્ઞા વિષયે યથા ।
પ્રતીચ્યપિ તથા સંજ્ઞા પ્રબુદ્ધસ્ય ન વિદ્યતે ॥ ૧૫.૯૭॥

જ્ઞાનોત્પત્તૌ ન સંજ્ઞાઽસ્તીત્યાસ્તાં તાવદિહાત્મનિ ।
અપિ સત્યામવિદ્યાયાં ન સંજ્ઞાઽસ્ત્યાત્મનીદૃશી ॥ ૧૫.૯૮॥

ગ્રાહકાદિજગત્સર્વં યેન કૂટસ્થસાક્ષિણા ।
લોકઃ સર્વો વિજાનાતિ જાનીયાત્કેન તં વદ ॥ ૧૫.૯૯॥

બોદ્ધૃત્વાલ્લોચનેનાપિ ન સંજ્ઞા પ્રત્યગાત્મનિ ।
ન બોદ્ધા ગૃહ્યતેઽન્યેન વિષયેણ વા ॥ ૧૫.૧૦૦॥

વ્યાવહારિકસંજ્ઞાઽસૌ સંસારિણ્યપિ દુર્લભા ।
કિમુ નિઃશેષવિધ્વસ્તસંસારાર્ણવકારણે ॥ ૧૫.૧૦૧॥

ઇત્યેવમપરાયત્તબોધેનાત્યન્તિકો લયઃ ।
નિદિધ્યાસનરૂપોઽત્ર ફલભૂતઃ પ્રકીર્તિતઃ ॥ ૧૫.૧૦૨॥

યાજ્ઞવલ્ક્યોઽત્ર મૈત્રેયીમન્વગૃહ્ણાદ્યથા તથા ।
મુમુક્ષુમનુગૃહ્ણાતુ વિદ્યાતીર્થમહેશ્વરઃ ॥ ૧૫.૧૦૩॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
બૃહદારણ્યોપનિષદિ મૈત્રેયીવિદ્યાપ્રકાશો નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૧૫॥

## ૧૬. બૃહદારણ્યકે મધુવિદ્યાપ્રકાશો નામ ષોડશોઽધ્યાયઃ ।

પઞ્ચમે બ્રાહ્મણે દધ્યઙ્ઙાથર્વણ ઉવાચ યામ્ ।
અશ્વિનોર્મધુવિદ્યાં તામત્ર સ્પષ્ટીકરોમ્યહમ્ ॥ ૧૬.૧॥

પરસ્પરોપકારિત્વં પૃથિવ્યાઃ પ્રાણિનામપિ ।
યત્તન્મધુત્વં વિજ્ઞેયમુપકારસ્તુ સર્જનમ્ ॥ ૧૬.૨॥

જન્તુભિઃ પૃથિવી સૃષ્ટા સ્વકર્મફલભુક્તયે ।
પૃથિવ્યાઽપ્યાત્મભોગાર્થં સૃષ્ટાઃ સર્વેઽપિ જન્તવઃ ॥ ૧૬.૩॥

પાર્થિવાણિ શરીરાણિ ભુજ્યન્તે જન્તુભિસ્તથા ।
પૃથિવ્યાઽપિ ધરિત્રીત્વં ભુજ્યતે જન્તુધારણાત્ ॥ ૧૬.૪॥

અસ્યાં પૃથિવ્યાં યો ભાસ્વાનામોક્ષમવિનશ્વરઃ ।
લિઙ્ગાત્મા મધ્વસૌ સર્વભૂતાનાં તાનિ તસ્ય ચ ॥ ૧૬.૫॥

અધ્યાત્મં યશ્ચ શારીરો લિઙ્ગાત્મા પાર્થિવાંશજઃ (વાંશગઃ) ।
સ ચાપિ મધુ સર્વેષાં સર્વભૂતાનિ તસ્ય ચ ॥ ૧૬.૬॥

સાધ્યાત્મં સાધિદૈવં ચ સાધિભૂતમિદં જગત્ ।
એકૈકસ્યાત્મનઃ કૃત્સ્નં ભોગ્યત્વેનાઽવતિષ્ઠતે ॥ ૧૬.૭॥

સર્વં સર્વસ્ય કાર્યં સ્યાત્સર્વં સર્વસ્ય ભોજકઃ ।
ઇત્યેષા મધુવિદ્યાત્ર વૈષમ્યાત્ક્લેશહારિણી ॥ ૧૬.૮॥

ભૂતાનિ ભૂમિર્દ્વે લિઙ્ગે ઇત્યુક્તં યચ્ચતુર્વિધમ્ ।
મધ્વવિદ્યાકૃતં તસ્ય વસ્તુતત્ત્વમથોચ્યતે ॥ ૧૬.૯॥

અયમેવ સ ઇત્યત્ર મધુરૂપશ્ચતુર્વિધઃ ।
પ્રપઞ્ચોઽયમિતિ પ્રોક્તઃ સ ઇત્યાત્મોચ્યતે પરઃ ॥ ૧૬.૧૦॥

અયમેવ સ ઇત્યુક્ત્યા સામાનાધિકરણ્યતઃ ।
પ્રત્યઙ્માત્રૈકયાથાત્મ્યં પ્રપઞ્ચસ્યાવબોધ્યતે ॥ ૧૬.૧૧॥

સ ઇત્યનેન નિર્દિષ્ટમતીતગ્રન્થવર્ણિતઃ ।
યોઽયમિત્યાદિભિર્વાક્યૈશ્ચતુર્ભિઃ સ્માર્યતે પરઃ ॥ ૧૬.૧૨॥

આત્મા દ્રષ્ટવ્ય ઇત્યુક્તમમૃતં ચેતિ વર્ણનમ્ (વર્ણિતમ્) ।
નેતિ નેત્યુદિતં બ્રહ્મ તત્સર્વમભવત્ત્વિતિ ॥ ૧૬.૧૩॥

આત્માઽમૃતબ્રહ્મસર્વશબ્દૈઃ પ્રાક્ પ્રતિપાદિતમ્ ।
વસ્ત્વસ્ય મધુનસ્તત્ત્વમિતિ વાક્યાર્થ ઈરિતઃ ॥ ૧૬.૧૪॥

ઉત્તરેષ્વપિ વાક્યેષુ મધુરૂપમિદં જગત્ ।
બ્રહ્માપિ મધુનસ્તત્ત્વં યોજયેદુક્તવર્ત્મના ॥ ૧૬.૧૫॥

સાધારણવિશેષાભ્યાં ધર્મો ભોગપ્રદો દ્વિધા ।
અધિદૈવં તથાધ્યાત્મમિત્યત્રાસૌ વિભજ્યતે ॥ ૧૬.૧૬॥

સત્યમાનુષયોરેવં વિભાગં યોજયેદ્દ્વિધા ।
પૃથિવ્યાદ્યા માનુષાન્તા વિરાડંશા ઉદીરિતાઃ ॥ ૧૬.૧૭॥

અયમાત્મેતિ નિર્દેશો વિરાજોઽભિમતોંઽશિનઃ ।
હિરણ્યગર્ભસ્તત્રત્યઃ પ્રોક્તસ્તેજોમયોક્તિતઃ ॥ ૧૬.૧૮॥

વિરાડ્ હિરણ્યગર્ભાખ્યસ્થૂલસૂક્ષ્મશરીરગઃ ।
ચિદાભાસોઽત્ર યશ્ચાયમાત્મેત્યુક્ત્યાભિધીયતે ॥ ૧૬.૧૯॥

અપૂર્વાનપરામધ્યપ્રત્યગ્યાથાત્મ્યવિત્તયે ।
સ વા ઇત્યાદિકો ગ્રન્થઃ સદૃષ્ટાન્તોઽભિધીયતે ॥ ૧૬.૨૦॥

નનૂક્તં મધુનસ્તત્ત્વમયમેવ સ ઇત્યતઃ ।
વચનાદ્બહુપર્યાયૈર્ભૂયોઽપ્યેતદ્દૃઢીકૃતમ્ ॥ ૧૬.૨૧॥

બાઢમેતાવતા વસ્તુસાર્વાત્મ્યં સ્યાત્પ્રપઞ્ચિતમ્ ।
તદેવાઽભિવ્યજ્યતેઽથ વિદુષઃ ફલરૂપતઃ ॥ ૧૬.૨૨॥

સ એવ મધુતત્ત્વાખ્ય આત્માઽયં તત્ત્વવિન્મતઃ ।
આધિપત્યં ચ રાજત્વં વિદુષ્યવિદુષોઽધિકમ્ ॥ ૧૬.૨૩॥

અત્રાઽધિપત્યશબ્દેન સ્વાતન્ત્ર્યમભિધીયતે ।
સ્વાર્થઃ પ્રત્યક્તદર્થત્વાત્સહેતોર્જગદાત્મનઃ ॥ ૧૬.૨૪॥

રાજત્વં રાજનાદ્ભાસ્વદવિલુપ્તાત્મદર્શનાત્ ।
બ્રહ્માસ્મીતિ પરિજ્ઞાનધ્વસ્તધ્વાન્તત્વકારણાત્ ॥ ૧૬.૨૫॥

યોઽસાવવિદ્યયા દેહી સંસારીવાપ્યભૂત્પુરા ।
સ એવ વિદ્યયા બ્રહ્મેત્યતોઽસ્મિઞ્જગદર્પિતમ્ ॥ ૧૬.૨૬॥

ચક્રસ્યારા યથા સર્વે નાભિનેમ્યોઃ સમર્પિતાઃ ।
સજીવા નિખિલા દેહા બ્રહ્મવિદ્યર્પિતાસ્તથા ॥ ૧૬.૨૭॥

સમાપ્તા બ્રહ્મવિદ્યેયં કૈવલ્યાવાપ્તયેઽખિલા ।
યથોક્તબ્રહ્મવિદ્યાયાઃ સ્તુત્યર્થાખ્યાયિકોચ્યતે ॥ ૧૬.૨૮॥

દધ્યઙ્ઙાથર્વણોઽશ્વિભ્યામુવાચ દ્વિવિધં મધુ ।
પ્રવર્ગ્યાઙ્ગરવિધ્યાનં બ્રહ્મજ્ઞાનમિતિ દ્વયમ્ ॥ ૧૬.૨૯॥

તં વૃત્તાન્તમૃષિઃ પશ્યન્ પ્રાબ્રવદશ્વિનૌ પ્રતિ ।
વૃત્તાન્તમબ્રવીદૃગ્ભ્યામૃગ્ભ્યાં ચ બ્રહ્મવેદનમ્ ॥ ૧૬.૩૦॥

અશ્વિનોર્યુવયોરુગ્રં લાભાય ગુરુમારણમ્ ।
આવિષ્કરોમિ લોકેઽસ્મિન્મેઘો વૃષ્ટિં યથા તથા ॥ ૧૬.૩૧॥

દધ્યઙ્ઙાથર્વણોઽશ્વસ્ય શિરસા યુવયોર્મધુ ।
યત્પ્રોવાચ તદપ્યત્ર જાનન્નાવિષ્કરોમ્યહમ્ ॥ ૧૬.૩૨॥

છિત્વા ગુરોઃ શિરોઽન્યત્ર નિક્ષિપ્યાઽશ્વસ્ય યચ્છિરઃ ।
તદાહૃત્ય ગુરો સ્કન્ધે પ્રતિષ્ઠાપયતો યુવામ્ ॥ ૧૬.૩૩॥

સત્યપ્રતિજ્ઞઃ સ ગુરુઃ સોઢ્વાપ્યેતાદૃશીં વ્યથામ્ ।
મધુદ્વયમુવાચેતિ કથિતોઽર્થ ઋચોર્દ્વયોઃ ॥ ૧૬.૩૪॥

ઈશો મનુષ્યપશ્વાદિદેહાંશ્ચક્રે પુરા તતઃ ।
સ પક્ષી લિઙ્ગરૂપેણ ભૂત્વા તાન્ પ્રાવિશત્પ્રભુઃ ॥ ૧૬.૩૫॥

યોઽયં પુરુષશબ્દોઽસ્મિન્મન્ત્રે તસ્ય નિરુક્તિતઃ ।
જીવબ્રહ્મૈક્યતાત્પર્યં મન્ત્રસ્યાસ્યોપવર્ણ્યતે ॥ ૧૬.૩૬॥

પુરિ શેતે યતસ્તસ્માત્પુરુષો જીવ ઉચ્યતે ।
સર્વં પૂરયતીત્યેવં પુરુષો બ્રહ્મ ભણ્યતે ॥ ૧૬.૩૭॥

અનેન બ્રહ્મણા કિઞ્ચિદ્બહિર્નાઽનાવૃતં ક્વચિત્ ।
નાસ્ત્યસંવૃતમન્તશ્ચ પૂરણાત્પુરુષસ્તથા ॥ ૧૬.૩૮॥

રૂપં રૂપં પ્રવિષ્ટોઽયં પ્રતિબિમ્બો ભવત્યયમ્ ।
તદસ્ય પ્રતિબિમ્બત્વં પ્રત્યગ્યાથાત્મ્યવિત્તયે ॥ ૧૬.૩૯॥

ચૈતન્યાત્માદયઃ શબ્દાઃ વ્યુત્પન્નાઃ પ્રતિબિમ્બકે ।
લક્ષયન્તિ ચિદાત્માનં તેન યાથાત્મ્યવેદનમ્ ॥ ૧૬.૪૦॥

મિથ્યાઽભિમાનૈઃ સાભાસબુધ્યાદિપરિકલ્પિતૈઃ ।

દ્રષ્ટા શ્રોતાઽહમિત્યાદિબહુરૂપો વિચેષ્ટતે ॥ ૧૬.૪૧॥

સન્ત્યસ્ય હરયોઽક્ષાખ્યા હરણાદ્વિષયાન્ પ્રતિ ।
પ્રાણિભેદાદનન્તાસ્તે તૈસ્તુ સંસરતીશ્વરઃ ॥ ૧૬.૪૨॥

મન્ત્રોક્તા હરયોઽપ્યસ્તાઃ તત્સઙ્ખ્યા ચ પ્રકલ્પિતા ।
એતેષાં તત્ત્વમાત્મૈવેત્યાહ બ્રાહ્મણમાદરાત્ ॥ ૧૬.૪૩॥

નિઃશેષમધુકાણ્ડસ્ય તદેતદિતિ વાક્યતઃ ।
સારઃ સઙ્ક્ષિપ્યતે સાક્ષાત્કરવિન્યસ્તબિલ્વવત્ ॥ ૧૬.૪૪॥

અજ્ઞાતં સંશયજ્ઞાતં મિથ્યાજ્ઞાતમિદં જગત્ ।
તદેતદિત્યનૂદ્યાસ્ય તત્ત્વં બ્રહ્મેતિ બોધ્યતે ॥ ૧૬.૪૫॥

નિષ્કારણં તન્નિષ્કાર્યં નિશ્છિદ્રં બાહ્યવર્જિતમ્ ।
પરોક્ષપ્રતિષેધાર્થમાત્મા બ્રહ્મેતિ ભણ્યતે ॥ ૧૬.૪૬॥

સર્વાનુભવ એવાયં યતઃ સર્વાનુભૂસ્તતઃ ।
કાર્ત્સ્ન્યાત્સર્વો ભવેદેષ ચિન્માત્રત્વાત્તથાઽનુભૂઃ ॥ ૧૬.૪૭॥

કર્તવ્યમેતદ્વિજ્ઞાનમિતિ વેદાનુશાસનમ્ ।
અસ્યાઽતિલઙ્ઘને દોષઃ સંસારાનર્થસઙ્ગતિઃ ॥ ૧૬.૪૮॥

કુર્વતસ્તુ મહાન્ લાભઃ સ્વાત્મનઃ કૃતકૃત્યતા ।
મધુકાણ્ડાર્થસર્વસ્વમિત્થં શ્રુત્યોપસંહૃતમ્ ॥ ૧૬.૪૯॥

વિદ્યાવંશજપાદ્વિદ્યાવિઘ્નઃ સર્વો નિવાર્યતે ।
મુમુક્ષુમનુગૃહ્ણાતુ વિદ્યાતીર્થમહેશ્વરઃ ॥ ૧૬.૫૦॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
બૃહદારણ્યકે મધુવિદ્યાપ્રકાશો નામ ષોડશોઽધ્યાયઃ ॥ ૧૬॥

## ૧૭. આશ્વલાયનાદિમુનિબોધાખ્યો નામ સપ્તદશોઽધ્યાયઃ ।

યાજ્ઞવલ્ક્યોઽશ્વલાદિભ્યો વિજિગીષુકથામુખાત્ ।
ઉક્તવાન્ પઞ્ચમેઽધ્યાયે તત્ત્વવિદ્યામનેકધા ॥ ૧૭.૧॥

અધ્યાત્મમધિભૂતં ચ યજમાનર્ત્વિગાદિષુ ।
સ્વાભાવિકઃ પરિચ્છેદો મૃત્યુર્મર્ત્યફલાર્જનાત્ ॥ ૧૭.૨॥

કાલોઽપિ મૃત્યુઃ કર્ત્રાદિ મારણાત્સ્યાત્સ ચ દ્વિધા ।
સૌરોઽહોરાત્રરૂપેણ ચાન્દ્રઃ પક્ષાદિરૂપતઃ ॥ ૧૭.૩॥

જેતું મૃત્યુત્રયં બ્રહ્મલોકં પ્રામું ચ સાધનમ્ ।
પ્રશ્નૈશ્ચતુર્ભિઃ પપ્રચ્છ દેવધ્યાનં તદુત્તરમ્ ॥ ૧૭.૪॥

યજમાનસ્ય વાગાદેર્હોત્રાદેશ્ચાધિદૈવિકે ।
અગ્ન્યાદાવેકતાં ધ્યાત્વા મુચ્યતે ચાતિમુચ્યતે ॥ ૧૭.૫॥

મુક્તિસ્ત્યક્ત્વાસુરં ભાવં દેવભાવસ્ય ચિન્તનમ્ ।
બ્રહ્મલોકોઽતિમુક્તિઃ સ્યાન્ન કૈવલ્યમુપાસનાત્ ॥ ૧૭.૬॥

અથ સમ્પદ ઉચ્યન્તે સ્વલ્પે કર્મણિ કર્મણઃ ।
મહતશ્ચિન્તનં સમ્પત્તયા પ્રાપ્યં મહત્ફલમ્ ॥ ૧૭.૭॥

હોતૃપ્રયુક્તઋગ્જાતિત્રયે સમ્પાદયન્નમૂન્ ।
લોકાન્ત્રૈલોક્યમાપ્નોતિ સમત્વાત્ત્રિત્વસઙ્ખ્યયા ॥ ૧૭.૮॥

સમિન્માંસાજ્યમુખ્યાનામુજ્જ્વલત્વાદિસામ્યતઃ ।
દેવલોકાદિસમ્પત્ત્યા દેવલોકાદિમાપ્નુયાદ્ ॥ ૧૭.૯॥

બ્રહ્મણો મનસો વૃત્તિષ્વનન્તાસ્વન્તવર્જિતાન્ ।
વિશ્વાન્ સમ્પાદયન્દેવાનનન્તં લોકમાપ્નુયાત્ ॥ ૧૭.૧૦॥

ઉક્તાસ્વૃગ્જાતિષૂદ્ગાત્રા ગીયમાનાસુ સમ્પદા ।
લોકત્રયસ્ય પ્રાણાદેરપિ લોકત્રયં વ્રજેત્ ॥ ૧૭.૧૧॥

ગયા ભૂર્બ્રાહ્મણો વિષ્ણુરન્નં બ્રહ્મેતિ સમ્પદા ।
શ્રાદ્ધે ફલસ્ય બાહુલ્યં મત્વા સમ્પાદયન્તિ હિ ॥ ૧૭.૧૨॥

બન્ધાખ્યમૃત્યુસ્તન્મૃત્યુર્વિદુષોઽનુક્રમસ્તથા ।
પ્રયોજકસ્તયોર્મૃત્વ્યોઃ પ્રેરકં ચાત્ર પૃચ્છ્યતે ॥ ૧૭.૧૩॥

અધિભૂતાધિયજ્ઞાદિપરિચ્છેદઃ ફલાત્મકઃ ।
મોહાસઙ્ગાત્મકો મૃત્યુર્ગ્રહાતિગ્રહબન્ધવાન્ ॥ ૧૭.૧૪॥

ગ્રહા ઘ્રાણાદયો જ્ઞેયા ગૃહ્ણન્તિ વિષયાન્યતઃ ।
ઘ્રાણાદિપ્રેરકત્વેન ગન્ધાદ્યાઃ સ્યુરતિગ્રહાઃ ॥ ૧૭.૧૫॥

પૂર્વબ્રાહ્મણસમ્પ્રોક્તધ્યાનસંયુક્તકર્મભિઃ ।
પરિચ્છેદવિનાશેઽપિ મૃત્યોઃ સર્વસ્ય ન ક્ષયઃ ॥ ૧૭.૧૬॥

હિરણ્યગર્ભરૂપેઽપિ શ્રૂયન્તે હિ ક્ષુધાદયઃ ।
અતો મૃત્યોરશેષસ્ય મૃત્યુરન્યોઽત્ર પૃચ્છ્યતે ॥ ૧૭.૧૭॥

નિર્ણેયૌ મૃત્યુતન્મૃત્યૂ બન્ધમોક્ષાવબુદ્ધયે ।
દુર્વચૌ ચ ગ્રહાદીનાં લોકેઽત્યન્તાપ્રસિદ્ધિતઃ ॥ ૧૭.૧૮॥

ગ્રહાતિગ્રહવદ્બન્ધો દેહેઽપ્યેષ તથાપ્યસૌ ।
જન્માન્તરેષ્વસઞ્ચારાન્નાપ્રસિદ્ધો ન દુર્વચઃ ॥ ૧૭.૧૯॥

એકમેવ મનઃ સર્વજન્મગામીતિ તાર્કિકાઃ ।
અક્ષાન્તરાણ્યપીત્યન્યે તેન સઙ્ખ્યાઽત્ર દુર્વચા ॥ ૧૭.૨૦॥

મનોન્યાયઃ સમોઽન્યેષુ તેનાદોષવિવક્ષયા ।
પર્યગ્રહીદષ્ટસઙ્ખ્યામન્યાન્તર્ભાવ ઊહ્યતામ્ ॥ ૧૭.૨૧॥

યસ્યેન્દ્રિયસ્ય યોઽર્થોઽસ્મિન્ જન્મન્યન્યત્ર તત્તથા ।
ઉતાન્યથેતિ સન્દેહાત્સઙ્ખ્યેયં પૃચ્છ્યતે પુનઃ ॥ ૧૭.૨૨॥

દૃષ્ટાનુસાર્યદૃષ્ટં તુ કલ્પનીયમિતીદૃશાત્ ।
ન્યાયાત્પ્રાહ યથા દૃષ્ટમિન્દ્રિયાર્થવ્યવસ્થિતિમ્ ॥ ૧૭.૨૩॥

બન્ધત્વં વિશદીકર્તું ગ્રહાતિગ્રહકલ્પનમ્ ।
મોચનીયો ગ્રહગ્રસ્તસ્તથૈવાક્ષાર્થબન્ધનાત્ ॥ ૧૭.૨૪॥

ગ્રસ્તં હિરણ્યગર્ભાન્તં મૃત્યુના સકલં જગત્ ।
ગ્રહાતિગ્રહરૂપેણ મૃત્યુસ્તસ્યાસ્તિ વા ન વા ॥ ૧૭.૨૫॥

અસ્તિ ચેદનવસ્થા સ્યાદનિર્મોક્ષોઽન્યથા ભવેત્ ।
ઇત્યસૌ દુર્વચઃ પ્રશ્નો દૃષ્ટાન્તેનાપનુદ્યતે ॥ ૧૭.૨૬॥

વહ્નેઃ સર્વાશિનો મૃત્યોર્યથા મૃત્યુર્જલં મહત્ ।
બદ્ધમૃત્યોસ્તથા મૃત્યુરજ્ઞાનં બન્ધહૃલ્લયે ॥ ૧૭.૨૭॥

અજ્ઞાનમૃત્યોર્વિજ્ઞાનં મૃત્યુસ્તસ્યાપિ તત્તથા ।
તત્કાતકરજોન્યાયાન્નાનવસ્થામિહાનયેત્ ॥ ૧૭.૨૮॥

પ્રાક્તનાન્યપિ જન્માનિ સમ્યગ્જ્ઞાનમપહ્નુતે ।
અપહ્નુતે સ્વમિત્યસ્મિન્નર્થે નૈષા ચમત્કૃતિઃ ॥ ૧૭.૨૯॥

અથ તત્ત્વવિદઃ પ્રાણા ઉત્ક્રામન્ત્યથવા ન હિ ।

સ્યાત્પુનર્જનિરુત્ક્રાન્તાવનુત્ક્રાન્તૌ મૃતિઃ કથમ્ ॥ ૧૭.૩૦॥

નોત્ક્રામન્તિ ન તિષ્ઠન્તિ કિન્તુ નિર્વાતદીપવત્ ।
ન કારણં શિષ્યતેઽત્ર તસ્ય જ્ઞાનેન નિહ્નુતેઃ ॥ ૧૭.૩૧॥

અનારબ્ધફલં કર્મ તદુત્ક્રાન્તેઃ પ્રયોજકમ્ ।
સ્થિતેર્નિમિત્તમારબ્ધં તે નષ્ટે જ્ઞાનભોગતઃ ॥ ૧૭.૩૨॥

ઉપાદાનનિમિત્તાભ્યાં હીનાનામુત્ક્રમઃ કથમ્ ।
કથં વાત્ર સ્થિતિસ્તસ્માદ્યુક્ત આત્યન્તિકો લયઃ ॥ ૧૭.૩૩॥

પ્રાણત્યાગેન દેહોઽયં મ્રિયતે બાહ્યવાયુના ।
આપૂર્ણઃ સ્થૌલ્યમાપન્નો નિશ્ચેષ્ટો દૃશ્યતે યતઃ ॥ ૧૭.૩૪॥

પ્રાણા એવ વિલીયન્તે કિં વા સર્વં પ્રયોજકમ્ ।
આદ્યે પ્રાણજનિર્ભૂયો દ્વિતીયે નામ તત્કથમ્ ॥ ૧૭.૩૫॥

અપ્રયોજકનામૈવ શિષ્યતે ન પ્રયોજકમ્ ।
અવિદ્યાકામકર્માદિ નોક્તદોષદ્વયં તતઃ ॥ ૧૭.૩૬॥

પરવાચાભિનિષ્પત્તેર્વિદુષો બન્ધનં પ્રતિ ।
નામાપ્રયોજકં યુક્તસ્તચ્છેષઃ પરદેહવત્ ॥ ૧૭.૩૭॥

મુક્તાવપ્યવશિષ્ટત્વાન્નામ્નોઽનન્તત્વસામ્યતઃ ।
વિશ્વાન્ સમ્પાદયન્દેવાનનન્તં લોકમશ્નુતે ॥ ૧૭.૩૮॥

ગ્રહાતિગ્રહબન્ધાખ્યમૃત્યોર્યત્સ્યાત્પ્રયોજકમ્ ।
કાલકર્મેશ્વરાદીનાં મધ્યે તત્કિમિતીર્યતે ॥ ૧૭.૩૯॥

અવિદ્વદ્વિષયઃ પ્રશ્નો વિદુષો બન્ધસઙ્ક્ષયાત્ ।
આતત્ત્વબોધમજ્ઞાની બધ્યતેઽનન્તજન્મભિઃ ॥ ૧૭.૪૦॥

અનુગૃહ્ણન્તિ વાગાદીન્ સ્વાંશૈરગ્ન્યાદિદેવતાઃ ।
ભોગક્ષયે મૃતૌ સ્વાંશાન્ સંહરન્તિ યથાયથમ્ ॥ ૧૭.૪૧॥

પુંસો દેહગ્રહે ભૂયો દેહસ્થાનેષુ દેવતાઃ ।
અંશં નિદધતિ સ્વં સ્વં ન દેહગ્રહણાત્પુરા ॥ ૧૭.૪૨॥

અધિષ્ઠાતૃવિયોગેન ન્યસ્તદાત્રોપમૈર્યુતઃ ।
વાગાદિભિરસૌ કિંસ્વિત્પ્રયોજકમુપાશ્રયેત્ ॥ ૧૭.૪૩॥

કિં કારણાત્મતામેતિ કિં વા કેનચિદાત્મના ।
અવતિષ્ઠત એવાયં કિં વા કર્મૈવ સંશ્રિતઃ ॥ ૧૭.૪૪॥

ગુણાન્વા યદિ વેશાનં કાલં વા દૈવમેવ વા ।
યદૃચ્છાં સન્તતિં શૂન્યં વિનાશં વેતિ ભણ્યતામ્ ॥ ૧૭.૪૫॥

પ્રશ્નેન તુષ્ટઃ સન્ત્યજ્ય વિજિગીષાં સહામુના ।
નિર્ગતૌ વિજિગીષુભ્યો મિથો નિર્ણયમૂચતુઃ ॥ ૧૭.૪૬॥

સંસારભૂમિવર્તિત્વાન્નૈવાયં કારણાશ્રયઃ ।
કર્માદિપરતન્ત્રત્વાત્સ્વાશ્રયોઽયં ન ચેષ્યતે ॥ ૧૭.૪૭॥

જડત્વાદ્ગુણકાલાદિર્ન જીવં નેતુમર્હતિ ।
હઠો યદૃચ્છાશૂન્યં તુ માનહીનં તથેતરત્ ॥ ૧૭.૪૮॥

જીવેશ્વરૌ સ્વતન્ત્રૌ ચેદ્વિધિશાસ્ત્રમનર્થકમ્ ।
અતોઽસાધારણો જન્મહેતુઃ કર્મૈવ શિષ્યતે ॥ ૧૭.૪૯॥

સતિ કર્મણિ વૈચિત્ર્યં દેહાનામુપપદ્યતે ।
દેવેશાનુગૃહીતત્વાજ્જાડ્યદોષો ન કર્મણઃ ॥ ૧૭.૫૦॥

તૃતીયબ્રાહ્મણે પુણ્યફલાવધિરુદીર્યતે ।
અશ્વમેધઃ પરં પુણ્યં બ્રહ્મલોકફલાવધિઃ ॥ ૧૭.૫૧॥

પ્રત્યક્ષઃ સ્થાવરત્વાખ્યઃ સ્પષ્ટઃ પાપફલાવધિઃ ।
વિજ્ઞાયતે દ્વયજ્ઞાનાદિયત્તા હેયસંસૃતેઃ ॥ ૧૭.૫૨॥

અશ્વમેધાદિ યત્પુણ્યં મહોપાસનયા યુતમ્ ।
તત્ફલં સંસૃતિસ્તસ્ય ભુજ્યુના પૃચ્છ્યતેઽવધિઃ ॥ ૧૭.૫૩॥

બ્રહ્માણ્ડાદ્બહિરન્તશ્ચ સમષ્ટિવ્યષ્ટિરૂપિણઃ ।
વ્યાપ્તિર્હિરણ્યગર્ભસ્ય સંસારસ્યાવધિર્મતઃ ॥ ૧૭.૫૪॥

આગમૈકાધિગમ્યોઽયમર્થ ઇત્યુપદર્શયન્ ।
ગન્ધર્વાખ્યાયિકામાહ ગન્ધર્વગુરુસ્તતઃ ॥ ૧૭.૫૫॥

લોકાંસ્તાનપિ ગન્ધર્વાદશ્વમેધકૃતાં ફલમ્ ।
શ્રુત્વા પારિક્ષિતોક્ત્યાત્ર વાદિનં તં વ્યમોહયત્ ॥ ૧૭.૫૬॥

અશ્વમેધકૃતો વક્તિ ભુજ્યુઃ પારિક્ષિતા ઇતિ ।
પરિતઃ ક્ષિતિમાવેષ્ટ્ય સ્થિતા ઇતિ વિવક્ષયા ॥ ૧૭.૫૭॥

દ્વિર્યાજ્ઞવલ્ક્યમુદ્દિશ્ય પ્રશ્નોક્તિસ્ત્રાસજન્મને ।
અત્રસ્તોઽતીન્દ્રિયજ્ઞાનં દર્શયન્નિદમુક્તવાન્ ॥ ૧૭.૫૮॥

ગન્ધર્વેણ ગતિઃ પ્રોક્તા અશ્વમેધકૃતામ્ ઇતિ ।
ભૂયઃ પૃષ્ટઃ સ્વયં વક્તું પ્રાહ લોકસ્ય વિસ્તૃતિમ્ ॥ ૧૭.૫૯॥

આદિત્યરથગત્યાધ્વમિતો યાવાનહર્નિશમ્ ।
દ્વાત્રિંશદ્ગુણિતસ્તાવાન્વ્યાપ્તો ભાનુગભસ્તિભિઃ ॥ ૧૭.૬૦॥

ઇયાનેવ પ્રાણિભોગસિદ્ધ્યૈ લોક ઇષ્યતે ।
ઇતઃ પરસ્તાદ્દ્વિગુણા પૃથિવ્યાલોકવર્જિતા ॥ ૧૭.૬૧॥

અન્તરાલોકયુક્તઃ સન્ બહિરાલોકવર્જિતઃ ।
લોકાલોકગિરિર્મધ્યે પૃથિવ્યોરનયોઃ સ્થિતઃ ॥ ૧૭.૬૨॥

સમુદ્રો દ્વિગુણો ભૂમેર્ઘનોદાખ્યો બહિઃ સ્થિતઃ ।
અણ્ડાદ્બહિર્ઘનોદોઽયમિતિ પૌરાણિકા જગુઃ ॥ ૧૭.૬૩॥

પુરાણં બાધ્યતે શ્રુત્યા ધ્યાનાર્થા વા શ્રુતિર્મતા ।
સર્વથાપ્યણ્ડરૂપોઽયં વૈરાજો દેહ ઇષ્યતામ્ ॥ ૧૭.૬૪॥

યોઽણ્ડાદ્બહિઃ સ્થિતો વાયુઃ સૂત્રાત્મેતિ શ્રુતીરિતઃ ।
એષોઽશ્વમેધકૃત્પુણ્યપરિપાકો ન ચાપરઃ ॥ ૧૭.૬૫॥

ક્ષુરધારાદ્યુપમિતઃ સન્ધિર્યોઽણ્ડકપાલયોઃ ।
તેન બાહ્યે નયત્યેતાનશ્વમેધસ્ય દેવતા ॥ ૧૭.૬૬॥

તે વાયુભાવમાપન્નાઃ સમષ્ટિવ્યષ્ટિરૂપતઃ ।
અણ્ડાદ્બહિસ્તદન્તશ્ચ તિષ્ઠન્ત્યખિલરૂપિણઃ ॥ ૧૭.૬૭॥

અધ્યાત્માદિવિભાગેન વ્યાપ્તિર્વ્યષ્ટિરિતીરિતા ।
સમસ્તત્વેન સંવ્યાપ્તિઃ સમષ્ટિરિતિ કીર્તિતા ॥ ૧૭.૬૮॥

સમષ્ટિવ્યષ્ટિરૂપં ય ઉપાસ્તેઽસૌ સકૃન્મૃતઃ ।
હિરણ્યગર્ભો ભૂત્વાથ મુચ્યતે મ્રિયતે ન તુ ॥ ૧૭.૬૯॥

સંસારોત્કર્ષસીમેત્થં વર્ણિતા જ્ઞાનકર્મજા ।
ઇતો વિરક્તમાલક્ષ્ય વર્ણ્યતે સ્વાત્મનિર્ણયઃ ॥ ૧૭.૭૦॥

ચતુર્થબ્રાહ્મણે મોક્ષયોગ્યઃ કર્તૃત્વવર્જિતઃ ।

વિષયો બ્રહ્મવિદ્યાયાઃ અસ્ત્યાત્મેતિ નિરૂપ્યતે ॥ ૧૭.૭૧॥

અહન્ધીકર્મશાસ્ત્રાભ્યાં દૃષ્ટેર્દ્રષ્ટા ન સિધ્યતિ ।
કિન્તુ દૃષ્ટ્યાદિસંયુક્તો બ્રહ્મતાઽસ્ય વિરુધ્યતે ॥ ૧૭.૭૨॥

અતો બ્રહ્મત્વયોગ્યસ્ય પ્રતીચોઽત્ર બુભુત્સયા ।
અનૂદ્ય બ્રહ્મતામાદૌ તદર્હં પરિપૃચ્છતિ ॥ ૧૭.૭૩॥

યત્સાક્ષાદપરોક્ષં સ્યાદ્બ્રહ્મ તદ્રૂપતામયમ્ ।
અર્હેત્સર્વાન્તરસ્તાદૃગ્ય આત્મા બ્રૂહિ તં મુને ॥ ૧૭.૭૪॥

સાક્ષાદિતિ પદેનાત્ર વ્યવધાનં નિવાર્યતે ।
સ્વર્ગલોકાદિવદ્બ્રહ્મ નાતો દેશાન્તરાદિગમ્ ॥ ૧૭.૭૫॥

અગૌણતાપરોક્ષોક્ત્યા બ્રહ્મત્વસ્ય વિવક્ષિતા ।
નામાદેરિવ નો ગૌણં બ્રહ્મત્વં પ્રત્યગાત્મનઃ ॥ ૧૭.૭૬॥

આવિર્ભાવોઽપરોક્ષત્વં તચ્ચાસ્ત્યવ્યવધાનતઃ ।
સ્વપ્રકાશં સ્વભાવત્વાદિતિ વાર્થઃ પદદ્વયે ॥ ૧૭.૭૭॥

અવ્યાવૃત્તાનનુગતં વસ્તુ બ્રહ્મ ગિરોચ્યતે ।
અકારણમકાર્યં તદિત્યનેનોદિતં ભવેત્ ॥ ૧૭.૭૮॥

અમુમર્થમિદં પ્રાપ્તં ન ચેદાત્મૈવ તદ્ભવેત્ ।
યતોઽત આત્મરૂપાર્થં ય આત્મેતિ વિશેષ્યતે ॥ ૧૭.૭૯॥

સજાતીયવિજાતીયદ્વિતીયાર્થનિવૃત્તયે ।
સર્વાન્તર ઇતિ પ્રાહ સાર્વાત્મ્યં તેન સિધ્યતિ ॥ ૧૭.૮૦॥

સાર્વાત્મ્યં બ્રહ્મણો યોગ્યં તચ્ચ જીવાત્મનીરિતમ્ ।
મુખ્યાપરોક્ષ્યં જીવસ્ય યોગ્યં બ્રહ્મણિ વર્ણિતમ્ ॥ ૧૭.૮૧॥

અભેદો વાસ્તવો જીવબ્રહ્મણોર્વ્યત્યયાદતઃ ।
વિવક્ષિતસ્તત્પ્રસઙ્ગાદ્વાદિવ્યામોહ આર્થિકઃ ॥ ૧૭.૮૨॥

આત્મનો બ્રહ્મતા મુખ્યા બ્રહ્મણોઽપ્યાત્મતા તથા ।
પ્રત્યગ્દૃષ્ટ્યા પરાગ્દૃષ્ટ્યા મિથો બ્રહ્માત્મનોર્ભિદા ॥ ૧૭.૮૩॥

બ્રહ્મત્વમાત્મનો રૂપં તમસા તત્તિરોહિતમ્ ।
આત્મત્વં બ્રહ્માણોઽપ્યેવં તતો જીવેશભેદધીઃ ॥ ૧૭.૮૪॥

તમસો બોધવિધ્વંસાદબ્રહ્માનાત્મતાહતેઃ ।
પ્રત્યઙ્માત્રાવશેષત્વાત્સ્યામપૂર્વાદિમાનહમ્ ॥ ૧૭.૮૫॥

અમૂઢો યાજ્ઞવલ્ક્યોઽત્ર પ્રત્યગ્દૃષ્ટ્યા પરામૃશન્ ।
પ્રત્યાહૈષ ત આત્મેતિ તં સર્વાન્તરમદ્વયમ્ ॥ ૧૭.૮૬॥

મુખ્યોઽપરોક્ષો યઃ પ્રત્યક્ સ્વપ્રકાશો વિભાસતે ।
એતચ્છબ્દેન તં પ્રાહ વિસ્પષ્ટત્વવિવક્ષયા ॥ ૧૭.૮૭॥

અન્તર્મુખસ્ય વિસ્પષ્ટો નાયં સન્દેહગોચરઃ ।
ઇત્યભિપ્રેત્ય તત્પ્રશ્ને બહુમાનં તુ નાકરોત્ ॥ ૧૭.૮૮॥

ષષ્ઠ્યન્તસ્ય ત ઇત્યસ્ય યુષ્મદ્બુદ્ધ્યુપલક્ષિતમ્ ।
દેહાદિસર્વમાવ્યોમ્નો દૃશ્યમર્થો વિવક્ષિતઃ ॥ ૧૭.૮૯॥

આત્મેત્યવ્યભિચારેણ સ્વરૂપં યત્તદુચ્યતે ।
પ્રમાત્રાદ્યાગમાપાયસાક્ષિત્વાત્તત્સ્વરૂપતા ॥ ૧૭.૯૦॥

યદ્યસ્મિન્ વ્યભિચાર્યેત તત્સ્વરૂપં ન કુત્રચિત્ ।
કુણ્ડલિત્વં યથા પુંસઃ સાક્ષિત્વવ્યભિચારવાન્ ॥ ૧૭.૯૧॥

વ્યભિચારો મિથો યદ્વત્પ્રમાત્રાદેઃ સ્વસાક્ષિકઃ ।
સાક્ષિણોઽવ્યભિચારસ્તુ તથા કિં સાક્ષિકો ભવેત્ ॥ ૧૭.૯૨॥

આત્માત્મવત્વસમ્બન્ધઃ ષષ્ઠ્યોક્તો જગદાત્મનોઃ ।
સ્વતો નિરાત્મકં દૃશ્યમાત્મના સાત્મતાં વ્રજેત્ ॥ ૧૭.૯૩॥

આત્મા સર્વસ્વરૂપત્વાત્સર્વાન્તરગિરોદિતઃ ।
સર્પધારાદિકલ્પેષુ રજ્જોરાન્તરતા યથા ॥ ૧૭.૯૪॥

આત્મનોઽનવશેષેણ તદન્યાર્થાભિસઙ્ગતેઃ ।
પ્રત્યઙ્માત્રતયૈવાન્યદ્બોધાદાત્મનિ લીયતે ॥ ૧૭.૯૫॥

ઇત્થં સ્વાનુભવાદ્યાજ્ઞવલ્ક્યઃ સર્વાન્તરં જગૌ ।
અન્યઃ સંશયમાપાદ્ય જિગીષુઃ પરિપૃચ્છતિ ॥ ૧૭.૯૬॥

તવાત્મેત્યુત્તરં દત્તં મમાત્મેતિ ત્રિધેક્ષ્યતે ।
દેહો લિઙ્ગં ચ સાક્ષીતિ તેષુ સર્વાન્તરસ્તુ કઃ ॥ ૧૭.૯૭॥

સર્વાન્તરત્વં દુઃસાધ્યમલ્પયોર્દેહલિઙ્ગયોઃ ।
સદ્ભાવેઽન્યસ્ય કિં માનમપ્રમેયસ્ય સાક્ષિણઃ ॥ ૧૭.૯૮॥

એવં પૃષ્ટઃ સ્વાનુભૂતૌ વાદિનોઽનધિકારતામ્ ।
મત્વાઽનુમાનતઃ સત્તામાત્મનઃ પ્રત્યપાદયત્ ॥ ૧૭.૯૯॥

સ્વપ્રભે માનનૈષ્ફલ્યાદપ્રમેયત્વમિષ્યતે ।
વાદિભ્રાન્તિનિવૃત્ત્યર્થં માનોક્તૌ હ્રિયતેઽત્ર કિમ્ ॥ ૧૭.૧૦૦॥

પ્રાણાદિકરણૈશ્ચેષ્ટા કર્તૃપૂર્વા ક્રિયાત્વતઃ ।
છિદિક્રિયાવત્કર્તૃત્વં ન યુક્તં દેહલિઙ્ગયોઃ ॥ ૧૭.૧૦૧॥

કારણપ્રેરકઃ કર્તા કરણૈઃ પ્રેર્યતે વપુઃ ।
લિઙ્ગં તુ કરણાત્મત્વાન્નૈવ કર્તૃત્વમર્હતિ ॥ ૧૭.૧૦૨॥

મુખસઞ્ચારિણા જાગ્રધઃ પ્રાણેનાનતીક્ષિતા ।
સર્વપ્રત્યક્તમઃ સોઽયમાત્મા સર્વાન્તરાવધિઃ ॥ ૧૭.૧૦૩॥

સુપ્તેઽસ્મિન્ કરણગ્રામે યોઽસુપ્તોઽલુપ્તદૃષ્ટિકઃ ।
અથ સર્વાન્નામરૂપાન્ પશ્ય પ્રાણિતિ વાયુના ॥ ૧૭.૧૦૪॥

(અર્થાત્સવાસનારૂપાન્પશ્યન્)
સ્પષ્ટેષુ બહુલિઙ્ગેષુ માનાભાવમચૂચુદઃ ।
ઇત્યુપાલબ્ધયે લિઙ્ગાન્યપાનાદીન્યુદાહરન્ ॥ ૧૭.૧૦૫॥

એકાદશેન્દ્રિયોત્પન્નચેષ્ટાનામુપલક્ષણમ્ ।
પ્રાણાદ્યુદાહૃતિસ્તેન લિઙ્ગાનાં બહુતા સ્ફુટા ॥ ૧૭.૧૦૬॥

પ્રાણાદિકાર્યકરણૈઃ સ્વતોઽસંહત એકલઃ ।
અકુર્વન્ કુરુતે ચેષ્ટામયસ્કાન્તો મણિર્યથા ॥ ૧૭.૧૦૭॥

રથાદૌ નિયતા ચેષ્ટા ચેતનેનાનધિષ્ઠિતે ।
ન દૃષ્ટા ચેતનસ્તેન પ્રાણાદીનાં પ્રવર્તકઃ ॥ ૧૭.૧૦૮॥

સસૂત્રદારુયન્ત્રેણ સદૃશં લિઙ્ગવદ્વપુઃ ।
યઃ પ્રેરયત્યસાવાત્મેત્યુક્તેઽન્યોપજહાસ તમ્ ॥ ૧૭.૧૦૯॥

યથા ગાં દર્શયેત્યુક્તે લિઙ્ગં મૂઢો વદેત્તથા ।
આપરોક્ષ્યમનુક્ત્વા ત્વં લિઙ્ગેનાવેદયસ્યહો ॥ ૧૭.૧૧૦॥

લિઙ્ગં વાચ્યં પરોક્ષેઽર્થે ન ત્વાત્મનિ પરોક્ષતા ।
ઇતિ મત્વાઽઽહૈવકારં પારોક્ષસ્ય નિવર્તકમ્ ॥ ૧૭.૧૧૧॥

મુખ્યાપરોક્ષમુક્તં ત ઇતિ દર્શયિતું પુનઃ ।
પ્રત્યગ્દૃષ્ટિપરં વાક્યમુત્તરત્વેન વક્ત્યસૌ ॥ ૧૭.૧૧૨॥

વિદ્વદ્ભાષામબુધ્વાઽન્યઃ સ્વરૂપાદિષ્વિવાત્મનિ ।
અક્ષજન્યાપરોક્ષત્વં મત્વાઽપૃચ્છત્પુરેવ તમ્ ॥ ૧૭.૧૧૩॥

દૃષ્ટશ્રુતમતજ્ઞાતેષ્વેષુ સર્વાન્તરસ્તુ કઃ ।
દૃષ્ટ્યાદ્યગોચરઃ પ્રત્યઙ્ઙિતિ પ્રશ્નમપાકરોત્ ॥ ૧૭.૧૧૪॥

વેદ્મીતિ યદ્બલાદ્વક્તિ ન વેદ્મીતિ ચ યદ્બલાત્ ।
યોગિનોઽનુભવન્ત્યેતમગોચરતયૈવ હિ ॥ ૧૭.૧૧૫॥

ઉક્તવર્ત્માતિરેકેણ નાત્મવસ્તુ ઘટાદિવત્ ।
શક્યતે પ્રતિનિર્દેષ્ટું પ્રમાણાઽગોચરત્વતઃ ॥ ૧૭.૧૧૬॥

દ્રષ્ટૃદર્શનદૃશ્યાનાં સાક્ષિણઃ સ્વપ્રભસ્ય તત્ ।
પ્રમાણગોચરત્વં તુ વસ્તુસ્વાભાવ્યતો ભવેત્ ॥ ૧૭.૧૧૭॥

દૃષ્ટેર્ન પશ્યેદ્દ્રષ્ટારમિતિ પ્રત્યુત્તરં વચઃ ।
વક્ત્યગોચરતામેતદ્વાક્યં વિવ્રિયતે સ્ફુટમ્ ॥ ૧૭.૧૧૮॥

ચક્ષુર્જન્યમનોવૃત્તિશ્ચિદ્યુક્તા રૂપભાસિકા ।
દૃષ્ટિરિત્યુચ્યતે દ્રષ્ટા દૃષ્ટેઃ કર્તેતિ લૌકિકૈઃ ॥ ૧૭.૧૧૯॥

અતો દૃષ્ટિદ્વયં વાક્યે ભાતિ ષષ્ઠ્યન્તશબ્દતઃ ।
એકા દૃષ્ટિસ્તૃજન્તેન ધાતુનાઽન્યેતિ તદ્દ્વયમ્ ॥ ૧૭.૧૨૦॥

પ્રમાતુર્જાયતે વૃત્તિશ્ચક્ષુષા રૂપરઞ્જિતા ।
દ્રષ્ટવ્યં તુ તયા રૂપં સાક્ષી દૃશ્યતે તયા ॥ ૧૭.૧૨૧॥

દૃષ્ટેર્દ્રષ્ટારમાત્માનં દૃષ્ટ્યા પશ્યેન્ન દૃશ્યયા ।
ઇતિ વાક્યં મુનિર્વક્તિ વર્ણિતં ન્યાયગર્ભિતમ્ ॥ ૧૭.૧૨૨॥

યેન ચક્ષુરિદં દૃષ્ટં ચક્ષુષા યન્ન પશ્યતિ ।
બ્રહ્મ વિદ્ધિ તદેવ ત્વમિતિ શ્રુત્યન્તરે સ્ફુટમ્ ॥ ૧૭.૧૨૩॥

શ્રુતિઃ શ્રોત્રજધીવૃત્તિસ્તસ્યાઃ શ્રોતાઽવભાસકઃ ।
શ્રુત્યા શબ્દાવગાહિન્યા શ્રોતારં શ‍ૃણુયાન્ન તમ્ ॥ ૧૭.૧૨૪॥

ઊહાપોહાત્મધીવૃત્તિર્મતિસ્તસ્યાઃ પ્રકાશકમ્ ।
અનૂહ્યમનપોહ્યં તં ન મન્વીથાસ્ત્વમેતયા ॥ ૧૭.૧૨૫॥

અસ્પષ્ટ ઊહ્ય આત્મા તુ વિસ્પષ્ટો ભાનરૂપતઃ ।
અનપોહ્યોઽનપાયિત્વાદાત્મા નાપૈતિ કર્હિચિત્ ॥ ૧૭.૧૨૬॥

નિશ્ચયાત્મકધીવૃત્તિર્વિજ્ઞાતિસ્તદ્વિભાસકમ્ ।
અસન્દિગ્ધં તયા વૃત્ત્યા ન વિજ્ઞાતું ત્વમર્હસિ ॥ ૧૭.૧૨૭॥

દૃષ્ટશ્રુતમતજ્ઞાતેષ્વિત્થમાત્મા ન કશ્ચન ।
કિં તર્ હ્યેષ તવાત્મેતિ પ્રોક્તઃ સર્વાન્તરઃ પુરા ॥ ૧૭.૧૨૮॥

યઃ સર્વં વિષયીકુર્વન્ વિષયીક્રિયતે ન હિ ।
કિન્તુ ભાતિ સ્વયં સોઽયં સર્વાન્તર ઇતીરિતઃ ॥ ૧૭.૧૨૯॥

સર્વાન્તરત્વં સાર્વાત્મ્યમન્યસ્મિન્સતિ તત્કુતઃ ।
ન ચેદન્યત્તદા સર્વશબ્દાર્થો નેતિ શઙ્કિતે ॥ ૧૭.૧૩૦॥

અતોઽન્યદાર્તમિત્યાહ દોષદ્વયનિવૃત્તયે ।
આર્તં માયામયં તસ્ય તત્ત્વજ્ઞાનેન પીડનાત્ ॥ ૧૭.૧૩૧॥

સર્પાદીનાં કલ્પિતાનાં રજ્જુરાત્મા યથા તથા ।
માયામયસ્ય સર્વસ્ય ચિદ્વસ્ત્વાત્મેતિ સુસ્થિતમ્ ॥ ૧૭.૧૩૨॥

પઞ્ચમબ્રાહ્મણે પૂર્વમુક્તસ્ય પ્રત્યગાત્મનઃ ।
બ્રહ્મત્વસાધનં બોધો મુક્તલક્ષ્મ ચ વર્ણ્યતે ॥ ૧૭.૧૩૩॥

ઉષસ્તપૃષ્ટાદન્યત્વં નિવર્તયિતુમાત્મનઃ ।
યદેવ સાક્ષાદિત્યુક્તાવેવકારઃ પ્રયુજ્યતે ॥ ૧૭.૧૩૪॥

ઉપદેશસ્ય વિષયસ્ત્વમર્થઃ શોધિતઃ પુરા ।
ન બ્રહ્મત્વં સમ્યગુક્તમિતિ પૃચ્છતિ તત્પુનઃ ॥ ૧૭.૧૩૫॥

અશનાયાદિરહિતબ્રહ્મતાયા અભાષણે ।
ન સ્યાત્સર્વાન્તરત્વાદિ સંસારિણિ ચિદાત્મનિ ॥ ૧૭.૧૩૬॥

ઇત્યભિપ્રેત્ય તેનોક્તં સાક્ષાદિત્યાદિકં પુનઃ ।
અનૂદ્ય સર્વં પપ્રચ્છ કહોલો બ્રહ્મરૂપતામ્ ॥ ૧૭.૧૩૭॥

ત્વમર્થાચ્છોધિતાન્નાન્યદ્બ્રહ્મેત્યેતદ્વિવક્ષયા ।
ઉક્તમેવોત્તરં ભૂય એષ ઇત્યાદ્યવોચત ॥ ૧૭.૧૩૮॥

ક્ષુત્પિપાસે શોકમોહૌ જરામૃત્યૂ ઇતીદૃશૈઃ ।

ત્રિભિર્યુગ્મૈર્વિશિષ્ટાનાં મધ્યેઽસૌ કતમો વદ ॥ ૧૭.૧૩૯॥

યદ્યન્યતમ એતેષાં તસ્ય ન બ્રહ્મતા તદા ।
એતેષ્વનન્તર્ભૂતસ્તુ ન કોઽપ્યાત્મા જનૈર્મતઃ ॥ ૧૭.૧૪૦॥

વિદ્વજ્જનાનુભૂત્યૈષ ક્ષુધાદેરવભાસકઃ ।
પ્રસિદ્ધ ઇત્યભિપ્રેત્ય બ્રહ્મત્વેન તમુક્તવાન્ ॥ ૧૭.૧૪૧॥

અત્યેતિ યોઽશનાયાદીન્વિચારેણ નિરૂપણે ।
ક્ષુધાદિસાક્ષી તસ્યાસ્ય બ્રહ્મત્વં કેન વાર્યતે ॥ ૧૭.૧૪૨॥

નન્વેક આત્મા મૂઢાનાં વિદુષાં ચેતિ તે મતમ્ ।
ઉક્તોર્મિષટ્કાતીતત્વં તદ્વત્વં ચાસ્ય તત્કથમ્ ॥ ૧૭.૧૪૩॥

અવિચારવિચારાભ્યાં યથા સર્પત્વરજ્જુતે ।
તથાત્મન્યપિ સંસારભાવાભાવાવિતીક્ષ્યતામ્ ॥ ૧૭.૧૪૪॥

ક્ષુત્પિપાસે પ્રાણધર્મૌ શોકમોહૌ તુ માનસૌ ।
જરામૃત્યૂ દેહધર્માવાત્મધર્મૌ ન કશ્ચન ॥ ૧૭.૧૪૫॥

પ્રાણસઞ્ચારબાહુલ્યાદ્ગમનાદિશ્રમે સતિ ।
ક્ષુત્પિપાસાજનિસ્તેન પ્રાણધર્મત્વમેતયોઃ ॥ ૧૭.૧૪૬॥

ઇષ્ટસ્ય વસ્તુનોઽસિદ્ધૌ ચેતસો યાઽનવસ્થિતિઃ ।
સ શોકો મનસો ધર્મો મોહશ્ચ વિષયભ્રમઃ ॥ ૧૭.૧૪૭॥

જરા દેહસ્ય શૈથિલ્યં મૃત્યુઃ પ્રાણવિયુક્તતા ।
તે સર્વેઽપ્યાત્મનિ ભ્રાન્ત્યા કલ્પિતા વ્યોમ્નિ નૈલ્યવત્ ॥ ૧૭.૧૪૮॥

યઃ સ્વકારણસંસર્ગઃ ક્ષુધાદેઃ પ્રલયે મતઃ ।
અનાત્યન્તિકરૂપત્વાત્સોઽત્યયોઽત્ર ન ગૃહ્યતે ॥ ૧૭.૧૪૯॥

તત્કારણનિષેધો યઃ સ્વમહિમ્નૈવ વસ્તુનઃ ।
તમત્યયં મોક્ષવિધૌ તદ્વિદ્વાંસઃ પ્રચક્ષતે ॥ ૧૭.૧૫૦॥

પ્રાણહેતુસ્તમઃ પ્રાણધર્માભ્યામુપલક્ષ્યતે ।
સૂત્રાત્મા શોકમોહાભ્યાં જરયા મૃત્યુના વિરાટ્ ॥ ૧૭.૧૫૧॥

તમઃ સૂત્રં વિરાજં ચ યોઽત્યેત્યાત્મા સ્વભાવતઃ ।
અસઙ્ગસ્તત્પરં બ્રહ્મ સાક્ષાદિત્યાદિલક્ષણમ્ ॥ ૧૭.૧૫૨॥

યથા વિશુદ્ધમાકાશં સતિ વાઽસતિ વા મલે ।
નીહારાદૌ તથૈવાત્મા કાર્યકારણવસ્તુનિ ॥ ૧૭.૧૫૩॥

પરમાત્મસ્વભાવોઽયં કહોલાય પ્રપઞ્ચિતઃ ।
તદ્બોધસાધનં ત્યાગઃ એતમિત્યાદિનોચ્યતે ॥ ૧૭.૧૫૪॥

ઉત્પન્નસમ્યગ્જ્ઞાનસ્ય સંન્યાસો લક્ષણં યતઃ ।
સાધનં ચ તદુત્પત્તૌ સંન્યાસોઽતોઽત્ર ગમ્યતામ્ ॥ ૧૭.૧૫૫॥

બ્રહ્માત્મનોર્યદેકત્વં બ્રાહ્મણદ્વયનિશ્ચિતમ્ ।
એતં તમિતિ શબ્દાભ્યાં તદૈકાત્મ્યમનૂદ્યતે ॥ ૧૭.૧૫૬॥

અત્યેતિ યોઽશનાયાદીનેતં સર્વાન્તરં પુરા ।
ઉદિતં તં વિદિત્વાઽથ વ્યુત્તિષ્ઠત્યેષણાત્રયાત્ ॥ ૧૭.૧૫૭॥

બ્રહ્મપ્રશ્નેન પૃષ્ટે તે તદ્બોધફલસાધને ।
ઇતિ મત્વોત્તરત્વેન વ્યુત્થાનદ્વયમુચ્યતે ॥ ૧૭.૧૫૮॥

પૂર્વં વિદિત્વા પ્રશ્નાત્તુ વ્યુત્થાયેત્યન્વયાત્ શ્રુતાત્ ।
વિદ્વત્સંન્યાસ આભાતિ બ્રહ્મવિદ્યાફલાત્મકઃ ॥ ૧૭.૧૫૯॥

વ્યુત્થાયાથ વિદિત્વેતિ વ્યત્યયેનાર્થિકાન્વયાત્ ।
સિદ્ધો વિવિદિષાત્યાગઃ સ્પષ્ટઃ શ્રુત્યન્તરેષ્વસૌ ॥ ૧૭.૧૬૦॥

સ્વાત્મલોકં સમિચ્છન્તઃ પ્રવ્રજન્તીતિ વક્ષ્યતિ ।
ત્યાગેનૈકેઽમૃતત્વં તુ પ્રાપ્તા ઇત્યપરા શ્રુતિઃ ॥ ૧૭.૧૬૧॥

બ્રાહ્મણગ્રહણં શ્રુત્વા વિપ્રાણામેવ ભાષ્યકૃત્ ।
સંન્યાસેઽધિકૃતિં પ્રાહ ચતુર્થાશ્રમરૂપ્યસૌ ॥ ૧૭.૧૬૨॥

વિદ્યાઙ્ગં તત્ફલાત્માનં ગાર્ગીવિદુરયોરપિ ।
સ્ત્રીશૂદ્રયોર્ભાષ્યકારઃ સંન્યાસમનુમન્યતે ॥ ૧૭.૧૬૩॥

પુત્રૈષણેતિ પુત્રાર્થં દારસ્વીકારવાઞ્છનમ્ ।
કર્મણાં સાધને વિત્તે તૃષ્ણા વિત્તૈષણા મતા ॥ ૧૭.૧૬૪॥

લોકૈષણેતિ દેવાદિલોકાર્થોપાસનાઽર્થિતા (ના શ્રુતા) ।
ન કશ્ચિદન્યઃ સંસારઃ ઉક્તાદસ્ત્યેષણાત્રયાત્ ॥ ૧૭.૧૬૫॥

મનુષ્યલોકઃ પુત્રેણ પિતૃલોકસ્તુ કર્મણા ।
વિદ્યયા દેવલોકશ્ચેત્યબ્રવીત્સઙ્ગ્રહશ્રુતિઃ ॥ ૧૭.૧૬૬॥

ન્યાય્યાં વૃત્તિં સમુલ્લઙ્ઘ્ય તદ્વિરુદ્ધતયા સ્થિતિઃ ।
વ્યુત્થાનમુદિતં રાજ્ઞઃ સામન્તો વ્યુત્થિતો યથા ॥ ૧૭.૧૬૭ ॥

ભિક્ષયા લક્ષ્યતે ચર્યા પરિગ્રહવિવર્જિતા ।
કિં ભોગ્યં પરિગૃહ્ણીયાત્સર્વભોગ્યેષુ દોષદૃક્ ॥ ૧૭.૧૬૮ ॥

લોકત્રયાર્થૈષણાભ્યો વ્યુત્થાનં ચાપરિગ્રહઃ ।
દ્વયં બોધમહિમ્નૈવ વિદુષાં ન તુ યત્નતઃ ॥ ૧૭.૧૬૯ ॥

આનન્દૈકસ્વભાવં સ્વમાત્માનં પશ્યતઃ કુતઃ ।
કામઃ પરિગ્રહો વા સ્યાત્યોઽકામ ઇતિ વક્ષ્યતિ ॥ ૧૭.૧૭૦ ॥

એષણાત્રય એતસ્મિન્સમાના બન્ધહેતુતા ।
ઇતિ મત્વૈકતાં તાસાં ત્યાજ્યૈવેત્યબ્રવીત્ શ્રુતિઃ ॥ ૧૭.૧૭૧ ॥

કર્મણ્યેવાધિકારસ્તે મા ફલેષ્વિતિ શાસ્ત્રતઃ ।
એષણાત્વાત્ફલં ત્યાજ્યં ન તુ કર્માદિસાધનમ્ ॥ ૧૭.૧૭૨ ॥

ઇતિ ભ્રમં વ્યુદસિતું પ્રાબ્રવીત્સાધ્યસાધને ।
ઉભે અપ્યેષણે એવેત્યતસ્ત્યાગસ્તયોર્દ્વયોઃ ॥ ૧૭.૧૭૩ ॥

અવિશુદ્ધધિયઃ કર્મણ્યધિકારેઽપિ શુદ્ધધીઃ ।
સત્યાં વિવિદિષોત્પત્તૌ તદર્થં કર્મ સન્ત્યજેત્ ॥ ૧૭.૧૭૪ ॥

યસ્માદ્બ્રહ્મવિદઃ પૂર્વે ફલસંન્યાસમાપ્નુવન્ ।
તસ્માદ્વિવિદિષુઃ કુર્યાત્પાણ્ડિત્યં ફલસિદ્ધયે ॥ ૧૭.૧૭૫ ॥

પાણ્ડિત્યબાલ્યમૌનાનિ શ્રવણાદીનિ તૈરયમ્ ।
ભવતિ બ્રાહ્મણસ્તત્ર બ્રાહ્મણ્યં બ્રહ્મરૂપતા ॥ ૧૭.૧૭૬ ॥

પણ્ડેતિબુદ્ધેર્નામૈતત્સા જાતા યસ્ય માનતઃ (નામતઃ) ।
સ પણ્ડિતસ્તસ્ય કર્મ પાણ્ડિત્યં શ્રવણં તુ તત્ ॥ ૧૭.૧૭૭ ॥

આચાર્યાચ્ચાગમાત્ શ્રુત્વા નિઃશેષં વેદનં તતઃ ।
બાલભાવેન તિષ્ઠાસેત્યુક્ત્વા મનનતત્પરઃ ॥ ૧૭.૧૭૮ ॥

શ્રવણં શાસ્ત્રતાત્પર્યનિશ્ચયો મનનં પુનઃ ।
અર્થાસમ્ભાવનોચ્છિત્યૈ યુક્તીનામનુચિન્તનમ્ ॥ ૧૭.૧૭૯ ॥

પાણ્ડિત્યેન વિદિત્વાઽથ છિત્વા બાલ્યેન સંશયમ્ ।

મુનિર્ધ્યાનસમાધિભ્યાં ભવેદ્ધીવૃત્તિશાન્તયે ॥ ૧૭.૧૮૦॥

પ્રશાન્તવૃત્તિકે ચિત્તે પરમાનન્દદીપકે ।
કૃતકૃત્યો બ્રહ્મભાવં ગતો બ્રાહ્મણ ઉચ્યતે ॥ ૧૭.૧૮૧॥

કેનેતિ લક્ષણપ્રશ્નો યેનેદૃક્તેન લક્ષ્યતામ્ ।
ઇત્યુત્તરવચો યોજ્યં તસ્યાર્થઃ પ્રવિવિચ્યતે ॥ ૧૭.૧૮૨॥

ગીતાયાં કુત્રચિત્પ્રોક્તં સ્થિતપ્રજ્ઞસ્ય લક્ષણમ્ ।
અન્યત્ર વિષ્ણુભક્તસ્ય ગુણાતીતસ્ય ચ ક્વચિત્ ॥ ૧૭.૧૮૩॥

યેન ચિહ્નેન તત્રાયમીદૃગેવ નિરેષણઃ ।
ઉપલક્ષયિતું શક્યસ્તદેવાસ્ત્યસ્ય લક્ષણમ્ ॥ ૧૭.૧૮૪॥

બ્રહ્મ યાદૃક્તાદૃગેવ ભવેદ્વિદ્વાન્વિબોધતઃ ।
બોધોऽતો લક્ષણં તસ્ય બોધશ્ચ સ્વાત્મસાક્ષિકઃ ॥ ૧૭.૧૮૫॥

અતોऽન્યદાર્તમિત્યેષ વ્યતિરેકસ્ત્રિધોચ્યતે ।
પ્રતીચો બ્રહ્મતેહોક્તા ભેદ આર્તસ્તતસ્તયોઃ ॥ ૧૭.૧૮૬॥

નિરેષણત્વં વિદ્યાયા હેતુરાર્તા ઇહૈષણાઃ ।
વિદુષો લક્ષણં બોધ આર્તં તલ્લક્ષણાન્તરમ્ ॥ ૧૭.૧૮૭॥

ષષ્ઠેऽસ્મિન્ બ્રાહ્મણે બ્રહ્મકાર્યં સર્વં વિવિચ્યતે ।
સર્વાન્તરત્વં સુજ્ઞેયં બ્રહ્મણઃ સર્વનિર્ણયાત્ ॥ ૧૭.૧૮૮॥

યદ્યત્કાર્યં કારણેન વ્યાપ્તમન્તર્બહિશ્ચ તત્ ।
ઇતિ તર્કેણ પપ્રચ્છ કારણસ્ય પરમ્પરામ્ ॥ ૧૭.૧૮૯॥

પાર્થિવં કઠિનં સર્વમોતં પ્રોતં દ્રવે જલે ।
દધિપિણ્ડ ઇવ ક્ષીરે જલં કુત્ર તથા સ્થિતમ્ ॥ ૧૭.૧૯૦॥

દીર્ઘતન્તુવદોતત્વં તિર્યક્તન્તોરિવેતરત્ ।
યદ્વાન્તર્વ્યાપિતત્વં પ્રોતત્વં તુ બહિઃ સ્થિતિઃ ॥ ૧૭.૧૯૧॥

જલસ્ય કારણં તેજસ્તેજસો વાયુરાશ્રયઃ ।
શ્રુત્યન્તરાદિદં જ્ઞેયં વાયોસ્તુ વિયદાશ્રયઃ ॥ ૧૭.૧૯૨॥

ભૂમ્યાદિવિયદન્તાનાં ભૂતાનામુત્તરોત્તરમ્ ।
સૂક્ષ્મતાવ્યાપિતે દૃષ્ટે તાભ્યાં કારણતેક્ષ્યતામ્ ॥ ૧૭.૧૯૩॥

પઞ્ચભૂતેભ્ય ઉત્પન્ના અસ્મદ્દેહાદયોઽખિલાઃ ।
બ્રહ્માણ્ડાન્તા ઇમે દેહા ભોગ્યત્વાલ્લોકસંજ્ઞકાઃ ॥ ૧૭.૧૯૪॥

યથૈકસ્માદિક્ષુરસાદુત્તરોત્તરપાકતઃ ।
ગુડાદીનિ બહૂનિ સ્યુર્ભૂતેભ્યોઽણ્ડાદયસ્તથા ॥ ૧૭.૧૯૫॥

નરગન્ધર્વમાર્તણ્ડચન્દ્રનક્ષત્રદેવતાઃ ।
ઇન્દ્રો વિરાટ્ તદણ્ડં ચેત્યેતા ભૂતદશાઃ સ્મૃતાઃ ॥ ૧૭.૧૯૬॥

તત્ર દેહારમ્ભદશાસ્તત્તન્નામ્ના સમીરિતાઃ ।
સ્થૂલસૂક્ષ્મદશાસ્તાસુ કાર્યકારણતા ક્રમાત્ ॥ ૧૭.૧૯૭॥

પઞ્ચીકૃતાનાં ભૂતાનાં સૂક્ષ્મતાણ્ડે સમાપ્યતે ।
એતાવદેવ તર્કેણ ગમ્યં ન તુ તતઃ પરમ્ ॥ ૧૭.૧૯૮॥

અણ્ડારમ્ભકભૂતાનામપઞ્ચીકૃતભૂતજમ્ ।
સૂત્રં કારણમિત્યેતદાગમેનૈવ ગમ્યતે ॥ ૧૭.૧૯૯॥

અચિન્ત્યાઃ ખલુ યે ભાવા ન તાંસ્તર્કેણ યોજયેત્ ।
સૂત્રાન્તર્યામ્યક્ષરાણિ તાર્કિકા નાનુમન્વતે ॥ ૧૭.૨૦૦॥

તર્કાભાસો ભવેત્તેષુ હેતુદૃષ્ટાન્તવર્જનાત્ ।
અન્યથા પ્રતિપત્ત્યાઽતો મૂર્ધપાતં મુનિર્જગૌ ॥ ૧૭.૨૦૧॥

સપ્તમબ્રાહ્મણે તર્ક્યં સન્ત્યજ્યાગમમાર્ગતઃ (ભાગતઃ)।
બ્રહ્માણ્ડકારણં સૂત્રમન્તર્યામી ચ વર્ણ્યતે ॥ ૧૭.૨૦૨॥

સૂત્રાન્તર્યામિણૌ જ્ઞાતૌ ગન્ધર્વસ્યોપદેશતઃ ।
તર્કાન્નેતિ વિવક્ષિત્વા કથાં ભુજ્યુવદુક્તવાન્ ॥ ૧૭.૨૦૩॥

સૂત્રબદ્ધં દારુયન્ત્રં પુરુષો નર્તયેદ્યથા ।
સૂત્રબદ્ધં જગત્તદ્વતન્તર્યામી નિયચ્છતિ ॥ ૧૭.૨૦૪॥

સૂત્રાન્તર્યામિણૌ સર્વજગત્યનુગતાવતઃ ।
તૌ વિદ્વાનખિલં વેત્તીત્યતો જ્ઞાતવ્યતા તયોઃ ॥ ૧૭.૨૦૫॥

સમષ્ટિવ્યષ્ટિરૂપેણ ભુજ્યું પ્રતિ ય ઈરિતઃ ।
સ એવ વાયુઃ સૂત્રાત્મા તેન સર્વં જગદ્ધૃતમ્ ॥ ૧૭.૨૦૬॥

બ્રહ્માદિસ્તમ્બપર્યન્તં પ્રાણિકર્મ પુરા કૃતમ્ ।
વાય્વાત્મના પરિણતં વર્તતે કારણાત્મનિ ॥ ૧૭.૨૦૭॥

મૂર્તામૂર્તબ્રાહ્મણોક્તવાસના એતમાશ્રિતાઃ ।
તદાત્મકમિદં લિઙ્ગં યત્સપ્તદશમુચ્યતે ॥ ૧૭.૨૦૮॥

વિષ્ટબ્ધો વાયુના દેહ ઇત્યેતન્મરણે સતિ ।
આવયોર્વપુષઃ કર્માયોગ્યત્વાદવસીયતામ્ ॥ ૧૭.૨૦૯॥

અપઞ્ચીકૃતભૂતાનાં કાર્યં સૂત્રમુદાહૃતમ્ ।
અણ્ડારમ્ભકભૂતાનિ પ્રોતાન્યોતાનિ તત્ર હિ ॥ ૧૭.૨૧૦॥

સૂત્રાદપ્યાન્તરં તત્ત્વમન્તર્યામ્યાખ્યમુચ્યતે ।
કાર્યકારણભાવોઽયમસ્મિન્નુક્તે સમાપ્યતે ॥ ૧૭.૨૧૧॥

ભૂમિષ્ઠોઽભ્યન્તરો ભૂમેર્ભૂમ્યજ્ઞાતશ્ચ ભૂવપુઃ ।
નિયચ્છતિ ભુવં યોઽન્તઃ સ આત્માઽન્યસ્ય તેઽપિ મે ॥ ૧૭.૨૧૨॥

લોકં ધત્તે સ્વયં ભૂમિઃ સ્વાન્તર્યામી સ્વયં તતઃ ।
ઇતિ સ્વભાવવાદોઽયં ભૂમિષ્ઠત્વેન વાર્યતે ॥ ૧૭.૨૧૩॥

અન્તરત્વેન ભૂમિષ્ઠપર્વતાદિ નિવર્ત્યતે ।
ભૂદેવતાનિવૃત્તિઃ સ્યાત્યં ન જાનાતિ ભૂરિતિ ॥ ૧૭.૨૧૪॥

નાન્તર્યામી વિદેહત્વે સાધનાનામસમ્ભવાત્ ।
દેહિતા તુ ન દૃષ્ટેતિ ન દોષો ભૂવપુષ્મતઃ ॥ ૧૭.૨૧૫॥

ભૂદેવતાયા યો દેહો દેહોંઽતર્યામિણોઽપિ સઃ ।
દેવસ્ય કર્મણેશસ્ય માયયા ચાર્જિતો યતઃ ॥ ૧૭.૨૧૬॥

ન ચૈકદેહયોગેઽપિ યન્તૃયન્તવ્યસઙ્કરઃ ।
બહિષ્ઠાં દેવતાં ભૂમિમન્તઃસ્થેશો નિયચ્છતિ ॥ ૧૭.૨૧૭॥

કાર્યોપાધિર્બહિષ્ઠઃ સ્યાત્કારણોપાધિરાન્તરઃ ।
ઉપાધિમાત્રતો ભેદો વસ્તુતસ્તુ ન ભિદ્યતે ॥ ૧૭.૨૧૮॥

અતસ્તે મેઽખિલસ્યાપિ સોઽન્તર્યામ્યાત્મતાં ગતઃ ।
અમૃતત્વાન્ન જીવત્વમાત્મત્વેઽપ્યસ્ય શઙ્ક્યતે ॥ ૧૭.૨૧૯॥

સાર્વાત્મ્યં વક્તુમસ્યૈષ બહૂપાધિષુ વર્ણિતઃ ।
સર્વાત્મા શક્તિયુક્તો યઃ સોઽન્તર્યામીતિ ગમ્યતામ્ ॥ ૧૭.૨૨૦॥

પ્રત્યગ્ધ્વાન્તં ચિદાભાસં સ્વકાર્યનિયમાત્મકમ્ ।

તદુપાધિર્નિયન્તૈષ પરઃ પ્રોક્તો ન તુ સ્વતઃ ॥ ૧૭.૨૨૧॥

સર્વજ્ઞઃ સર્વશક્તિશ્ચ સર્વાત્મા સર્વગો ધ્રુવઃ ।
જગજ્જન્મસ્થિતિધ્વંસહેતુરેષ મહેશ્વરઃ ॥ ૧૭.૨૨૨॥

નારાયણાભિધો મન્ત્ર એતસ્યૈવાભિધાયકઃ ।
પઞ્ચાક્ષરેણ મન્ત્રેણ શિવ ઇત્યેષ ગીયતે ॥ ૧૭.૨૨૩॥

હિરણ્યગર્ભં હૈરણ્યગર્ભીયા એવમૂચિરે ।
વ્યાસસ્તત્તત્પુરાણેષુ તત્તદ્રૂપતયોચિવાન્ ॥ ૧૭.૨૨૪॥

ભૂમ્યાદિદેવતાઃ કસ્માન્ન સ્વાન્તર્યામિણં વિદુઃ ।
અદૃષ્ટોઽશ્રુત ઇત્યાહ કારણં તદવેદને ॥ ૧૭.૨૨૫॥

દૃષ્ટિશ્રુતિમતિજ્ઞાતિવિષયત્વં ચિદાત્મનઃ ।
ઉષસ્તબ્રાહ્મણે પૂર્વં યુક્ત્યા સમ્યઙ્ નિવારિતમ્ ॥ ૧૭.૨૨૬॥

માગોચરાતિવર્તિત્વાન્માતૃમાનાદિસાક્ષિણઃ ।
દ્રષ્ટુરન્યસ્ય ચાભાવાન્ન તં પશ્યન્તિ દેવતાઃ ॥ ૧૭.૨૨૭॥

અદૃષ્ટત્વાશ્રુતત્વાદિ પ્રત્યગ્ધ્વાન્તેઽપિ સમ્ભવેત્ ।
તન્નિવૃત્ત્યૈ શ્રુતિર્દ્રષ્ટા શ્રોતા મન્તેત્યભાષત ॥ ૧૭.૨૨૮॥

દ્રષ્ટૃત્વશ્રોતૃતાદ્યસ્ય દૃષ્ટિશ્રુત્યાદિસાક્ષિતા ।
અલુપ્તચિત્સ્વભાવત્વાન્ન વિકારો મનાગપિ ॥ ૧૭.૨૨૯॥

લોકસિદ્ધા નિયમ્યસ્ય જીવસ્ય દ્રષ્ટૃતા તથા ।
અન્તર્યામ્યપિ ચેદ્દ્રષ્ટા દેહે ભાસેત તદ્દ્વયમ્ ॥ ૧૭.૨૩૦॥

ઇતિ શઙ્કાનિવૃત્ત્યર્થં નાન્યોઽતોઽસ્તીતિ ભણ્યતે ।
લોકે જીવતયા મૂઢૈરન્તર્યામ્યેવ ભાવ્યતે ॥ ૧૭.૨૩૧॥

સાધારણો યથા સૂર્યો માં પ્રત્યેવેતિ પામરૈઃ ।
અસાધારણરૂપેણ ભાવ્યતે જીવતા તથા ॥ ૧૭.૨૩૨॥

બુદ્ધિસ્થઃ પર એવાત્મા જીવાત્મેતિ નિગદ્યતે ।
બુદ્ધ્યાગમાપાયસાક્ષી નિયન્તેત્યુચ્યતે પરઃ ॥ ૧૭.૨૩૩॥

સૂત્રાન્તર્યામિણૌ શાસ્ત્રગમ્યત્વેન પ્રતિષ્ઠિતૌ ।
અપ્રતિષ્ઠિતતર્કેણ ગમ્યમાર્તમતોઽપરમ્ ॥ ૧૭.૨૩૪॥

અષ્ટમબ્રાહ્મણે બ્રહ્મતત્ત્વં સમ્યઙ્ નિરૂપ્યતે ।
સૂત્રમન્તર્યામિતા ચ યત્રોતપ્રોતતાં વ્રજેત્ ॥ ૧૭.૨૩૫॥

પૂર્વત્ર ગૌતમોઽપૃચ્છત્સૂત્રાન્તર્યામિવસ્તુની ।
ઓતપ્રોતાત્મતાં ગાર્ગી તયોરેવાત્ર પૃચ્છતિ ॥ ૧૭.૨૩૬॥

અણ્ડોર્ધ્વાઽધોમધ્યદેશાન્ કાલં ચ વ્યાપ્ય તિષ્ઠતિ ।
સૂત્રમિત્યાહુરાચાર્યા ઓતં પ્રોતં ચ કુત્રચિત્ ॥ ૧૭.૨૩૭॥

અણ્ડારમ્ભકભૂતાનાં ન પૃષ્ટા સૂત્ર ઓતતા ।
સૂત્રેણ વિધૃતં પૂર્વમિતિ પૂર્વત્ર નિર્ણયાત્ ॥ ૧૭.૨૩૮॥

તાર્કિકત્વનિવૃત્ત્યર્થમાચાર્યોક્તિમુદાહરત્ ।
નિઃશેષદેશકાલોક્ત્યા સૂત્રે સર્વાત્મતોદિતા ॥ ૧૭.૨૩૯॥

વ્યક્તં સર્વં સૂત્રરૂપમવ્યક્તે વ્યોમસંજ્ઞકે ।
ઓતં પ્રોતં ચ વિદ્ધીતિ પ્રાહ પૃષ્ટમનૂદ્ય સઃ ॥ ૧૭.૨૪૦॥

દેશકાલૌ ચ સૂત્રેઽતર્ભૂતૌ દેશાત્મકં તતઃ ।
વિયન્નાકાશમત્રેતિ સૂચનાયાનુવાદગીઃ ॥ ૧૭.૨૪૧॥

બોદ્ધું બોધયિતું ચૈતદવ્યક્તં દુઃશકન્ત્વિતિ ।
વિસ્મિતા પ્રણનામાસૌ તમવ્યાકૃતવાદિનમ્ ॥ ૧૭.૨૪૨॥

ભૂયોઽપિ પૃષ્ટમપ્રાક્ષીત્પ્રધાનાદિષુ શઙ્કયા ।
પ્રધાનાદીન્ જગદ્ધેતૂન્વાદિનઃ સ્થાપયન્તિ હિ ॥ ૧૭.૨૪૩॥

સાવધારણમાકાશં એવેત્યન્યનિવૃત્તયે ।
આહોત્તરં મૂર્ધપાતં સૂચયંસ્તર્કનિર્ણયે ॥ ૧૭.૨૪૪॥

યદ્વા તન્તુષ્વિવ પટઃ સૂત્રં બહુષુ સંસ્થિતમ્ ।
ઇત્યાશઙ્ક્ય પુનઃ પ્રશ્ન એવકારો બહુત્વનુત્ ॥ ૧૭.૨૪૫॥

કસ્મિન્ ખલ્વયમાકાશ ઓતઃ પ્રોતશ્ચ ઈર્યતામ્ ।
અનોતત્વે સ્વતન્ત્રત્વાત્પ્રધાનત્વં પ્રસજ્યતે ॥ ૧૭.૨૪૬॥

સૂક્ષ્મત્વાદુર્વચં સૂત્રં વ્યોમ સૂક્ષ્મતરં તતઃ ।
વ્યોમાશ્રયઃ સૂક્ષ્મતમો ન વાગ્ગોચરમેત્યતઃ ॥ ૧૭.૨૪૭॥

વક્તિ ચેન્નિગ્રહસ્થાનમવાચ્યસ્યોક્તિતો ભવેત્ ।
અનુક્તૌ વાદિતા હાનિરિતિ ગાર્ગ્યા વિવક્ષિતમ્ ॥ ૧૭.૨૪૮॥

ઉક્તદોષદ્વયાસ્પૃષ્ટં પ્રત્યુત્તરમભાષત ।
એતદ્વા અક્ષરં ગાર્ગિ પ્રાહુસ્તદ્બ્રાહ્મણા ઇતિ ॥ ૧૭.૨૪૯॥

એતચ્છબ્દેન તસ્યાહ પ્રત્યક્ત્વાત્સાક્ષિતામસૌ ।
પ્રત્યક્તયા તદૈકાત્મ્યં સ્વયમેવ પ્રતીયતામ્ ॥ ૧૭.૨૫૦॥

ન વ્યાવૃત્તં વિશેષેભ્યો નાનુવૃત્તં ચ ગોત્વવત્ ।
અવ્યાવૃત્તાનનુગતં ચૈતન્યં કેન વીક્ષ્યતામ્ ॥ ૧૭.૨૫૧॥

યસ્માત્પ્રસિદ્ધં નાસ્ત્યન્યત્પ્રસિદ્ધં યન્ન કસ્યચિત્ ।
સ્વપ્રભત્વાદસઙ્ગત્વાત્વૈશબ્દસ્તત્પ્રસિદ્ધયે ॥ ૧૭.૨૫૨॥

સાક્ષાદિત્યાદિતા પૂર્વં યોઽશનાયાદિના તથા ।
યત્નાદભિહિતઃ પ્રત્યક્તચ્છબ્દેન સ ગૃહ્યતે ॥ ૧૭.૨૫૩॥

ક્ષરાદ્વિરુદ્ધધર્મત્વાદક્ષરં બ્રહ્મ ભણ્યતે ।
કાર્યકારણરૂપં તુ નશ્વરં ક્ષરમુચ્યતે ॥ ૧૭.૨૫૪॥

ધ્વસ્તાત્માઽજ્ઞાનતત્કાર્યાઃ પ્રત્યગ્યાથાત્મ્યબોધતઃ ।
ત્યક્તસર્વૈષણા અત્ર બ્રાહ્મણા ઇતિ કીર્તિતાઃ ॥ ૧૭.૨૫૫॥

શાસ્ત્રૈકગમ્યતાસિદ્ધ્યૈ વદન્તીત્યભિધીયતે ।
બ્રાહ્મણાસ્તદ્વદન્તીતિ સ્વાપરાધનિષેધગીઃ ॥ ૧૭.૨૫૬॥

નાવાચ્યં વચ્મ્યહં કિન્તુ વદન્તિ ગુરવોઽખિલાઃ ।
ઇતિ વચ્મિ વચસ્તેન વાદિતાઽપિ ન હીયતે ॥ ૧૭.૨૫૭॥

ગુરવોઽપિ કથં પ્રાહુરવાચ્યમિતિ ચેચ્છૃણુ ।
સ્થૂલાદીનાં નિષેધેન લક્ષયન્ત્યક્ષરં બુધાઃ ॥ ૧૭.૨૫૮॥

અભાવશેષો નાશઙ્ક્યો નિષેધાવધિશેષણાત્ ।
નાભાવનિષ્ઠો લોકેઽપિ નિષેધઃ કિમુતાક્ષરે ॥ ૧૭.૨૫૯॥

અન્તર્યામિણિ બુદ્ધેઽથ સુશકમ્બોદ્ધુમક્ષરમ્ ।
પ્રશાસનેન લિઙ્ગેન સોઽન્તર્યામ્યેવ બુધ્યતામ્ ॥ ૧૭.૨૬૦॥

ઈશિતવ્યાર્થસમ્બન્ધાદન્તર્યામ્યેતમક્ષરમ્ ।
ચૈતન્યાભાસમોહાખ્યવર્ત્મનૈવ ન તુ સ્વતઃ ॥ ૧૭.૨૬૧॥

એતસ્ય વા અક્ષરસ્ય શાસને સત્યદો જગત્ ।

સ્યાદ્વ્યવસ્થિતમર્યાદં સૂર્યચન્દ્રાદિલક્ષણમ્ ॥ ૧૭.૨૬૨॥

વિવાદ્ગોચરાપન્ના યન્તૃપૂર્વા જગત્સ્થિતિઃ ।
વ્યવસ્થિતત્વાલ્લોકસ્ય રાજપૂર્વા સ્થિતિર્યથા ॥ ૧૭.૨૬૩॥

સૂર્યચન્દ્રૌ દ્યુભૂર્લોકો કાલો નદ્યો યથાયથમ્ ।
નિયમેન પ્રવર્તન્તે સા પ્રવૃત્તિર્વ્યવસ્થિતિઃ ॥ ૧૭.૨૬૪॥

ધને દાનેન નષ્ટેઽપિ તત્ફલપ્રદ ઈશ્વરઃ ।
યતોઽસ્તિ તેન દાતારં તં પ્રશંસન્તિ વૈદિકાઃ ॥ ૧૭.૨૬૫॥

નાપૂર્વં ફલદં તસ્મિન્માનાભાવાત્ફલં પુનઃ ।
ઈશાદપ્યુપપન્નત્વાન્નૈવાપૂર્વસ્ય કલ્પકમ્ ॥ ૧૭.૨૬૬॥

સેવ્યાદ્રાજ્ઞઃ ફલપ્રાપ્તિર્દૃશ્યતે ન ત્વપૂર્વતઃ ।
દાનાદિક્રિયયા સેવ્યાદીશાત્તદ્વત્ફલં ભવેત્ ॥ ૧૭.૨૬૭॥

દેવતા યાગકર્તારં પિતરઃ શ્રાદ્ધકારિણમ્ ।
નાપ્નુયુર્હવ્યકવ્યાર્થં યદિ ન સ્યાત્પ્રશાસિતા ॥ ૧૭.૨૬૮॥

હોમયાગતપાંસ્યજ્ઞૈર્બહુકૃત્વઃ કૃતાન્યપિ ।
વિનાશફલદાનીતિ શાસનં તત્પ્રશાસિતુઃ ॥ ૧૭.૨૬૯॥

અજ્ઞાનમાત્રતો બન્ધો જ્ઞાનમાત્રેણ મુક્તતા ।
ઇત્યાશ્ચર્યાણિ સર્વાણિ કલ્પયન્તીશ્વરાસ્તિતામ્ ॥ ૧૭.૨૭૦॥

વિવાદશઙ્કાપીશેઽસ્મિન્ન સમ્ભાવ્યેતિ દર્શયન્ ।
પ્રશાસનં લિઙ્ગરૂપં પ્રપઞ્ચિતમનેકશઃ ॥ ૧૭.૨૭૧॥

યદપ્રબોધાત્કાર્પણ્યં બ્રાહ્મણ્યં યત્પ્રબોધતઃ ।
તદક્ષરં પ્રબોદ્ધવ્યં યથોક્તેશ્વરવર્ત્મના ॥ ૧૭.૨૭૨॥

અક્ષરસ્ય પ્રશાસ્તૃત્વં સ્વમોહાભાસકલ્પિતમ્ ।
ન સ્વાભાવિકમિત્યેતદ્વક્ત્યદૃષ્ટાદિવાક્યતઃ ॥ ૧૭.૨૭૩॥

માગોચરાતિવર્તિત્વાદદૃષ્ટં સ્યાત્તદક્ષરમ્ ।
અભાવત્વનિષેધાર્થં દ્રષ્ટ્રક્ષરમિતીર્યતે ॥ ૧૭.૨૭૪॥

કૂટસ્થદૃક્ત્વં દ્રષ્ટૃત્વં ન દૃશ્યે દૃષ્ટિકર્તૃતા ।
ઓતપ્રોતગિરાઽશેષદૃશ્યવસ્તુનિરાકૃતેઃ ॥ ૧૭.૨૭૫॥

ઉક્તદ્રષ્ટ્રતિરેકેણ દૃશ્યં નાસ્તિ યથા તથા ।
જીવદ્રષ્ટૃનિષેધાર્થં નાન્યદિત્યાદ્યુદીરણમ્ ॥ ૧૭.૨૭૬॥

વિજાતીયસજાતીયસ્વન્તરનિષેધતઃ ।
કૂટસ્થમેકં ચૈતન્યં સિદ્ધં વસ્ત્વક્ષરં પરમ્ ॥ ૧૭.૨૭૭॥

એતસ્મિન્નક્ષરે ગાર્ગિ સ્રજિ ક્લૃપ્તફણીન્દ્રવત્ ।
ઓતઃપ્રોતશ્ચ નિઃશેષ આકાશઃ કારણાત્મકઃ ॥ ૧૭.૨૭૮॥

અક્ષરં સ્વાત્મસમ્મોહાત્કારણત્વં નિગચ્છતિ ।
તથા કાર્યત્વમપ્યેતન્નિરવદ્યં તદેકલમ્ ॥ ૧૭.૨૭૯॥

સર્વસ્યાક્ષરમાત્રત્વાત્કૃત્સ્નને જ્ઞેયસમાપ્તિતઃ ।
ન જ્ઞેયં શિષ્યતે કિઞ્ચિન્નાપ્યધ્યસ્તં તથા તમઃ ॥ ૧૭.૨૮૦॥

નવમબ્રાહ્મણે દેવનિર્ણયસ્તદુપાસનમ્ ।
અષ્ટધા પઞ્ચધા ચૌપનિષદશ્ચોચ્યતે ક્રમાત્ ॥ ૧૭.૨૮૧॥

સૂર્યચન્દ્રાદયો દેવાઃ શાસિતવ્યા ઉદીરિતાઃ ।
તેષાં વિસ્તાર આનન્ત્યં સઙ્ક્ષેપસ્ત્વેકદેવતા ॥ ૧૭.૨૮૨॥

ત્રયશ્ચેત્યાદિભિર્લક્ષ્યા બહુશબ્દૈરનન્તતા ।
સુષુપ્તિપ્રલયાવસ્થઃ કારણાત્મૈકદેવતા ॥ ૧૭.૨૮૩॥

નાનાત્વૈકત્વરૂપાભ્યાં તિષ્ઠતિ પ્રાણદેવતા ।
નિયન્તવ્યનિયન્તૃત્વસમ્બન્ધસ્ય પ્રસિદ્ધયે ॥ ૧૭.૨૮૪॥

પૃથિવ્યેવેત્યાદિવાક્યાદષ્ટધોપાસનેરિતા ।
કિં દેવેત્યાદિવાક્યેન પઞ્ચધોપાસનં શ્રુતમ્ ॥ ૧૭.૨૮૫॥

એતાવદેવ શાકલ્યો વેત્તિ માયામયં તુ તત્ ।
યાજ્ઞવલ્ક્યઃ સ ઇત્યાદિવસ્ત્વનૂદ્યાથ પૃષ્ટવાન્ ॥ ૧૭.૨૮૬॥

દેવવિસ્તારસઙ્ક્ષેપાવષ્ટધા પઞ્ચધા ચ યત્ ।
ઉપાસ્યમુક્તં તત્સર્વં નેતિ નેતીત્યપોહ્યતે ॥ ૧૭.૨૮૭॥

ઇતિશબ્દેન નિર્દિષ્ટે દૃશ્યે તસ્મિન્નપોહિતે ।
યોઽવશિષ્ટઃ સ આત્માસ્ય દૃશ્યસ્યાત્મવતો મતઃ ॥ ૧૭.૨૮૮॥

આત્માત્મવત્વસમ્બન્ધો નાન્યો દૃગ્દૃશ્યયોરિતિ ।
મત્વાત્મશબ્દો દૃગ્વસ્તુન્યવાચ્યેઽપિ પ્રયુજ્યતે ॥ ૧૭.૨૮૯॥

નનુ બ્રહ્માધિકારેઽસ્મિન્ કથમાત્મેતિ વર્ણ્યતે ।
નૈષ દોષોઽતિરેકેણ નાત્મનો બ્રહ્મતા યતઃ ॥ ૧૭.૨૯૦॥

ગ્રાહ્યત્વં શીર્ણતા સઙ્ગો બન્ધો ભીતિશ્ચ હિંસનમ્ ।
જાડ્યાજ્જડસ્ય ધર્માઃ સ્યુર્ન તે સન્ત્યાત્મવસ્તુનિ ॥ ૧૭.૨૯૧॥

કાર્યધર્માનતીત્યૈતાંસ્તદ્ધેત્વજ્ઞાનનિહ્નુતેઃ ।
અપૂર્વોઽનપરઃ પૂર્ણ આત્મા સ્વાત્મન્યવસ્થિતઃ ॥ ૧૭.૨૯૨॥

ઇતિ તત્ત્વમનૂદ્યાસ્ય સૃષ્ટિસંહારહેતુતામ્ ।
તથૈવોપનિષદ્વેદ્યમસઙ્ગત્વં ચ પૃષ્ટવાન્ ॥ ૧૭.૨૯૩॥

આત્મા નિરૂહ્ય પ્રત્યૂહ્ય પુરુષાન્યોઽત્યવર્તત ।
તમૌપનિષદં બ્રૂહિ મૂર્ધપાતં તુ તેઽન્યથા ॥ ૧૭.૨૯૪॥

યોઽનૂદિતો નેતિ નેતિ સચ્ચિન્માત્રો હ્યવિક્રિયઃ ।
ઉક્તૌ પુરુષનિર્વાહપ્રતિવાહૌ તુ માયિકૌ ॥ ૧૭.૨૯૫॥

સૃષ્ટિરષ્ટવિધોપાસ્યરૂપા નિર્વાહ ઉચ્યતે ।
પ્રતિવાહસ્તુ સંહારો દિગ્દેવદ્વારતો હૃદિ ॥ ૧૭.૨૯૬॥

વસ્તુવૃત્તેન નિઃશેષકાર્યકારણવર્જનમ્ ।
તસ્યાતિક્રાન્તિરુદ્દિષ્ટા સ ચોપનિષદિ શ્રુતઃ ॥ ૧૭.૨૯૭॥

કર્મકાણ્ડે વિરોધિત્વાન્નૈવાયં શ્રૂયતે ક્વચિત્ ।
ઐકાત્મ્યવસ્તુવિજ્ઞાનં કર્મભિર્હિ વિરુદ્ધ્યતે ॥ ૧૭.૨૯૮॥

ય ઔપનિષદસ્તસ્ય વિજ્ઞાનાનન્દરૂપતા ।
દાતૃતાભોગમુક્ત્યોશ્ચ વક્તવ્યેત્યુત્તરા શ્રુતિઃ ॥ ૧૭.૨૯૯॥

મહાપ્રલયસમ્પત્તૌ જગતઃ પુનરુદ્ભવે ।
કારણં પૃચ્છ્યતે વૃક્ષસર્વસાધર્મ્યપૂર્વકમ્ ॥ ૧૭.૩૦૦॥

વૃક્ષઃકાણ્ડરુહો બીજરુહો ચેતિ દ્વિધા તયોઃ ।
સમઃ કાણ્ડરુહેણૈષ રેતસો યોઽભિજાયતે ॥ ૧૭.૩૦૧॥

ન પૃચ્છ્યતેઽતિસ્પષ્ટત્વાત્તદવાન્તરકારણમ્ ।
કિન્ત્વસ્પષ્ટમશેષસ્ય પૃચ્છ્યતે મૂલકારણમ્ ॥ ૧૭.૩૦૨॥

અન્વયવ્યતિરેકાભ્યાં બીજાખ્યાત્મૂલકારણાત્ ।

દૃષ્ટા વૃક્ષજનિસ્તદ્વત્કસ્માન્મૂલાજ્જગજ્જનિઃ ॥ ૧૭.૩૦૩॥

નિત્યજાતસ્વભાવત્વં ન મન્તવ્યં મૃતો યતઃ ।
પુનઃ પુનર્જાયતે સ્યાત્કૃતનાશાદિરન્યથા ॥ ૧૭.૩૦૪॥

કોઽન્વેનં જનયેન્મર્ત્યમિત્યુક્ત્વા ન વિદુર્દ્વિજાઃ ।
જિત્વા તાન્યાજ્ઞવલ્ક્યસ્તુ ગોસહસ્રં ગૃહીતવાન્ ॥ ૧૭.૩૦૫॥

મુનિપૃષ્ટં જગન્મૂલં મુમુક્ષ્વનુજિઘૃક્ષયા ।
આહ વિજ્ઞાનમાનન્દં બ્રહ્મેતિ શ્રુતિરાદરાત્ ॥ ૧૭.૩૦૬॥

વિજ્ઞાનમિતિ ચૈતન્યં ન ક્રિયા નાપિ તત્ફલમ્ ।
ન કારકં ન ચાભાવઃ ક્રિયાદેઃ કિન્તુ ભાસકમ્ ॥ ૧૭.૩૦૭॥

નિર્ધૂતાશેષદુઃખૌઘહેતુત્વાત્સુખમેવ તત્ ।
અથૈષ પરમાનન્દો યો વૈ ભૂમેતિ શાસ્ત્રતઃ ॥ ૧૭.૩૦૮॥

અવ્યાવૃત્તાનનુગતભાસ્વદ્વિજ્ઞાનમાત્રતઃ ।
નિરવદ્યાન્વયત્વાત્તત્સાક્ષાદ્બ્રહ્મેતિ ભણ્યતે ॥ ૧૭.૩૦૯॥

તદેવાઽવિદ્યયા શક્ત્યા ભોગમોક્ષપ્રદાતૃ હિ ।
અનુગૃહ્ણાતુ તદ્ભૂયો વિદ્યાતીર્થમહેશ્વરઃ ॥ ૧૭.૩૧૦॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
આશ્વલાયનાદિમુનિબોધાખ્યો નામ સપ્તદશોઽધ્યાયઃ ॥ ૧૭॥

## ૧૮. જનકવિદ્યાપ્રકાશો નામાષ્ટાદશોઽધ્યાયઃ ।

ષષ્ઠાધ્યાયે યાજ્ઞવલ્ક્યો જનકાયોપદિષ્ટવાન્ ।
ઉપસ્તિં તત્ત્વવિદ્યાં તુ સઙ્ગ્રહાદ્વિસ્તરાદપિ ॥ ૧૮.૧॥

ધ્યાનાદિહૈવ દેવઃ સન્મૃત્વા દેવત્વમાપ્નુયાત્ ।
પ્રથમબ્રાહ્મણે પ્રોક્તં ચતુષ્પાદ્બ્રહ્મચિન્તનમ્ ॥ ૧૮.૨॥

વાગાદ્યા દેવતાસ્તાસામાધારસ્તત્તદિન્દ્રિયમ્ ।
અવ્યાકૃતં ચ નામેતિ પાદાશ્ચત્વાર ઈરિતાઃ ॥ ૧૮.૩॥

અસમાપ્તેઃ પુમર્થસ્ય ન મુખ્યમનુશાસનમ્ ।
તદ્દત્તાં યાજ્ઞવલ્ક્યોઽતો નાગ્રહીદ્ગુરુદક્ષિણામ્ ॥ ૧૮.૪॥

દ્વિતીયે બ્રાહ્મણે જાગ્રત્સ્વપ્નસુપ્તિમુખાન્નિજમ્ ।
આત્માનં શાસ્ત્યતો રાજા યથાવિધ્યુપસન્નવાન્ ॥ ૧૮.૫॥

ઉક્તોપાસનતઃ પ્રાપ્યો દેવભાવઃ પુરોદિતઃ ।
દેવત્વાન્મુચ્યમાનેન પ્રાપ્યં પૃચ્છત્યસૌ મુનિઃ ॥ ૧૮.૬॥

ગન્તવ્યં તુ ન જાનામીત્યવિદ્યાં સ્વાત્મનિ સ્થિતામ્ ।
પ્રકટીકુર્વતો રાજ્ઞ ઇન્ધતત્ત્વમુપાદિશત્ ॥ ૧૮.૭॥

ઇન્ધતેઽહર્નિશં યસ્માદિન્ધનામા તતઃ પુમાન્ ।
વીર્યવદ્દક્ષિણં ચક્ષુઃ શ્રૌતો વાતિશયોઽત્ર હિ ॥ ૧૮.૮॥

પરોક્ષનામવ્યાજેન પરમૈશ્વર્યવાચિનમ્ ।
ઇન્ધશબ્દં પ્રયુઞ્જાન ઇન્ધસ્યાહેશ્વરાત્મતામ્ ॥ ૧૮.૯॥

દક્ષિણાક્ષિણિ ચૈતન્યં પુરુષો વામચક્ષુષિ ।
ચૈતન્યં સ્ત્રીતિ ભેદોઽયં કલ્પ્યતે સુખબુદ્ધયે ॥ ૧૮.૧૦॥

ઉક્તા જાગ્રદવસ્થૈવમિન્દ્રિયવ્યવહારકૃત્ ।
દમ્પત્યોઃ સઙ્ગમઃ સ્વપ્નો હાર્દાકાશેઽથ ભણ્યતે ॥ ૧૮.૧૧॥

સમ્ભૂયસ્તુતિરત્રેતિ સંસ્તાવો હૃદયે સુષિઃ ।
અનિષ્ટાન્નરસો રક્તપિણ્ડો યઃ સોઽન્નમેતયોઃ ॥ ૧૮.૧૨॥

હૃદ્યન્તઃ શતનાડીનાં પુઞ્જં પ્રાવરણં વિદુઃ ।
સ્વપ્નાજ્જાગરણપ્રાપ્ત્યૈ માર્ગો નાડ્યૂર્ધ્વગામિની ॥ ૧૮.૧૩॥

યસ્માદન્નરસઃ કેશસહસ્રાંશેન સમ્મિતૈઃ ।
નાડીભેદૈઃ સ્વપ્નદૃશ્યં યાતિ સૂક્ષ્મતરસ્તતઃ ॥ ૧૮.૧૪॥

સ્વપ્નાવસ્થા સમાપ્તાથ તસ્ય પ્રાચીતિ વાક્યતઃ ।
સુષુપ્તિરુચ્યતે તત્ર યુક્તા સર્વદિગાત્મતા ॥ ૧૮.૧૫॥

સાશ્રયૈઃ કરણૈર્હીનો ગ્રસ્તાધ્યાત્માધિદૈવતઃ ।
સુષુપ્તાવેક એવાસ્તે પ્રજ્ઞાનઘનવિગ્રહઃ ॥ ૧૮.૧૬॥

ઇન્ધતૈજસસૌષુપ્તૈર્વિરાટ્સૂત્રેશ્વરા અપિ ।
સંલક્ષિતા અથૈતેષાં તત્ત્વમાત્મોપદિશ્યતે ॥ ૧૮.૧૭॥

વિરાડિન્ધાદિભિર્ભેદૈરભિન્નો યોઽવભાસતે ।
સ એષ નેતિ નેત્યાત્મા ન કાર્યં નાપિ કારણમ્ ॥ ૧૮.૧૮॥

તેનૈવ જ્ઞાત્મનાશેષં તદ્ધ્વાન્તં ધ્વાન્તજં તથા । (ધ્વાન્તજં તત્તથા જગત્)
જગ્ધ્વા નેત્યાત્મના વિદ્વાન્ પૂર્ણદૃષ્ટ્યાવશિષ્યતે ॥ ૧૮.૧૯ ॥

ગન્તવ્યમુપદિશ્યૈવં પ્રાપ્તોઽસ્યભયમિત્યૃષિઃ ।
ઊચે બોધસ્તતઃ પ્રાપ્તઃ પ્રાપ્સ્યસીત્યન્યથા વદેત્ ॥ ૧૮.૨૦ ॥

જ્ઞાનેન સદૃશીમન્યામપશ્યન્ ગુરુદક્ષિણામ્ ।
અભયં ત્વેતિ વચસા દક્ષિણામાશિષં દદૌ ॥ ૧૮.૨૧ ॥

ઉત્તમા દક્ષિણૈષાશીર્મધ્યમા તુ નમસ્ક્રિયા ।
સ્વભૂમિવપુષોર્દાનં વિત્તશાઠ્યનિવૃત્તયે ॥ ૧૮.૨૨ ॥

તૃતીયબ્રાહ્મણે સ્વપ્નસુષુપ્ત્યોરતિવિસ્તૃતિઃ ।
ક્રિયતે તૌ (ક્રિયતેઽતૌ) હિ દૃષ્ટાન્તૌ પરલોકવિમોક્ષયોઃ ॥ ૧૮.૨૩ ॥

દેહાદિવ્યતિરિક્તત્વં સ્વપ્રભત્વમસઙ્ગતા ।
સ્વપ્નપ્રસઙ્ગતસ્ત્વૈતત્ત્રયમત્ર પ્રપઞ્ચ્યતે ॥ ૧૮.૨૪ ॥

અદ્વૈતત્વં દૃષ્ટ્યલોપ આનન્દૈકસ્વભાવતા ।
ઇદં ત્રયં સુષુપ્તસ્ય પ્રસઙ્ગેનોપપાદ્યતે ॥ ૧૮.૨૫ ॥

વરદાનેન સંવાદમિચ્છન્તં તમશઙ્કયા ।
આદૌ રાજેષ્ટમપ્રાક્ષીત્પ્રત્યગ્જ્યોતિર્બુભુત્સયા ॥ ૧૮.૨૬ ॥

દેહેન્દ્રિયાદિસઙ્ઘાતઃ પુમાન્ કિં જ્યોતિરુચ્યતામ્ ।
ઉપવેશનગત્યાદિ ન યુક્તં જ્યોતિષા વિના ॥ ૧૮.૨૭ ॥

કિં સઙ્ઘાતગતં જ્યોતિઃ કિં વા સઙ્ઘાતિરેકિ તત્ ।
અતિરિક્તત્વમાદત્તે આદિત્યાદેરુદાહૃતેઃ ॥ ૧૮.૨૮ ॥

રવિસોમાગ્નિશબ્દાદિજ્યોતીંષ્યુક્તાનિ જાગરે ।
નિદર્શનતયા જ્યોતિસ્તૈઃ સ્વપ્નેઽપ્યનુમીયતામ્ ॥ ૧૮.૨૯ ॥

સ્વપ્ને દેહવ્યવહૃતિર્ભિન્નજ્યોતિઃ (સ્વપ્નદેહ) પુરઃસરા ।
વ્યવહારત્વતો જાગ્રદ્વ્યવહારો યથા તથા ॥ ૧૮.૩૦ ॥

સુપ્તૌ ચ પુનરુત્થાનવ્યવહારસ્ય કારણમ્ ।
અસ્તિ જ્યોતિરિતિ જ્ઞાત્વા તદ્વિશેષં સ પૃષ્ટવાન્ ॥ ૧૮.૩૧ ॥

સ્વપ્રકાશસ્વરૂપત્વાત્તદ્વિશેષો હ્યતિસ્ફુટઃ ।

તથાપ્યવિદ્યયાચ્છન્નઃ સોઽસ્પષ્ટ ઇવ વર્તતે ॥ ૧૮.૩૨॥

એતાદૃશ્યા અવિદ્યાયા વિચારેણ નિવૃત્તયે ।
આત્મૈવ જ્યોતિરસ્યેતિ પ્રાહ સ્વપ્નાવભાસકમ્ ॥ ૧૮.૩૩॥

ભાસ્યં સ્વપ્નસુષુપ્ત્યાદિ યસ્મિન્ ભાને પ્રકલ્પિતમ્ ।
તદ્ભાનં તત્સ્વરૂપત્વાદાત્મશબ્દેન ભણ્યતે ॥ ૧૮.૩૪॥

આત્માવિદ્યાં તદુત્થં વા પરાગ્ધીરવગાહતે ।
પ્રત્યગ્બુધ્યાવગાહ્યોઽતઃ આત્માઽહં ભામિ કેવલઃ ॥ ૧૮.૩૫॥

આત્મૈવેત્યેવકારેણ સ્વપ્નદૃશ્યેષ્વનાત્મસુ ।
જ્યોતિષ્ટ્વશઙ્કા વ્યાવૃત્તા વાસનામયવસ્તુષુ ॥ ૧૮.૩૬॥

અસ્યેતિ વાસનારૂપો દૃશ્યો દેહાદિરુચ્યતે ।
ભાસ્યભાસકસમ્બન્ધઃ ષષ્ઠ્યોક્તો વાસનાત્મનોઃ ॥ ૧૮.૩૭॥

જ્યોતિષ્ટ્વમ્ભાસકત્વં સ્યાચ્ચિદાભાસમુખેન તત્ ।
ઉપપન્નમસઙ્ગસ્ય ભાન્વાદિવદનુગ્રહાત્ ॥ ૧૮.૩૮॥

ભાન્વાદયઃ પ્રભાદ્વારા ચક્ષુરાદ્યનુગૃહ્ણતે ।
તથૈવાત્માનુગૃહ્ણાતિ ચિદાભાસેન શેમુષીમ્ ॥ ૧૮.૩૯॥

અવિદ્યાન્વયવદ્બુદ્ધેશ્ચિદાભાસાન્વયસ્સદા (વયસ્તથા) ।
અસ્તિ તદ્વ્યતિરેકેણ બુદ્ધેઃ પરિણતિર્વૃથા ॥ ૧૮.૪૦॥

ચિદાભાસવિહીનસ્ય ચિત્તસ્ય પરિણામતઃ ।
ન કિઞ્ચિદ્ભાસતે વસ્તુ સાભાસા ધીસ્તતઃ સદા ॥ ૧૮.૪૧॥

સાભાસપરિણામેન દુઃખ્યસ્મીત્યપિ ધીર્ભવેત્ ।
તથા સાભાસમજ્ઞાનં ન વેદ્મીત્યનુભૂયતે ॥ ૧૮.૪૨॥

અન્યથાત્મનિ કૌટસ્થ્યાદ્બુદ્ધૌ ચૈતન્યવર્જનાત્ ।
સર્વોઽપિ વ્યવહારઃ સ્યાતન્ધકારપ્રનૃત્યવત્ (પ્રવૃત્તવત્) ॥ ૧૮.૪૩॥

ચિદાભાસાનુગ્રહોઽત્ર જ્યોતિષ્ટ્વમ્ભાનુવન્મતમ્ ।
ન તુ રવ્યાદિવચ્ચક્ષુર્ગ્રાહ્યભાસ્વરરૂપતા ॥ ૧૮.૪૪॥

આદિત્યાદિરનાત્માર્થઃ સિધ્યત્યક્ષાદિમાનતઃ ।
માત્રાદિસિદ્ધિદસ્યાસ્ય સ્વતઃસિદ્ધેર્ન મેયતા ॥ ૧૮.૪૫॥

નાપ્રમેયત્વમાત્રેણ શશશૃઙ્ગાદિતુલ્યતા ।
અનન્યાનુભવેનાસ્ય વિશદં સ્ફુરણં યતઃ ॥ ૧૮.૪૬॥

સ્યાત્સ્વપ્રવ્યવહારોઽયમાત્મના જ્યોતિષા દૃશા ।
દેહાદિવ્યતિરિક્તત્વમેવં સિદ્ધં ચિદાત્મનઃ ॥ ૧૮.૪૭॥

આત્મૈવાસ્યેતિ દેહાદેઃ સ્વરૂપત્વેન ચિચ્છ્રુતા ।
ચિતો દેહાદિભેદોઽપિ ભાન્વાદિવદુદીરિતઃ ॥ ૧૮.૪૮॥

પૂર્વોત્તરવિરુદ્ધાર્થં મત્વા પપ્રચ્છ ભૂપતિઃ ।
બહવોઽર્થાઃ સમીક્ષ્યન્તે આત્માઽત્ર કતમો વદ ॥ ૧૮.૪૯॥

પિણ્ડસ્તાવદિહૈકોઽર્થો દ્વિતીયો લિઙ્ગસંજ્ઞિતઃ ।
ચિદ્બિમ્બિતાઽવધિશ્ચાન્યશ્ચતુર્થો નેતિ નેતિ યઃ ॥ ૧૮.૫૦॥

દેહાદિભેદમાશ્રિત્ય યોઽયમિત્યુત્તરં જગૌ ।
અધિષ્ઠાનારોપ્યભાવ આત્માસ્યેતિ વિવક્ષિતઃ ॥ ૧૮.૫૧॥

વિચારદૃષ્ટ્યાઽધિષ્ઠાનમેવાત્માધ્યસ્તવસ્તુનઃ । (અસ્યાધ્યસ્તવસ્તુનઃ)
તથાપિ જાડ્યચૈતન્યભેદોઽપ્યસ્તીહ લોકતઃ ॥ ૧૮.૫૨॥

એવં સત્યવિરોધઃ સ્યાદ્ભેદાભેદાર્થવાચ્યયોઃ ।
યોઽયમિત્યુત્તરે શબ્દદ્વયમેવં વિવિચ્યતામ્ ॥ ૧૮.૫૩॥

યઃ પૃષ્ટઃ સ્વપરાગ્વૃત્તિપ્રમામેયાતિલઙ્ઘિતઃ ।
પ્રત્યઙ્મુખેન માનેન ત્વયમિત્યુપદિશ્યતે ॥ ૧૮.૫૪॥

પરાગ્ચીતિ ચ મન્ત્રોક્તિઃ સાક્ષાદાત્મેતિ ચ શ્રુતિઃ ।
પરાઙ્માનપ્રમેયત્વમાત્મનો વિન્યવારયત્ ॥ ૧૮.૫૫॥

કુમ્ભકારેણ કુમ્ભાર્થો યથા પ્રત્યક્ષ ઈક્ષ્યતે ।
વિજ્ઞાનેન તથા પ્રત્યઙ્ઙાત્માકારેણ ગૃહ્યતે ॥ ૧૮.૫૬॥

અયમિત્યભિધાયોગ્યો લોકે દેહોઽપિ વીક્ષ્યતે ।
વિજ્ઞાનમય ઇત્યુક્ત્યા સ્થૂલદેહો નિવર્ત્યતે ॥ ૧૮.૫૭॥

વિજ્ઞાયતેઽનેન સર્વમિતિ વિજ્ઞાનશબ્દતઃ ।
ધીરુક્તા તન્મયત્વં તુ તત્પ્રાચુર્યં વિવક્ષિતમ્ ॥ ૧૮.૫૮॥

આચખ્યુર્મયટં કેચિત્વિકારાર્થે ન તચ્છ્રુતમ્ ।
અનિર્મોક્ષો વિકારાર્થે પ્રાયોઽર્થસ્તૂપપદ્યતે ॥ ૧૮.૫૯॥

બુદ્ધિવિજ્ઞાનસમ્પૃક્તશ્ચન્દ્રસંસક્તરાહુવત્ ।
પ્રમીયતે તતઃ પ્રત્યગ્વિજ્ઞાનમય ઉચ્યતે ॥ ૧૮.૬૦॥

દ્રષ્ટૃત્વાદ્યભિસમ્બન્ધોઽકારકસ્યાપિ સર્વદા ।
ધીવિજ્ઞાનકૃતોઽતોઽપિ વિજ્ઞાનમય ઉચ્યતે ॥ ૧૮.૬૧॥

સર્વાર્થકારણં બુદ્ધિઃ દ્વારમાત્રં તતોઽપરમ્ ।
ઇન્દ્રિયં તન્મયસ્તસ્માચ્ચિદાભાસૈકવર્ત્મના ॥ ૧૮.૬૨॥

પ્રાણબુદ્ધ્યવિનાભૂતા ઇતિ પ્રાણમયોઽપ્યતઃ ।
પ્રાણાત્મવાદઃ સમ્પ્રાપ્તઃ પ્રાણેષ્વિતિ નિવાર્યતે ॥ ૧૮.૬૩॥

દશેન્દ્રિયાણિ મરુતઃ પઞ્ચ ચ પ્રાણશબ્દિતાઃ ।
પ્રાણેષુ યોઽર્થોઽનુગતઃ સ આત્મેત્યવધાર્યતામ્ ॥ ૧૮.૬૪॥

ધીરેવાત્મેત્યપાકર્તું હૃદીતિ શ્રુતિરભ્યધાત્ ।
સ્વાર્થબુદ્ધૌ ય આભાતિ સ આત્મા બુદ્ધિવૃત્તિદૃક્ ॥ ૧૮.૬૫॥

હૃદીત્યાધારનિર્દેશાદ્ધીસ્થવૃત્તિષુ ચાત્મતા ।
પ્રસક્તા તન્નિવૃત્ત્યર્થમન્તરિત્યુપદિશ્યતે ॥ ૧૮.૬૬॥

પરાગર્થાનુસારિણ્યો યતો ધીવૃત્તયસ્તતઃ ।
પ્રત્યક્ત્વવાચકેનાન્તઃશબ્દેનૈવ નિવર્તિતાઃ ॥ ૧૮.૬૭॥

જાડ્યમાત્મન ઇચ્છન્તિ કણભુઙ્મતજીવિનઃ ।
તેષાં વિપ્રતિષેધાર્થં જ્યોતિરિત્યભિધીયતે ॥ ૧૮.૬૮॥

જડબુધ્યાદ્યુપાદાનં તમસ્તસ્યાવભાસકમ્ ।
સકૃદ્વિભાતં ચિન્માત્રં જ્યોતિરાત્મેતિ ભણ્યતે ॥ ૧૮.૬૯॥

અચેતનોઽપિ બુદ્ધ્યાદિશ્ચેતનાવાનિવેક્ષ્યતે ।
યસ્ય સન્નિધિતસ્તસ્ય ચિજ્જ્યોતિષ્ટ્વમિતિ સ્ફુટમ્ ॥ ૧૮.૭૦॥

આત્મચ્છાયં પયોઽશેષં યથા મારકતો મણિઃ ।
પરીક્ષણાય પ્રક્ષિપ્તઃ કુર્યાદાત્મા તથૈવ હિ ॥ ૧૮.૭૧॥

જ્યોતિરાત્મા ચિતિચ્છાયં પ્રથમં કુરુતે તમઃ ।
તમોયોગેન ધીસ્તદ્વદ્ધીયોગાદિન્દ્રિયં તથા ॥ ૧૮.૭૨॥

અક્ષયોગાત્તથા દેહ એવમેતે ચિદાત્મવત્ ।

ભાસન્તે તેષ્વતઃ પુંસાં પ્રત્યગાત્મત્વવિભ્રમઃ ॥ ૧૮.૭૩॥

તમેવ ભાન્તમાત્માનમનુભાત્યખિલં જગત્ ।
ઇતિ શ્રુત્યન્તરે સ્પષ્ટમુક્તં જ્યોતિષ્ટ્વમાત્મનઃ ॥ ૧૮.૭૪॥

આત્મેત્યેવં પ્રબુદ્ધેઽસ્મિન્ જ્યોતિષિ ધ્વાન્તનાશતઃ ।
સર્વસ્યૈવાત્મયાથાત્મ્યાદાત્મા પુરુષ ઉચ્યતે ॥ ૧૮.૭૫॥

આત્માજ્ઞાનસમુચ્છિત્તૌ તજ્જસ્ય ન હિ વસ્તુનઃ ।
પ્રત્યગ્રૂપાત્પૃથગ્ભૂતં સમ્ભાવ્યં કેનચિત્ક્વચિત્ ॥ ૧૮.૭૬॥

પૂર્ણત્વાત્પુરુષઃ સોઽયં જ્યોતિરાત્મેતિ ભણ્યતે ।
પૂર્ણસ્ય લોકસઞ્ચારઃ કથં સ્યાદિતિ ભણ્યતામ્ ॥ ૧૮.૭૭॥

યઃ પૂર્ણઃ સ સમાનઃ સન્ બુદ્ધ્યા લોકાવુભાવપિ ।
સમ્પ્રાપ્તપ્રતિપત્તવ્યાવનુસઞ્ચરતિ ક્રમાત્ ॥ ૧૮.૭૮॥

કિં પુનઃ સ્યાત્સમાનત્વમાત્મબુદ્ધ્યોસ્તદુચ્યતે ।
વિવેકાનુપલમ્ભેન તાદાત્મ્યં રજ્જુસર્પવત્ ॥ ૧૮.૭૯॥

સમ એવ ધિયા લોકૌ સઞ્ચરત્યેષ ન સ્વતઃ ।
અતઃ સંસારમિથ્યાત્વં ધ્યાયતીવેતિ વર્ણ્યતે ॥ ૧૮.૮૦॥

ધ્યાયન્ત્યાં ધ્યાયતીવાત્મા ચલન્ત્યાં ચલતીવ ચ ।
બુદ્ધિસ્થે ધ્યાનચલને કલ્પ્યેતે બુદ્ધિસાક્ષિણિ ॥ ૧૮.૮૧॥

આલોકે વ્યઞ્જકે યદ્વદભિવ્યઙ્ગ્યઘટાકૃતિઃ ।
આરોપ્યતે તથા બૌદ્ધઃ સંસારો બુદ્ધિસાક્ષિણિ ॥ ૧૮.૮૨॥

ધ્યાનાદીનામવસ્તુત્વે સ હિ સ્વપ્ન ઇતિ શ્રુતિઃ ।
હેતુમાહ સ આત્માયં સ્વપ્નો ભવતિ ધીવશાત્ ॥ ૧૮.૮૩॥

બુદ્ધિજાગરણે યદ્વજ્જાગર્મીત્યભિમન્યતે ।
બુદ્ધિઃ સ્વપ્ને તથા સ્વપ્નરૂપત્વમભિમન્યતે ॥ ૧૮.૮૪॥

જાગ્રદ્ભોગમિમં લોકં સ્વપ્નો ભૂત્વાતિવર્તતે ।
વાસનારાશિસાક્ષિત્વં સ્વપ્નં ભોગં તદાપ્નુયાત્ ॥ ૧૮.૮૫॥

અવિદ્યાકામકર્માખ્યમૃત્યો રૂપાણ્યતીત્ય સઃ ।
જાગ્રદ્દેહેન્દ્રિયાદીનિ તિષ્ઠતિ જ્યોતિરાત્મના ॥ ૧૮.૮૬॥

તસ્માત્સ્વાભાવિકો નૈવ ક્રિયાધ્યાનાદિલક્ષણઃ ।
લોકદ્વયાનુસઞ્ચારઃ કિન્ત્વૌપાધિક ઇષ્યતામ્ ॥ ૧૮.૮૭॥

જાગ્રદ્દેહાદિકં મૃત્યોઃ રૂપં સ્વપ્નેઽતિવર્તતામ્ ।
ન જન્માન્તર ઇત્યેવમાશઙ્ક્યોક્તં સ વ ઇતિ ॥ ૧૮.૮૮॥

યુજ્યતે જાયમાનઃ સન્દુઃખૈરાત્મૈષ ઐહિકૈઃ ।
મૃતો વિયુજ્યતે ભાવિજન્મસ્વપ્નસમં તતઃ ॥ ૧૮.૮૯॥

જન્માત્ર નાસતઃ સત્ત્વં કિન્તુ દેહેન સંયુતિઃ ।
પ્રાદુર્ભાવો જનેરર્થઃ સત એવ સ યુજ્યતે ॥ ૧૮.૯૦॥

મૃતિઃ પ્રાણવિયોગઃ સ્યાન્ન તુ નાશઃ સતો મતઃ ।
મૃઙ્ પ્રાણત્યાગ ઇત્યુક્તં સ્વયં નષ્ટઃ કથં ત્યજેત્ ॥ ૧૮.૯૧॥

ઇમં લોકં પરં ચાયં જાગ્રત્સ્વપ્નપ્રવાહવત્ ।
સદા ભજતિ તેનાસ્ય સિદ્ધા દેહાદિભિન્નતા ॥ ૧૮.૯૨॥

લોકાયતાઃ પરં લોકં નેચ્છન્ત્યન્યે તુ મન્વતે ।
ત્રીઁલ્લોકાન્ સ્વપ્નસંયુક્તાઁસ્તતસ્તસ્યેતિ વક્ત્યસૌ ॥ ૧૮.૯૩॥

અયોગં પરલોકસ્ય વારયત્યેવકારતઃ ।
સન્ધ્યત્વેન તૃતીયત્વં સ્વપ્નલોકસ્ય વાર્યતે ॥ ૧૮.૯૪॥

ભોગભાવાત્તૃતીયત્વમુચ્યતે ચેત્તથોચ્યતામ્ ।
વસ્તુતો ન તૃતીયત્વં ધર્માધર્મપ્રસઙ્ગતઃ ॥ ૧૮.૯૫॥

દેશયોરુભયોઃ સન્ધિર્ન હિ દેશાન્તરં યથા ।
લોકયોરુભયોઃ સન્ધિસ્તથા લોકાન્તરં ન હિ ॥ ૧૮.૯૬॥

ઇમં લોકમિવ સ્વપ્ને પરલોકં સ પશ્યતિ ।
અતઃ પ્રત્યક્ષતોઽસ્તિત્વં પરલોકસ્ય ગમ્યતામ્ ॥ ૧૮.૯૭॥

અતીતજન્મવૃત્તાન્તં બાલ્યે પ્રાયેણ પશ્યતિ ।
ઐહિકં યૌવનેઽન્તે તુ તપસ્વી ભાવિ વીક્ષ્યતે ॥ ૧૮.૯૮॥

આક્રમ્ય યાદૃગ્દેહાદિભાવિજન્મનિ વીક્ષતે ।
સ્વપ્નેઽપિ તાદૃગાક્રમ્ય સુખદુઃખાનિ પશ્યતિ ॥ ૧૮.૯૯॥

બહુજન્મસુ સઞ્ચારાદ્દેહાદિવ્યતિરિક્તતામ્ ।
નિરૂપ્યાથ સ્વપ્રભત્વં સ યત્રેતિ નિરૂપ્યતે ॥ ૧૮.૧૦૦॥

સ યદા વાસનામસ્ય જાગ્રલ્લોકસ્ય સર્વશઃ ।
આદાય શેતે વિજ્ઞેયા તસ્ય સ્વપ્રભતા તદા ॥ ૧૮.૧૦૧॥

સ યત્ર પ્રસ્વપિત્યત્ર સ્વયઞ્જ્યોતિઃ પુમાનિતિ ।
યોજ્યમસ્યેત્યાદિના તુ સ્વાપશબ્દાર્થ ઉચ્યતે ॥ ૧૮.૧૦૨॥

ન સુષુપ્તિરિહ સ્વાપઃ કિન્તુ સ્વપ્નો વિવક્ષિતઃ ।
સ જાગ્રદ્વાસનાજન્યપ્રપઞ્ચપ્રતિભાત્મકઃ (ભાસકઃ) ॥ ૧૮.૧૦૩॥

જાગ્રલ્લોકસ્તુ સર્વાવાનશેષમવતીત્યતઃ ।
અવિતૃત્વં ચ સપ્તાન્નબ્રાહ્મણે પ્રાક્ પ્રપઞ્ચિતમ્ ॥ ૧૮.૧૦૪॥

યદ્વાઽધ્યાત્માદિભેદોઽયં સર્વોઽત્રાસ્તીતિ સર્વવાન્ ।
તસ્ય સર્વાવતોઽશેષવાસના સ્વપ્નસૃષ્ટિકૃત્ ॥ ૧૮.૧૦૫॥

આદાય વાસનાં સ્થૂલે દેહે હિત્વાભિમન્તૃતામ્ ।
સૂક્ષ્મેઽભિમાનં નિર્માય પશ્યન્નેષોઽવતિષ્ઠતે ॥ ૧૮.૧૦૬॥

હનનં ચ વિનિર્માણં જીવે કર્મવશાદિતિ ।
વિવક્ષુઃ સ્મયમિત્યાહ દૈવં કર્માનુસાર્યતઃ ॥ ૧૮.૧૦૭॥

સ્વેન ભાસેતિ શબ્દાભ્યાં સ્વકીયા વાસનોચ્યતે ।
સ્વરૂપભૂતા ચિત્સ્વેન જ્યોતિષેતિ વિવક્ષિતા ॥ ૧૮.૧૦૮॥

ઇત્થમ્ભાવે તૃતીયા સ્યાદ્વાસનાજ્યોતિષોસ્તતઃ ।
ભાસ્યભાસકરૂપેણ સ્થિતિઃ સ્વપ્ન ઇતીર્યતે ॥ ૧૮.૧૦૯॥

અત્રાન્યજ્યોતિષોઽભાવાત્સ્વયઞ્જ્યોતિઃ પુમાન્ ભવેત્ ।
ન જ્યોતિષ્ટ્વં વાસનાયા ભાસ્યત્વેન પરિક્ષયાત્ ॥ ૧૮.૧૧૦॥

આત્મબુદ્ધિમનશ્ચક્ષુરાલોકવિષયૈર્યુતે ।
ન જાગરે સ્વયં જ્યોતિર્વિવેક્તું શક્યતે નૃભિઃ ॥ ૧૮.૧૧૧॥

ન સુષુપ્તેઽપિ તચ્છક્યં ભાસ્યાભિવ્યક્ત્યભાવતઃ ।
સ્વપ્ને તુ ભાસ્યમસ્ત્યેકં તતો જ્યોતિર્વિવિચ્યતે ॥ ૧૮.૧૧૨॥

સ્વપ્ને જાગરવદ્દ્રષ્ટા માતૃમાનાદયસ્તતઃ ।
દુર્વિવેચત્વમાશઙ્ક્યં ન તત્રેતિ નિષિધ્યતે ॥ ૧૮.૧૧૩॥

રથાશ્વાદીનિ વસ્તૂનિ જાગ્રત્કર્મક્ષયે સતિ ।

લીયન્તે વાસનાસ્તેષાં તિષ્ઠતિ સ્વપ્રસિદ્ધયે ॥ ૧૮.૧૧૪॥

લોકસિદ્ધમુપાદાનં નિમિત્તં વા ન વિદ્યતે ।
સ્વપ્ને તેન રથાદીનાં મિથ્યાત્વં યુજ્યતેતરામ્ ॥ ૧૮.૧૧૫॥

અસઙ્ગસ્યાપિ સમ્ભાવ્યમવિદ્યાકામકર્મભિઃ ।
સ્રષ્ટૃત્વમિત્યભિપ્રેત્ય સ હિ કર્તેત્યવોચત ॥ ૧૮.૧૧૬॥

બ્રાહ્મણોક્તાર્થદાર્ઢ્યાર્થં શ્રુતિર્મન્ત્રાનુદાહરત્ ।
સ્વયઞ્જ્યોતિષ્ટ્વદેહાદિભિન્નત્વે તેષ્વતિસ્ફુટે ॥ ૧૮.૧૧૭॥

આરામમેવ માયોત્થં સ્વપ્નનિર્માણલક્ષણમ્ ।
પશ્યન્તિ જન્તવસ્તસ્ય ન તં પશ્યતિ કશ્ચન ॥ ૧૮.૧૧૮॥

ચિકિત્સકપ્રસિદ્ધ્યાપિ સુપ્તો દેહાદ્વિભિદ્યતે ।
દ્રુતં ન બોધયેત્સુપ્તમિતિ પ્રાહુશ્ચિકિત્સકાઃ ॥ ૧૮.૧૧૯॥

દેહાન્યત્વસ્વપ્રભત્વે અસોઢ્વા સ્વપ્નમપ્યમુમ્ ।
અપહ્નુવાનાશ્ચાર્વાકાસ્તસ્યાહુર્જાગરાત્મતામ્ ॥ ૧૮.૧૨૦॥

તદસત્સ્વપ્નપાર્થક્યં પ્રસિદ્ધં લોકશાસ્ત્રયોઃ ।
અત્રાયં પુરુષસ્તેન સ્વપ્રભઃ ચેતનઃ પૃથક્ ॥ ૧૮.૧૨૧॥

મોદત્રાસૌ કર્મકાર્યૌ દૃષ્ટૌ સ્વપ્નેઽપિ ચાત્મનઃ ।
ઇત્યાશઙ્ક્ય સ વા એષ ઇતિ કર્મ વિવિચ્યતે ॥ ૧૮.૧૨૨॥

કાલુષ્યં જાગરે જીવે સ્વપ્ને સ્વલ્પપ્રસન્નતા ।
સમ્યક્ પ્રસીદત્યત્રેતિ સમ્પ્રસાદઃ સુષુપ્તકમ્ ॥ ૧૮.૧૨૩॥

સ્વપ્ને રત્વા ચરિત્વાથ વિશ્રાન્તઃ સમ્પ્રસાદકે ।
પુનરાયાત્યસૌ નાડીં સ્વપ્નાર્થમિતિ યોજના ॥ ૧૮.૧૨૪॥

દૃષ્ટ્વૈવેત્યેવશબ્દેન ન કૃત્વેતિ વિવક્ષિતમ્ ।
ન કર્મ કુરુતે સ્વપ્ને કારકાણામસમ્ભવાત્ ॥ ૧૮.૧૨૫॥

જાગરાત્સ્વપ્નમાપ્નોતિ સ્વપ્નાત્સુપ્તિમિતિ ક્રમાત્ ।
વૈપરીત્યં પ્રતિન્યાયં પ્રતિમાર્ગ ઇતીર્યતે ॥ ૧૮.૧૨૬॥

પ્રતિયોનિ યથાસ્થાનં સ્વપ્નનાડ્યાદિ ભણ્યતે ।
પ્રતિમાર્ગમવાપ્યાથ સ્વપ્નાય સ્થાનમાવ્રજેત્ ॥ ૧૮.૧૨૭॥

અનન્વાગમને હેતુરસઙ્ગત્વં હિ શબ્દતઃ ।
સૂચ્યતે બાધકસ્તર્કઃ પ્રસિદ્ધિર્વાત્ર લૌકિકી ॥ ૧૮.૧૨૮॥

યદ્વાનન્વાગતત્વેન વિવેકઃ કર્મણઃ કૃતઃ ।
અસઙ્ગત્વેન કામસ્ય કામો ન હ્યાત્મનો ગુણઃ ॥ ૧૮.૧૨૯॥

સ ઈયતે યત્ર કામં યથાકામં પ્રવર્તતે ।
ઇતિ શ્રુતિદ્વયં સ્વપ્ને વિસ્પષ્ટં કામમબ્રવીત્ ॥ ૧૮.૧૩૦॥

સ્વપ્નકામસ્ય વસ્તુત્વં શ્રુતિભ્યાં ચેદ્વિવક્ષિતમ્ ।
પ્રબોધેઽપ્યનુવર્તેત તચ્ચ નાસ્તિ તતો મૃષા ॥ ૧૮.૧૩૧॥

જાગ્રત્પ્રયક્ષમાશ્રિત્ય જાગરે મૃત્યુસત્યતામ્ ।
આશઙ્ક્ય પુનરપ્રાક્ષીદ્દૃષ્ટ્વૈવેતિ તદુત્તરમ્ ॥ ૧૮.૧૩૨॥

મૂઢપ્રત્યક્ષતઃ કર્તા વિદ્વત્પ્રત્યક્ષતોઽક્રિયઃ ।
વિવેકિનામનુભવાદાત્મજ્યોતિર્વિવેચિતમ્ ॥ ૧૮.૧૩૩॥

અસકૃત્સ્વપ્નબુદ્ધાન્તસઞ્ચારેઽપિ ન સઙ્ગવાન્ ।
ઇત્યર્થેઽસ્મિન્મહામત્સ્યો દૃષ્ટાન્તત્વેન વર્ણ્યતે ॥ ૧૮.૧૩૪॥

ઇત્થં સ્વપ્નપ્રસઙ્ગેન દેહાદિવ્યતિરિક્તતા ।
સ્વપ્રભત્વમસઙ્ગત્વં ચેત્યેતેઽર્થાઃ પ્રપઞ્ચિતાઃ ॥ ૧૮.૧૩૫॥

સ એષ પરલોકસ્ય દૃષ્ટાન્તઃ સ્વપ્ન ઈરિતઃ ।
સુષુપ્તિર્મોક્ષદૃષ્ટાન્તસ્તદર્થો ગ્રન્થ ઉત્તરઃ ॥ ૧૮.૧૩૬॥

તદ્વા અસ્યૈતદિત્યત્ર પ્રાપ્તકામસ્વભાવતામ્ ।
વક્તું સુપ્તાવદુઃખત્વં વક્તિ શ્યેનૈનિદર્શનાત્ ॥ ૧૮.૧૩૭॥

આત્મસ્વભાવો નિઃશેષં પુઞ્જીકૃત્યેહ લક્ષ્યતે ।
સુપ્તૌ મુક્તાવિવાદ્વૈતસ્વપ્રભાનન્દલક્ષણઃ ॥ ૧૮.૧૩૮॥

અવિદ્યા તુ સ્થિતાઽપ્યત્ર દ્વૈતદુઃખાદ્યનુદ્ભવાત્ ।
સ્વભાવં ન તિરોધત્તે સ્વપ્રભાનન્દમદ્વયમ્ ॥ ૧૮.૧૩૯॥

દ્વૈતદુઃખાદિરૂપં યત્સ્વાત્મનઃ સ્વપ્નજાગ્રતોઃ ।
તદવિદ્યોત્થમિત્યેતત્તા વા અસ્યેતિ વર્ણ્યતે ॥ ૧૮.૧૪૦॥

વિદ્યાયાઃ પરમોત્કર્ષે જાગ્રત્સાક્ષ્યાત્મવાસના ।
સર્વોઽસ્મીતિ મતિં સ્વપ્ને કરોત્યદ્વૈતભાસિનીમ્ ॥ ૧૮.૧૪૧॥

સર્વાત્મભાવઃ પરમો લોકો બાધવિવર્જનાત્ ।
બાધ્યન્તે દેવરાજાદ્યા ઇવશબ્દસ્તતઃ શ્રુતઃ ॥ ૧૮.૧૪૨॥

નન્વદ્વૈતમપિ દ્વૈતં સુપ્ત્યસુપ્ત્યોરિહાત્મનિ ।
ક્રમાદ્ભાત્યત્ર કિં રૂપં તસ્યેત્યાશઙ્ક્ય વર્ણ્યતે ॥ ૧૮.૧૪૩॥

યત્સાર્વાત્મ્યં પુરા પ્રોક્તં તદેવાદ્વૈતમાત્મનઃ ।
રૂપમાગમતઃ સ્વાનુભૂતેશ્ચ પુરુષાર્થતઃ ॥ ૧૮.૧૪૪॥

શાસ્ત્રપ્રસિદ્ધિં તચ્છબ્દો વક્ત સ્વાનુભવં પુનઃ ।
એતચ્છબ્દઃ પુમર્થત્વમતિચ્છન્દાદિનોચ્યતે ॥ ૧૮.૧૪૫॥

શિવમદ્વૈતમિત્યાદિ શાસ્ત્રમુદ્ઘુષ્યતે બહુ ।
સમાધિસુપ્ત્યોરદ્વૈતં સ્વયમેવાનુભૂયતે ॥ ૧૮.૧૪૬॥

છન્દઃ કામઃ કર્મ પાપં ભયં સ્યાત્કર્મણઃ ફલમ્ ।
અનર્થરૂપં ત્રિતયમદ્વૈતે વીક્ષ્યતે ન હિ ॥ ૧૮.૧૪૭॥

ત્રિતયેન તુ યદ્યુક્તં દ્વૈતં તસ્ય પુમર્થતા ।
નેતિ દ્વૈતં શ્રુતાવસ્યાં વૈશબ્દેન નિવર્ત્યતે ॥ ૧૮.૧૪૮॥

યોષિદાલિઙ્ગિતઃ ક્ષેત્રં ગૃહં વાપ્યવિચારયન્ ।
યથા સુખી તથા સુપ્તઃ કામભીત્યાદિવર્જનાત્ ॥ ૧૮.૧૪૯॥

તદ્વા અસ્યેતિ વાક્યેન કામાભાવઃ પ્રપઞ્ચ્યતે ।
આત્મરૂપં યદદ્વૈતમાપ્તકામં તદીક્ષતામ્ ॥ ૧૮.૧૫૦॥

સુષુપ્તશ્ચ સમાધિત્સુર્બાહ્યં કામયતે ન હિ ।
અપિ ત્વાત્માનમેવાત્મા પ્રાપ્ત એવાખિલૈઃ સદા ॥ ૧૮.૧૫૧॥

કામ્યભોજનતસ્તૃપ્તસ્તદા ભોજ્યં ન વાઞ્છતિ ।
એવં કામ્યાત્મનિ પ્રાપ્તે કિમન્યત્કામ્યતે પુનઃ ॥ ૧૮.૧૫૨॥

આત્મરૂપમકામં યત્તચ્છોકરહિતં સદા ।
શોકાન્તરં પૃથક્ શોકાદિતિ નિઃશોકતોચ્યતે ॥ ૧૮.૧૫૩॥

નનુ દેહાભિમાનશ્ચ ધર્માધર્મૌ ચ શોકદાઃ ।
યથા જાગરણે તદ્વત્સુષુપ્તૌ ચ પ્રસજ્યતે ॥ ૧૮.૧૫૪॥

મૈવં પિતાહમિત્યાદિદેહાત્મભ્રાન્તિલોપનાત્ ।

પિતૃત્વયુક્તદેહેઽભિમાનઃ સુપ્તસ્ય નેક્ષ્યતે ॥ ૧૮.૧૫૫॥

તત્તદ્દેહાભિમાનસ્તુ ક્ષીણતત્કર્મસઙ્ક્ષયાત્ ।
પુણ્યેન પાપ્મનાઽનન્વાગતં રૂપં પરાત્મનઃ ॥ ૧૮.૧૫૬॥

હૃદયાખ્યં મનસ્તસ્ય પુણ્યપાપે તતોઽખિલાઃ ।
શોકા મનોગતાઃ સુપ્તૌ શોકાનાત્માઽતિવર્તતે ॥ ૧૮.૧૫૭॥

નેનુ શોકાદિવત્સુપ્તૌ ચૈતન્યમપિ લુપ્યતે ।
સુપ્તો ન પશ્યતીત્યેવમાહુઃ સર્વેઽપિ લૌકિકાઃ ॥ ૧૮.૧૫૮॥

આત્મન્યદૃષ્ટવશતો જ્ઞાનમિચ્છાદિવદ્ભવેત્ ।
ઇત્યાહુતાર્કિકાઃ સુપ્તૌ ન જ્ઞાનં કર્મણઃ ક્ષયાત્ ॥ ૧૮.૧૫૯॥

યદ્વૈ તન્નેત્યાદિ વાક્યૈરસ્યોત્તરમુદીર્યતે ।
ન ચિલ્લોપઃ કિન્તુ બુદ્ધેર્લોપ ઇત્યેતદુત્તરમ્ ॥ ૧૮.૧૬૦॥

તચ્છન્દઃ સુપ્તિમાચષ્ટે વૈશબ્દોઽવધૃતો ભવેત્ ।
તત્ર સુપ્તૌ પુમાન્નૈવ પશ્યતીતિ જના જગુઃ ॥ ૧૮.૧૬૧॥

અદર્શનં સર્વથેતિ યદાહુરવિવેકિનઃ ।
તદ્વિવેચ્ય તથા ચાત્મા પશ્યન્નેવ ન પશ્યતિ ॥ ૧૮.૧૬૨॥

સાક્ષિચૈતન્યનિત્યત્વાત્પશ્યન્નેવ વ્યવસ્થિતઃ ।
જ્ઞાતૃજ્ઞાનજ્ઞેયલોપાદ્વ્યવહારં ન પશ્યતિ ॥ ૧૮.૧૬૩॥

તસ્માત્સુપ્તૌ ચિદદ્વૈતં યદ્રૂપં પરમાત્મનઃ ।
એતદ્દ્રઢયિતું પ્રોક્તાઃ પર્યાયાઃ બહવઃ શ્રુતૌ ॥ ૧૮.૧૬૪॥

નનુ સર્વૈર્જનૈર્દ્વૈતં જાગરે સ્પષ્ટમીક્ષ્યતે ।
સ દ્વૈત એવ કિં ન સ્યાદાત્મેત્યાશઙ્ક્ય વર્ણ્યતે ॥ ૧૮.૧૬૫॥

યત્રૈવ જાગરે સ્વસ્માદન્યત્કિઞ્ચિદિવ ભ્રમઃ ।
તત્રૈવાન્યઃ સ્વયં દ્રષ્ટા દૃશ્યમન્યદિવેક્ષતે ॥ ૧૮.૧૬૬॥

યદ્વૈ તદિત્યુપક્રમ્ય વ્યાખ્યાતં તદ્ધિ વિસ્તરાત્ ।
સલિલાદિગિરા તસ્ય ક્રિયતે ચોપસંહૃતિઃ ॥ ૧૮.૧૬૭॥

આત્મા સલિલવચ્છુદ્ધઃ કાર્યકારણહીનતઃ ।
સ્વતોઽવબોધમાત્રત્વાત્કુતો વિદ્યાદિસઙ્ગતિઃ ॥ ૧૮.૧૬૮॥

અન્તરેણાપિ સમ્બન્ધં કાર્યકારણવસ્તુનઃ ।
સ્વતોઽનેકાત્મકં તત્સ્યાદિત્યાશઙ્ક્યૈકતોચ્યતે ॥ ૧૮.૧૬૯॥

અકારકસ્વભાવત્વમદ્રષ્ટેત્યભિધીયતે ।
યત્ર હિ દ્વૈતમિત્યુક્તેર્યત્ર ત્વસ્યેતિ ચેરણાત્ ॥ ૧૮.૧૭૦॥

સ્વતઃ પૂર્ણાત્મકં જ્યોતિર્યદ્વા દ્રષ્ટેતિ ચોચ્યતે ।
અવિદ્યાકાર્યરાહિત્યાદદ્વૈતોઽયં ભવેત્સ્વતઃ ॥ ૧૮.૧૭૧॥

પ્રત્યગ્દૃષ્ટ્યવ્યવહિતે પ્રાત્યક્ષ્યાદાત્મવસ્તુનઃ ।
એષ ઇત્યાત્મનિર્દેશો યત્સાક્ષાદિતિ ચ શ્રુતેઃ ॥ ૧૮.૧૭૨॥

અવ્યાવૃત્તાનનુગતં નિઃસામાન્યવિશેષવત્ ।
બ્રહ્મેતિ મુખ્યવૃત્ત્યેહ વસ્તુ શ્રુત્યાભિધીયતે ॥ ૧૮.૧૭૩॥

યતો લોકયતેર્ધાતોર્દર્શનાર્થત્વહેતુતઃ ।
પ્રકૃતત્વાત્તથા દૃષ્ટેર્લોકનં લોક ઉચ્યતે ॥ ૧૮.૧૭૪॥

વિજ્ઞાનપુરુષસ્યાસ્ય યોક્તા બ્રહ્માત્મતા પુરા ।
નૈષ્ઠિકી ગતિરેષાઽત્ર ગત્યન્તરસમાશ્રિતઃ ॥ ૧૮.૧૭૫॥

સંપચ્ચ પરમૈષૈવ મોહોત્થાશ્ચાન્યસમ્પદઃ ।
ઉત્કર્ષાતિશયઃ સમ્પદ્વિભૂતિશ્ચેતિ ભણ્યતે ॥ ૧૮.૧૭૬॥

એષોઽસ્ય પરમો લોકો લોકાસ્ત્વન્યે ક્ષયિષ્ણવઃ ।
ક્ષયિષ્ણુસાધનાયત્તાઃ ન ત્વેષોઽસાધનાશ્રયાત્ ॥ ૧૮.૧૭૭॥

આનન્દઃ પરમોઽસ્યૈવ સુખોત્કર્ષસમાશ્રિતઃ ।
સર્વાનન્દાતિશાયિત્વાત્તથા ચૈતત્પ્રવક્ષ્યતે ॥ ૧૮.૧૭૮॥

આનન્દઃ પરમોઽસ્યૈવ ઇત્યુક્તાર્થપ્રસિદ્ધયે ।
એતસ્યૈવેતિ વચસા સમર્થો હેતુરુચ્યતે ॥ ૧૮.૧૭૯॥

કૃત્સ્નોઽપિ ચૈષ આનન્દસ્તદવિદ્યૈકહેતુતઃ ।
બુદ્ધ્યાદ્યુપાધ્યવચ્છેદાન્માત્રેતિ વ્યપદિશ્યતે ॥ ૧૮.૧૮૦॥

માનુષાદિકહૈરણ્યગર્ભાન્તાનન્દમાત્રયા ।
પરાનન્દં બોધયિતું શ્રોત્રિયે તદુદાહૃતિઃ ॥ ૧૮.૧૮૧॥

શ્રોત્રિયો વેદશાસ્ત્રજ્ઞો નિષ્પાપો બ્રહ્મવિત્ત્વતઃ ।
ભોગ્યદોષાન્વિવિચ્યાસ્તે નાતઃ કામેન હન્યતે ॥ ૧૮.૧૮૨॥

સુખં તૃપ્તિરકામત્વમિત્યેકાર્થા ઇમા ગિરઃ ।
સર્વકામવિહીનેઽતઃ સુખં સર્વં વ્યવસ્થિતમ્ ॥ ૧૮.૧૮૩॥

શ્રોત્રિયે કામરાહિત્યાત્સર્વાનન્દાઃ સહ સ્થિતાઃ ।
સોઽશ્નુતે સકલાન્ કામાન્ સહેતિ પ્રાહ તિત્તિરિઃ ॥ ૧૮.૧૮૪॥

સૂત્રાત્પરમનન્તત્વાદ્ગણિતં વિનિવર્તતે ।
યતો વાચો નિવર્તંત ઇતિ શ્રુત્યન્તરં જગૌ ॥ ૧૮.૧૮૫॥

શ્રોત્રિયેણાનુભૂતો યો બ્રહ્માનન્દોઽસ્ય વિપ્રુષઃ ।
સાર્વભૌમાદિસૂત્રાન્તાઃ પ્રાણિનોઽનુભવન્ત્યમી ॥ ૧૮.૧૮૬॥

વક્તવ્યાર્થે સમાપ્તેઽપિ રાજા પૃચ્છતિ પૂર્વવત્ ।
ભીતો મુનિર્ભયે હેતુર્મેધાવીત્યાદિનોક્તવાન્ ॥ ૧૮.૧૮૭॥

સર્વેભ્યો નિર્ણયેભ્યો મામરૌત્સીન્ન તુ મુઞ્ચતિ ।
અયમેવ ભયે હેતુર્નોત્તરાનવબોધનમ્ ॥ ૧૮.૧૮૮॥

સ્વપ્નઃ સુપ્તિશ્ચ દૃષ્ટાન્તૌ પરલોકવિમોક્ષયોઃ ।
તાવેવ મુનિના પ્રોક્તૌ શિષ્ટં દાર્ષ્ટાન્તિકદ્વયમ્ ॥ ૧૮.૧૮૯॥

સ્વપ્નાજ્જાગરણં યદ્વદ્દેહાલ્લોકાન્તરં તથા ।
ઇત્યભિપ્રેત્ય મુનિના સ્વપ્નાદ્બોધોઽભિધીયતે ॥ ૧૮.૧૯૦॥

શકટં બહુભિર્દ્રવ્યૈર્યોજિતં ગુરુભારતઃ ।
કુર્વન્ શબ્દાન્ બહૂન્યાતિ ચેતનેન પ્રયોજિતમ્ ॥ ૧૮.૧૯૧॥

શરીરસ્થો હિ લિઙ્ગાત્મા હ્યન્વારૂઢશ્ચિદાત્મના ।
શબ્દાન્ કુર્વન્હિ હિક્કાદીન્ પ્રૈત્યૂર્ધ્વશ્વાસપૂર્વકમ્ ॥ ૧૮.૧૯૨॥

ઉપાધ્યારોહમન્વાત્મા રૂઢવત્પ્રતિભાસતે ।
ભાનોરિવોદપાત્રાદાવારોહો નાત્મનઃ સ્વતઃ ॥ ૧૮.૧૯૩॥

મર્મસૂત્કૃષ્યમાણેષુ વાયુનોદાનરૂપિણા ।
મુમૂર્ષોરત્ર યદ્દુઃખં સ્મર્યતાં તન્મુમુક્ષુભિઃ ॥ ૧૮.૧૯૪॥

રોગેણ જરયા વાયં દેહઃ કાર્શ્યં યદાપ્નુયાત્ ।
તદામ્રાદિફલં વૃન્તાદિવાઙ્ગેભ્યઃ પ્રયુજ્યતે ॥ ૧૮.૧૯૫॥

નિર્ગત્ય હૃદયસ્થાનાન્નાડીમાર્ગેણ જાગરમ્ ।

પ્રાપ્તોઽત્ર વૈપરીત્યેન નાડીમાર્ગાદ્ધૃદિ વ્રજેત્ ॥ ૧૮.૧૯૬॥

જાગ્રત્સ્વપ્નાદિસિદ્ધ્યર્થં ગમનાગમને પુરા ।
ઇદાનીં ત્વન્યદેહેઽસૌ પ્રાણં ધારયિતું વ્રજેત્ ॥ ૧૮.૧૯૭॥

નનૂપાદિત્સતે દેહે ભોગાય પ્રાણધારણમ્ ।
ભોગ્યસમ્પાદને નાસ્તિ શક્તિરસ્યેતિ ચેચ્છૃણુ ॥ ૧૮.૧૯૮॥

તત્કર્મોપાર્જિતૈરન્યૈઃ ભોગ્યં સમ્પાદ્યતે પુરા ।
ઇત્યેતદ્વિશદીકર્તું રાજદૃષ્ટાન્ત ઉચ્યતે ॥ ૧૮.૧૯૯॥

રાજ્ઞા જીવિતદાનેન હ્યુગ્રાદય ઉપાર્જિતાઃ ।
મુમૂર્ષુણા ભાવિદેહબન્ધવઃ કર્મણાર્જિતાઃ ॥ ૧૮.૨૦૦॥

એવં પુત્રાદિભાવાય પ્રતીક્ષન્તેઽખિલાઃ સદા ।
ઋતાવસ્મિન્સમાયાતિ બ્રહ્મપુત્રાદિરૂપતઃ ॥ ૧૮.૨૦૧॥

નન્વિદ્રિયાણિ પ્રેતસ્ય લીયન્તે વપુષા સહ ।
ઇત્યાહુસ્તાર્કિકા બ્રહ્મ નિરુપાધિ કથં વ્રજેત્ ॥ ૧૮.૨૦૨॥

પ્રાણોપાધિક એવાત્મા ગચ્છતીતિ વિવક્ષયા ।
પ્રાણાનામાત્મસામીપ્યગતિં વક્તિ મૃતૌ શ્રુતિઃ ॥ ૧૮.૨૦૩॥

રાજાનં પ્રયિયાસન્તમાભિમુખ્યેન સેવિતુમ્ ।
આયાન્ત્યુગ્રાદયસ્તદ્વત્પ્રાણાનામાત્મસઙ્ગતિઃ ॥ ૧૮.૨૦૪॥

તૃતીયબ્રાહ્મણે પ્રોક્તા દેહે સ્વપ્નાદિસંસૃતિઃ ।
દેહાન્તરેષુ સંસારો મુક્તિશ્ચાથ પ્રવક્ષ્યતે ॥ ૧૮.૨૦૫॥

સ મુમૂર્ષુર્યદા દેહે દૌર્બલ્યં પ્રાપ્ય મૂઢતામ્ ।
પ્રાપ્નોતીવ તદા ચક્ષુરાદ્યા આયાન્તિ દેહિનમ્ ॥ ૧૮.૨૦૬॥

રાજદૃષ્ટાન્તતઃ પ્રોક્તાં પ્રાણાનામાત્મસઙ્ગતિમ્ ।
અનૂદ્ય તત્પ્રકારોઽત્ર વિસ્તરેણાભિધીયતે ॥ ૧૮.૨૦૭॥

તેજો માત્રાશ્ચક્ષુરાદ્યાઃ પ્રસૃતા મત્સ્યજાલવત્ ।
જાગરેઽથ મુમૂર્ષુસ્તા સમાદાય હૃદિ વ્રજેત્ ॥ ૧૮.૨૦૮॥

અનુગૃહ્ણાતિ યઃ પૂર્વં ચાક્ષુષઃ પુરુષો રવિઃ ।
ભોગાર્થમધુના સોયં ભોગાભાવાદુપેક્ષતે ॥ ૧૮.૨૦૯॥

ઇન્દ્રિયસ્યોપસંહારાદાદિત્યસ્યાપ્યુપેક્ષયા ।
આત્મા દ્રષ્ટુમસામર્થ્યાદરૂપજ્ઞો ભવેત્તદા ॥ ૧૮.૨૧૦॥

અસ્મિન્નર્થે સર્વલોકપ્રસિદ્ધિરભિધીયતે ।
એકીભાવાદયં નૈવં પશ્યતીતિ જગુર્જનાઃ ॥ ૧૮.૨૧૧॥

ચક્ષુર્બુદ્ધાવૈક્યમેતિ રવૌ રવ્યંશ એકતામ્ ।
ઇન્દ્રિયાન્તરતદ્દેવેષ્વયં ન્યાયોઽત્ર યોજ્યતામ્ ॥ ૧૮.૨૧૨॥

કૃત્સ્નપ્રાણોપસંહારસંયુક્તસ્ય મુમૂર્ષતઃ ।
નાડ્યગ્રં હૃદયસ્યાથ પ્રકર્ષેણ પ્રકાશતે ॥ ૧૮.૨૧૩॥

ભાવિદેહાત્મતા યસ્ય પ્રત્યક્ચૈતન્યબિમ્બતા ।
વાસનૈવાત્મનઃ સૈષા પ્રદ્યોતવચસોચ્યતે ॥ ૧૮.૨૧૪॥

સ એષ કર્મજો બુદ્ધેઃ પ્રકાશો જાયતે મૃતૌ ।
સ્વકર્મનિર્મિતં લોકં તેનાત્માયં પ્રપશ્યતિ ॥ ૧૮.૨૧૫॥

સ્વપ્નવત્પ્રાપ્તતદ્ભાવઃ પશ્ચાદ્દેહાદ્વિનિઃસરેત્ ।
ગમ્યલોકાનુસારેણ દ્વારં સ્યાચ્ચક્ષુરાદિકમ્ ॥ ૧૮.૨૧૬॥

દેહાજ્જિગમિષુઃ પ્રાણસહિતો નિર્ગતઃ પુનઃ ।
સવિજ્ઞાનઃ ભવેત્પૂર્વં હૃદિ પ્રદ્યોતનં યથા ॥ ૧૮.૨૧૭॥

પુરા નાડીવિશેષેણ નિર્ગન્તું જ્ઞાનમીરિતમ્ ।
ગન્તું લોકવિશેષેઽથ પુનર્વિજ્ઞાનમીર્યતે ॥ ૧૮.૨૧૮॥

હેતુર્જાગ્રદ્વાસનાસ્ય સ્વપ્નારમ્ભે યથા તથા ।
જન્માન્તરારમ્ભહેતુઃ કિં સ્યાદિતિ તદુચ્યતે ॥ ૧૮.૨૧૯॥

વિદ્યા સમ્પાદિતા તેન પુરા કર્મ ચ યત્કૃતમ્ ।
યા વાસના ચ તત્સર્વં જન્મ ભોગ્યાદિકારણમ્ ॥ ૧૮.૨૨૦॥

દેહં વિદ્યા પરિચ્છિન્દ્યાદીદૃશો દેહ ઇત્યથ ।
વિકર્તૃ કર્મ વોઢ્રી તુ પૂર્વપ્રજ્ઞેહ પૂર્વયોઃ ॥ ૧૮.૨૨૧॥

સમર્થા સૈવ તે યસ્માદુદ્વોઢું જ્ઞાનકર્મણી ।
નરસ્યાતઃ પ્રધાનત્વાતાત્તાભ્યાં સા ગૃહ્યતે પૃથક્ ॥ ૧૮.૨૨૨॥

સર્વગસ્ય મનોમાત્રગતિં બ્રૂતેઽત્ર તાર્કિકઃ ।
શ્રુતિસ્તુ સ્વમતં બ્રૂતે જલૂકાખ્યનિદર્શનાત્ ॥ ૧૮.૨૨૩॥

જલૂકા હિ તૃણાગ્રસ્થા સ્વમુખેન તૃણાન્તરમ્ ।
અવલમ્બ્ય વપુઃ શિષ્ટં સર્વં તત્રોપસંહરેત્ ॥ ૧૮.૨૨૪॥

લિઙ્ગદેહોપાધિરાત્મા ધિયા દેહાન્તરં સ્મરન્ ।
લિઙ્ગોપાધિકમાત્માનં પ્રાપયેદન્યદેહકમ્ ॥ ૧૮.૨૨૫॥

નનુ દેહાન્તરારમ્ભે ઉપાદાનં કિમાત્મનઃ ।
એતદ્દેહારમ્ભકં યત્તદેવોતાન્યદીર્યતામ્ ॥ ૧૮.૨૨૬॥

સ્વર્ણકારઃ સુવર્ણાંશમાદાયાન્યં નવં નવમ્ ।
તેનૈવ કુરુતે ભૂય ઉપમૃદ્યાતિયત્નતઃ ॥ ૧૮.૨૨૭॥

પઞ્ચીકૃતાસ્તુ ભૂતાંશાઃ સ્થૂલદેહસ્ય હેતવઃ ।
અલ્પત્વેનાતિસૂક્ષ્માસ્તૈર્લિઙ્ગં તિષ્ઠતિ વેષ્ટિતમ્ ॥ ૧૮.૨૨૮॥

નિર્મિતસ્તૈરયં દેહઃ પોષિતઃ પિતૃવીર્યતઃ ।
મૃતૌ કઞ્ચુકવત્ત્યાજ્યો બાહ્યાંશો વીર્યનિર્મિતઃ ॥ ૧૮.૨૨૯॥

અધિષ્ઠાનારોપ્યભાગૌ તેષુ દેહેષુ યૌ સ્થિતૌ ।
તાદૃશૌ વિશદીકર્તું સ વા ઇત્યાદિકા શ્રુતિઃ ॥ ૧૮.૨૩૦॥

યઃ સંસારી પુરા પ્રોક્તઃ સ એવાયં સ્વતઃ સ્ફુરન્ ।
સાક્ષિચૈતન્યરૂપત્વાદધિષ્ઠાનમનાત્મનઃ ॥ ૧૮.૨૩૧॥

વિજ્ઞાનં કર્તૃતોપાધિર્મનઃ પ્રાણાદયોઽખિલાઃ ।
બહિર્બહિઃ સમારોપ્યાઃ સર્વમારોપિતં ચિતિ ॥ ૧૮.૨૩૨॥

તદ્યદિત્યાદિના સર્વશબ્દસ્યાર્થ ઉદાહૃતઃ ।
પ્રત્યક્ષવસ્તુન્યધ્યાસે સતીદમ્મયતા ભવેત્ ॥ ૧૮.૨૩૩॥

પરોક્ષવસ્તુન્યધ્યાસાદદોમય ઇતીર્યતે ।
આરોપોક્તિસમાપ્ત્યર્થમિતિશબ્દઃ પ્રયુજ્યતે ॥ ૧૮.૨૩૪॥

ઇદમ્મયત્વં વિસ્પષ્ટમૈહિકત્વાદુપેક્ષ્ય તત્ ।
અદોમયત્વં વ્યાચષ્ટે યથાકારીતિ વાક્યતઃ ॥ ૧૮.૨૩૫॥

કરણં નિત્યકર્મ સ્યાત્કામ્યં તુ ચરણં ભવેત્ ।
કરણં કર્મશક્તિર્વા ચરણં પ્રત્યયાત્મકમ્ ॥ ૧૮.૨૩૬॥

વાસના કર્મ વિદ્યા ચ ત્રયં જન્મપ્રયોજકમ્ ।

ઉક્તં તત્ર પ્રધાનત્વં કર્મણઃ શ્રૂયતે પુનઃ ॥ ૧૮.૨૩૭॥

પૂર્વકાણ્ડપરા ઇત્થં કર્મપ્રાધાન્યમૂચિરે ।
અથ વેદાન્તશાસ્ત્રજ્ઞાઃ પ્રાહુઃ કામપ્રધાનતામ્ ॥ ૧૮.૨૩૮॥

ઇત્યેતદ્વિશદીકર્તું સ યથેત્યુત્તરા શ્રુતિઃ ।
કામઃ ક્રતુઃ કર્મ જન્મેત્યેષામેવ ક્રમો ભવેત્ ॥ ૧૮.૨૩૯॥

રુચેરતિશયઃ કામ્યે વિષયે ક્રતુરીર્યતે ।
પાક્ષિકં કર્મ કામ્યે સ્યાત્કરોત્યેવ કૃતૌ સતિ ॥ ૧૮.૨૪૦॥

કામપ્રાધાન્યદાર્ઢ્યાર્થં મન્ત્રસ્યોદાહૃતિઃ શ્રુતૌ ।
લિઙ્ગ્યેતે ગમ્યતે સર્વં મનસાऽતોऽસ્ય લિઙ્ગતા ॥ ૧૮.૨૪૧॥

યઃ પુરા સ્વપ્રદૃષ્ટાન્તાત્પરો લોકો વિવક્ષિતઃ ।
ઇતિ ન્વિત્યુપસંહારં તદુક્તેઃ કૃતવાન્મુનિઃ ॥ ૧૮.૨૪૨॥

મુક્તિઃ સુષુપ્તિ દૃષ્ટાન્તાત્મુનિના યા વિવક્ષિતા ।
મુનિરારભતે વક્તું તામથેત્યાદિવાક્યતઃ ॥ ૧૮.૨૪૩॥

પૂર્વોક્તકામિવૈષમ્યમથશબ્દેન સૂચ્યતે ।
કામી સંસરતીત્યુક્તં કામાભાવે વિમુચ્યતે ॥ ૧૮.૨૪૪॥

પરમાનન્દરૂપત્વમાત્મનશ્ચેદ્વિબુધ્યતે ।
કુતઃ કામયતે ભોગ્યં તતો બોધાદકામતા ॥ ૧૮.૨૪૫॥

બોધલભ્યમકામત્વં યથાકામેત્યસૂત્રયત્ ।
યોऽકામ ઇત્યાદિનૈતત્સૂત્રં વિવ્રિયતે સ્ફુટમ્ ॥ ૧૮.૨૪૬॥

યોऽકામસ્તસ્ય ન પ્રાણા ઉત્ક્રામન્તીતિ યોજના ।
સંસૃતિઃ કામિનો યદ્વદકામો મુચ્યતે તથા ॥ ૧૮.૨૪૭॥

દૃષ્ટાનુશ્રાવિકા બાહ્યકામા યસ્ય ન સન્ત્યસૌ ।
અકામસ્તાદૃશત્વં તુ નિષ્કામત્વેન સિદ્ધ્યતિ ॥ ૧૮.૨૪૮॥

વિભ્રમાપાદિતાઃ કામાઃ પ્રત્યક્તત્ત્વવિવેકિનઃ ।
યસ્માદ્વિનિર્ગતાઃ સોऽયં નિષ્કામ ઇતિ ભણ્યતે ॥ ૧૮.૨૪૯॥

આપ્તકામત્વતઃ સિદ્ધ્યેદ્બુદ્ધેઃ કામવિનિર્ગમઃ ।
અપ્રાપ્તૌ કામ્યમાનસ્ય કામઃ ક્વાપિ ન નિઃસરેત્ ॥ ૧૮.૨૫૦॥

એવં સત્યાપ્તકામત્વં નિઃકામત્વસ્ય સાધનમ્ ।
કામાપ્તૌ ત્વાપ્તકામત્વમેવ હેતુર્ન ચેતરત્ ॥ ૧૮.૨૫૧॥

નિરુપાધિઃ પરાનન્દઃ આત્મેતિ શ્રુતિસમ્મતઃ ।
આનન્દાઃ સર્વભૂતાનાં તસ્મિન્નન્તર્ભવન્તિ હિ ॥ ૧૮.૨૫૨॥

પુત્રાદિજન્યા આનન્દા અપિ તસ્મિન્નવસ્થિતાઃ ।
તથાવિધાત્મકામોય આપ્તકામો ભવેદયમ્ ॥ ૧૮.૨૫૩॥

યદીદૃગાપ્તકામો યઃ સ નિષ્કામ ભવેત્તતઃ ।
નિષ્કામત્વાદકામઃ સન્ સંસારાત્પ્રવિમુચ્યતે ॥ ૧૮.૨૫૪॥

ઉત્પન્નતત્ત્વજ્ઞાનસ્ય પ્રાણા અજ્ઞાનબાધનાત્ ।
નોત્ક્રામન્તિ ન તિષ્ઠન્તિ ન ચ નશ્યન્ત્યહેતુતઃ ॥ ૧૮.૨૫૫॥

બન્ધસ્ય કલ્પિતત્વેન તન્મુક્તિરપિ કલ્પિતા ।
ઇત્યભિપ્રાયમાચષ્ટે બ્રહ્મૈવેત્યાદિવાક્યતઃ ॥ ૧૮.૨૫૬॥

અવિદ્યાધ્વસ્તિમાપેક્ષ્ય સમ્યગ્ધીજન્મમાત્રતઃ ।
આત્મા બ્રહ્મૈવ સન્ સાક્ષાદ્બ્રહ્માપ્યેતીતિ સુસ્થિતમ્ ॥ ૧૮.૨૫૭॥

ઇત્યેતત્સર્વવેદાન્તસર્વસ્વં બ્રાહ્મણોદિતમ્ ।
અસ્યૈવાર્થસ્ય દાર્ઢ્યાર્થં મન્ત્રોદાહરણં ભવેત્ ॥ ૧૮.૨૫૮॥

કામિનઃ સર્વસંસારઃ પુરા મન્ત્રેણ વર્ણિતઃ ।
અકામસ્ય વિમોક્ષોઽત્ર તથા મન્ત્રેણ વર્ણ્યતે ॥ ૧૮.૨૫૯॥

પુંસો હૃદિ શ્રિતાઃ કામા મુચ્યન્તે નિખિલા યદા ।
તદાનીમમૃતો ભૂત્વા બ્રહ્મૈવાત્ર સમશ્નુતે ॥ ૧૮.૨૬૦॥

નનુ બ્રહ્માશ્નુતેઽત્રેતિ જીવતો મુક્તિરીરિતા ।
જીવત્વે કો વિશેષોઽસ્ય બન્ધાન્મુક્તાવિતીર્યતામ્ ॥ ૧૮.૨૬૧॥

અભિમાનઃ પૂર્વમાસીદ્દેહાદાવધુના તથા ।
નાસ્તીત્યત્રાતિવિસ્પષ્ટઃ સર્પદૃષ્ટાન્ત ઉચ્યતે ॥ ૧૮.૨૬૨॥

પ્રત્યગ્જ્ઞાનશિખિધ્વસ્તે મિથ્યાજ્ઞાને સહેતુકે ।
નેતિ નેતિ સ્વરૂપત્વાદશરીરો ભવત્યયમ્ ॥ ૧૮.૨૬૩॥

સ્થૂલદેહં પરિત્યજ્ય લિઙ્ગદેહયુતો યદિ ।
મૃતસ્તદા સ્યાન્ન ત્વેવમમૃતોઽસાવતો ભવેત્ ॥ ૧૮.૨૬૪॥

પ્રકૃષ્ટચેષ્ટાહેતુત્વાત્સાક્ષ્યુક્તઃ પ્રાણશબ્દતઃ ।
કો હ્યેવાન્યાદિતિ પ્રોક્તં ચેષ્ટાહેતુત્વમાત્મનઃ ॥ ૧૮.૨૬૫ ॥

સાક્ષિણો બ્રહ્મરૂપત્વં બ્રહ્મૈવેત્યભિધીયતે ।
સંસર્ગશઙ્કાનુત્ત્યર્થમેવકારઃ પ્રયુજ્યતે ॥ ૧૮.૨૬૬ ॥

સંયોગઃ સમવાયો વા નૈવ બ્રહ્માત્મનોરિહ ।
અખણ્ડૈકરસત્વં તુ ભવતીતિ વિવક્ષિતમ્ ॥ ૧૮.૨૬૭ ॥

તદેવ વિશદીકર્તું તેજ એવેત્યુદીર્યતે ।
ચૈતન્યં તેજ ઇત્યુક્તં તચ્ચૈકમુભયોરપિ ॥ ૧૮.૨૬૮ ॥

અવિદ્યાદિનિવૃત્તિશ્ચ ચૈતન્યવ્યતિરેકતઃ ।
નાસ્તીત્યેવમભિપ્રાય એવકારેણ સૂચ્યતે ॥ ૧૮.૨૬૯ ॥

તત્ત્વવિદ્યારસાકૃષ્ટઃ શ્રોતું વાઞ્છતિ સઙ્ગ્રહાત્ ।
સાધનાન્યપિ વિદ્યાયાઃ શ્રોતુમિચ્છતિ ભૂપતિઃ ॥ ૧૮.૨૭૦ ॥

એતત્સર્વં વિવક્ષુઃ સન્મુનિઃ સઙ્ગ્રહરૂપિણઃ ।
શ્લોકાનુદાહરન્તત્ર જ્ઞાનમાર્ગમિમં જગૌ ॥ ૧૮.૨૭૧ ॥

શ્લોકેનાદ્યેન યઃ પન્થાઃ પ્રોક્તસ્તસ્મિન્મતાન્તરમ્ ।
ઉપન્યસ્યાથ સિદ્ધાન્તં પ્રાહ શ્લોકાન્તરેણ સઃ ॥ ૧૮.૨૭૨ ॥

બ્રહ્મવિન્મુક્તિમાપ્નોતિ તેન બોધાત્મના પથા ।
પુણ્યકૃત્તૈજસશ્ચાદૌ ભૂત્વાઽથ બ્રહ્મવિદ્ભવેત્ ॥ ૧૮.૨૭૩ ॥

તેજઃશબ્દેન સંશુદ્ધા બુદ્ધિરેવાભિધીયતે ।
પુણ્યે કૃતે બુદ્ધિશુદ્ધૌ વિદ્યા સ્યાત્સ્મર્યતે તથા ॥ ૧૮.૨૭૪ ॥

યત્પુણ્યં બુદ્ધિશુદ્ધ્યર્થં યો યોગશ્ચાત્મબોધકૃત્ ।
શ્લોકે દ્વિતીયે તૌ પ્રોક્તૌ તૃતીયે ત્વન્યથોચ્યતે ॥ ૧૮.૨૭૫ ॥

યત્કામ્યં કર્મ યોગશ્ચ યોઽણિમાદિપ્રદો દ્વયમ્ ।
તત્સંસારસ્યૈવ હેતુર્ન મુક્તાવુપયુજ્યતે ॥ ૧૮.૨૭૬ ॥

યુજ્યતે મુક્તભાવોઽયં સત્ત્વબોધવિવર્જનાત્ ।
જન્મપ્રવાહ એવાતશ્ચતુર્થે શ્લોક ઈર્યતે ॥ ૧૮.૨૭૭ ॥

બ્રહ્માનુભવયુક્તાનાં વિશેષો દુઃખસઙ્ક્ષયઃ ।

શ્લોકેન પઞ્ચમેનાત્ર વિસ્પષ્ટમભિધીયતે ॥ ૧૮.૨૭૮॥

ન દુઃખક્ષય એવાસ્ય કિન્તુ વિશ્વસ્ય કર્તૃતા ।
સર્વલોકાત્મકા ચેતિ ષષ્ઠે શ્લોક ઉદીર્યતે ॥ ૧૮.૨૭૯॥

શાસ્ત્રાધિકારયુક્તેઽસ્મિન્દેહે વિદ્યાત્પરં પદમ્ ।
અન્યથાઽનર્થ ઇત્યેવં સપ્તમે શ્લોક ઈર્યતે ॥ ૧૮.૨૮૦॥

ગર્ભપ્રવેશાદિરૂપા જુગુપ્સા નાત્મવેદિનઃ ।
ઇત્યેષોઽર્થોઽષ્ટમે શ્લોકે વિસ્પષ્ટમભિધીયતે ॥ ૧૮.૨૮૧॥

નિઃશેષ વિક્રિયાહેતુકાલાતિક્રમહેતુતઃ ।
દેવૈરુપાસ્ય ઇત્યેતન્નવમે શ્લોક ઉચ્યતે ॥ ૧૮.૨૮૨॥

ચેતનાચેતનાધાર આત્માસ્ય બ્રહ્મતોચિતા ।
ઇતિ દર્શયિતું શ્લોકં દશમં શ્રુતિરબ્રવીત્ ॥ ૧૮.૨૮૩॥

પ્રાણાદિસઙ્ઘ આત્મા સ્યાદેતસ્ય બ્રહ્મતા કથમ્ ।
ઇત્યાશઙ્ક્યોત્તરં શ્લોક એકાદશ ઉદીર્યતે ॥ ૧૮.૨૮૪॥

તસ્યાસ્ય દર્શનોપાયઃ કઃ સ્યાદિત્યભિચોદિતે ।
શ્લોકેન દ્વાદશેનાહ મનસૈવેતિ નિર્ણયમ્ ॥ ૧૮.૨૮૫॥

અત્યન્તભેદાભાવેઽપિ ભેદાભેદૌ તયોરિતિ ।
મતં વારયિતું શ્લોકસ્ત્રયોદશ ઇહોચ્યતે ॥ ૧૮.૨૮૬॥

બોધાદૂર્ધ્વં ચ કર્તવ્યમસ્તીત્યાશઙ્ક્ય વાર્યતે ।
ચતુર્દશેન શ્લોકેન સઙ્ગ્રહોઽત્ર સમાપ્યતે ॥ ૧૮.૨૮૭॥

મન્ત્રબ્રાહ્મણસઙ્ઘેન યત્તત્ત્વં પ્રાઙ્નિરૂપિતમ્ ।
તદ્વિદ્યા સાધનં સર્વં મુનિરેષ વિવક્ષતિ ॥ ૧૮.૨૮૮॥

તત્રાદૌ વેદતત્ત્વસ્યાનુવાદેન પરિસ્ફુટમ્ ।
નિરૂપ્યતે સ્વરૂપં તત્સ વા ઇત્યાદિવાક્યતઃ ॥ ૧૮.૨૮૯॥

બ્રહ્મત્વાદેવ જીવસ્ય ભ્રાન્તજીવત્વવારણાત્ ।
વશિત્વાદ્યા જીવધર્માઃ શિષ્યન્તે સોઽયમીશ્વરઃ ॥ ૧૮.૨૯૦॥

જીવત્વવદ્વશિત્વાદ્યા યદ્યપિ ભ્રાન્તિકલ્પિતાઃ ।
તથાપ્યેતે સમીચીના સ્વપ્ને પુત્રાન્વયો યથા ॥ ૧૮.૨૯૧॥

અત એવ હિ જિજ્ઞાસું પ્રરોચયિતુમીરિતૈઃ ।
વશિત્વાદ્યૈઃ પ્રેર્યતેઽસૌ યજ્ઞાદૌ જ્ઞાનસાધને ॥ ૧૮.૨૯૨॥

જીવધર્માશ્ચેશધર્માઃ સન્તીત્યેતન્ન મે મતમ્ ।
અસતામેવ તેષાં તુ ભાનં માયિકમિષ્યતે ॥ ૧૮.૨૯૩॥

કાદાચિત્કી સતોઽસત્તેત્યેષ નાશો ન તેષ્વતઃ ।
કાલત્રયાસત્ત્વબોધરૂપો બાધસ્તુ સમ્ભવેત્ ॥ ૧૮.૨૯૪॥

બાધિતા અપિ ભાસન્તે સામગ્રીસમ્ભવે સતિ ।
આરબ્ધાશેષસામગ્રીવિનિવૃત્તૌ ન ભાસનમ્ ॥ ૧૮.૨૯૫॥

નિવૃત્તત્વાજ્જીવધર્મા ભાસન્તે નૈવ કસ્યચિત્ ।
અનિવૃત્તા ઈશધર્મા અકર્માપાદિતત્વતઃ ॥ ૧૮.૨૯૬॥

ભાન્તિ તે ત્વીશ્વરસ્યાપિ બદ્ધાનાં ચ સ્વબુદ્ધિતઃ ।
ઈશ્વરસ્ય હિ લીલા તૈર્બદ્ધાનાં ત્વતિવિસ્મયઃ ॥ ૧૮.૨૯૭॥

સર્વેશ્વરાદિકઃ પૂર્વશેષશ્ચેદુપસંહૃતિઃ ।
ઉત્તરસ્ય તુ શેષત્વે બુભુત્સાવિષયો ભવેત્ ॥ ૧૮.૨૯૮॥

યઃ સર્વેશત્વાદિલક્ષ્યસ્તં વેદાધ્યયનાદિભિઃ ।
જ્ઞાતુમિચ્છત્યવિજ્ઞાતઃ સ એવાર્થો યતસ્તતઃ ॥ ૧૮.૨૯૯॥

બહિરઙ્ગં કર્મજાતં સંન્યાસસ્યાન્તરઙ્ગતા ।
પ્રત્યાસન્નતરાઃ શાન્તિદાન્ત્યાદ્યા ઇત્યસૌ ક્રમઃ ॥ ૧૮.૩૦૦॥

પ્રત્યક્ પ્રવણતાં બુદ્ધેઃ કર્માણ્યુત્પાદ્ય શુદ્ધિતઃ ।
કૃતાર્થાન્યસ્તમાયાન્તિ પ્રાવૃડન્તે ઘના ઇવ ॥ ૧૮.૩૦૧॥

સામર્થ્યમીદૃક્ચેદસ્તિ કર્મણાં તર્હિ કિં તવ ।
જ્ઞાનેનેતિ ન વક્તવ્યં મુનિત્વાર્થમપેક્ષણાત્ ॥ ૧૮.૩૦૨॥

બુભુત્સતેઽયમાત્માનં સર્વૈર્યજ્ઞાદિકર્મભિઃ ।
એતમેવ વિદિત્વાસૌ મુનિર્ભવતિ નાન્યથા ॥ ૧૮.૩૦૩॥

અરુચિપ્રતિબન્ધસ્ય કર્મભિઃ પ્રક્ષયે સતિ ।
ગૃહસ્થો વા પરિવ્રાડ્વા શાસ્ત્રેણાત્માનમીક્ષતે ॥ ૧૮.૩૦૪॥

જનકોષસ્તગાર્ગ્યાદિર્ન સ્યાદ્વેદનામન્યથા ।
સુલભં તુ પરિવ્રાજો બહુવિક્ષેપવર્જનાત્ ॥ ૧૮.૩૦૫॥

સોઢ્વાપિ કર્મવિક્ષેપં ચિત્તૈકાગ્ર્યે ક્ષમો યદિ ।
તદા વેત્તુ ગૃહસ્થોઽપિ પ્રવ્રજત્વન્યથા પુમાન્ ॥ ૧૮.૩૦૬॥

અતો વિદિત્વેતિ વાક્યં સામાન્યવિષયં ભવેત્ ।
પ્રવ્રજન્તીતિ વાક્યં તુ વિશેષેણ પ્રવર્તતે ॥ ૧૮.૩૦૭॥

સકૃદ્બોધો વેદનં સ્યાન્મુનિત્વં જ્ઞાનશીલતા ।
અજ્ઞાનહાનિર્બોધાત્સ્યાજ્જીવન્મુક્તિર્મુનિત્વતઃ ॥ ૧૮.૩૦૮॥

બુદ્ધોઽપિ ન મુનિઃ સ્યાચ્ચેત્વિદ્વત્સંન્યાસમાચરેત્ ।
એતદ્ધસ્મેતિ વાક્યેન તદેતદભિધીયતે ॥ ૧૮.૩૦૯॥

પરિવ્રાડ્ભિર્બુદ્ધ આત્મા કીદૃગિત્યભિશઙ્કિતે ।
સ એષ નેતિ નેતીતિ શ્રુતિઃ પ્રાહોત્સુકા સતી ॥ ૧૮.૩૧૦॥

નનુ ભિક્ષાદિના દેહપોષણાદૌ સમે સતિ ।
આત્મતત્ત્વવિદઃ કોઽતિશયો મૂઢાદિતીર્યતામ્ ॥ ૧૮.૩૧૧॥

સર્વેષામપિ મૂઢાનાં ચિત્તે સ્તઃ પુણ્યપાપયોઃ ।
એતમેવૈકમાત્મજ્ઞં ચિત્તે દ્વે પ્રાપ્નુતો ન હિ ॥ ૧૮.૩૧૨॥

ઉભે ઉહેતિ હેતૂક્તે તચ્ચિન્તાયા અસમ્ભવે ।
અતિક્રામતિ તત્ત્વજ્ઞઃ પુણ્યપાપે ઉભે અપિ ॥ ૧૮.૧૩॥

કૃતે દેહાદિભિર્વાસ્તાં દ્વે કૃતે વા દ્વિધાઽપિ ચ ।
એવં તત્ત્વવિદં તે દ્વે નૈવ તાપયતઃ ક્વચિત્ ॥ ૧૮.૩૧૪॥

અન્તરઙ્ગતરાઃ યે તે શાન્તિદાન્ત્યાદયોઽખિલાઃ ।
વક્તવ્યા ઇત્યભિપ્રેત્ય શ્રુતિસ્તત્ર પ્રવર્તતે ॥ ૧૮.૩૧૫॥

રુચિમાન્ કર્મસંન્યાસી યુક્તઃ શમદમાદિભિઃ ।
મુખ્યાધિકારી ભૂત્વાસાવાત્મન્યાત્માનમીક્ષતે ॥ ૧૮.૩૧૬॥

પુણ્યં ચ જન્મહેતુત્વાદત્ર પાપ્મેતિ વર્ણ્યતે ।
કર્મહાનિઃ પૂર્વમુક્તા યા તસ્યા ઉપસંહૃતિઃ ॥ ૧૮.૩૧૭॥

બ્રહ્મત્વમેવ બ્રાહ્મણ્યમિત્યભિપ્રાયમાત્મનઃ ।
વિશદીકર્તુમાહૈષ બ્રહ્મલોક ઇતીદૃશમ્ ॥ ૧૮.૩૧૮॥

સસાધનાયા વિદ્યાયાઃ સમ્પૂર્ણત્વાદયં નૃપઃ ।

સ્વદેહસહિતં રાજ્યં ગુરવેઽસ્મૈ ન્યવેદયેત્ ॥ ૧૮.૩૧૯॥

આખ્યાયિકાં પરિત્યજ્ય શ્રુતિરસ્મદનુગ્રહાત્ ।
સગુણં નિર્ગુણં બ્રહ્મ સઙ્ક્ષિપ્યોચે સ વા ઇતિ ॥ ૧૮.૩૨૦॥

પૂજાસ્વીકારદાતૃત્વગુણયુક્તં મહેશ્વરમ્ ।
ય ઉપાસ્તે પુમાનેષ યથેષ્ટં લભતે ધનમ્ ॥ ૧૮.૩૨૧॥

વિદ્વદૃષ્ટ્યા સ એવાત્મા જરામરણવર્જિતઃ ।
આનન્દો ભયહીનશ્ચ બ્રહ્મૈવાજો ન ચેતરઃ ॥ ૧૮.૩૨૨॥

ય એવં બ્રહ્મ જાનાતિ તદ્બ્રહ્મૈવ ભવત્યસૌ ।
હિશબ્દોઽશેષવેદાન્તપ્રસિદ્ધં સૂચયેદિહ ॥ ૧૮.૩૨૩॥

જનકાયાત્મવિદ્યૈષા યાજ્ઞવલ્ક્યેન વર્ણિતા ।
તદ્વ્યાખ્યાનેનાનુગૃહ્યાદ્વિદ્યાતીર્થમહેશ્વરઃ ॥ ૧૮.૩૨૪॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
જનકવિદ્યાપ્રકાશો નામાષ્ટાદશોઽધ્યાયઃ ॥ ૧૮॥

## ૧૯. તલવકારવિદ્યાપ્રકાશો નામૈકોનવિંશોઽધ્યાયઃ ।

શાખા તલવકારાણાં સામવેદગતાઽસ્તિ યા ।
વિદ્યોક્તા સઙ્ક્ષેપાત્તાં વિસ્પષ્ટમિહ બ્રુવે ॥ ૧૯.૧॥

તદ્વિદ્ધિ પ્રણિપાતેન પરિપ્રશ્નેન સેવયા ।
ઇત્યર્જુનાય ભગવાનાહ પ્રશ્નાખ્યસાધનમ્ ॥ ૧૯.૨॥

નાપૃષ્ટઃ કસ્યચિદ્બ્રૂયાન્ન ચાન્યાયેન પૃચ્છતઃ ।
જાનન્નપિ તુ મેધાવી જડવલ્લોકમાચરેત્ ॥ ૧૯.૩॥

ઇતિ શાસ્ત્રમવેક્ષ્યાત્ર કશ્ચિચ્છિષ્યગુણાન્વિતઃ ।
ઉપસદ્ય ગુરું સમ્યગપ્રાક્ષીદાત્મબુદ્ધયે ॥ ૧૯.૪॥

મનઃ પ્રાણૌ શ્રોત્રચક્ષુર્વાચશ્ચ વપુષિ સ્થિતાઃ ।
પ્રવર્તન્તે સ્વસ્વકાર્યે વિદ્યતે પ્રેરકો ન વા ॥ ૧૯.૫॥

ન ચેત્તર્હિ જડત્વેન પ્રવૃત્તિર્મન આદિષુ ।
ન સ્યાદ્વિના પ્રેરકેણ શકટાદ્યપ્રવૃત્તિતઃ ॥ ૧૯.૬॥

ચૈતન્યમિન્દ્રિયાણાં ચેદ્બ્રહ્માસત્વં પ્રસજ્યતે ।
ઇન્દ્રિયેભ્યશ્ચેતનોઽન્યઃ પ્રેરકોઽભ્યુપગમ્યતામ્ ॥ ૧૯.૭॥

ઇન્દ્રિયૈઃ સાધનૈર્જીવો યઃ કર્તાઽસૌ પ્રવર્તકઃ ।
ઇતિ ચેન્ન યતો જીવે પારતન્ત્ર્યમવેક્ષ્યતે ॥ ૧૯.૮॥

વ્યાપારમિન્દ્રિયોત્થાનં ન કરિષ્યેઽમુમિત્યયમ્ ।
સઙ્કુલ્પ્યાપિ કરોત્યેવ ભૂતાવિષ્ટ ઇવાતુરઃ ॥ ૧૯.૯॥

ઇન્દ્રિયાધિષ્ઠાતૃદેવા ન સ્વતન્ત્રા યથા વયમ્ ।
ધર્માધર્માત્મકં કર્મ ન સ્વતન્ત્ર જડત્વતઃ ॥ ૧૯.૧૦॥

તસ્માત્કેન પ્રેરિતં સદ્વિષયાન્મનુતે મનઃ ।
કર્તુમુચ્છ્વાસનિશ્વાસૌ પ્રાણઃ કેન પ્રણીયતે ॥ ૧૯.૧૧॥

વાક્ચક્ષુશ્રોત્રમુખ્યાનિ પ્રેરયેત્કરણાનિ કઃ ।
ઈશ્વરશ્ચેત્કિમેકોઽસૌ બહવોઽમીત્યુતેર્યતામ્ ॥ ૧૯.૧૨॥

પ્રવર્ત્યાનામનન્તત્વાદ્વૈલક્ષણ્યાચ્ચ નૈકતા ।
નૈકમત્યં બહુત્વે સ્યાદ્બહુરાજકદેશવત્ ॥ ૧૯.૧૩॥

ઉક્તદોષનિવૃત્ત્યર્થં ગુરુર્વચનમબ્રવીત્ ।
શ્રોત્રસ્ય શ્રોત્રમિત્યાદિ તદર્થસ્તુ વિવિચ્યતે ॥ ૧૯.૧૪॥

અન્તર્યામ્યેક એવેશઃ સ ચ સર્વં નિયચ્છતિ ।
અધીયન્તે પૃથિવ્યાદૌ સ્થિતં વાજસનેયિનઃ ॥ ૧૯.૧૫॥

સ્થિત્વા મનસ્યાન્તરોઽસ્માજ્જ્ઞાયતે મનસા ન સઃ ।
મનસ્તસ્ય શરીરં સ્યાન્નિયચ્છત્યાન્તરો મનઃ ॥ ૧૯.૧૬॥

એવં શ્રુતઃ સ સર્વેષુ પ્રાણવાગાદિવસ્તુષુ ।
અન્તઃ પ્રવિષ્ટઃ શાસ્તાઽયમિતિ શ્રુત્યન્તરં જગૌ ॥ ૧૯.૧૭॥

સત્યં જ્ઞાનમનન્તં યદ્બ્રહ્મ વેદેષુ વર્ણિતમ્ ।
તદેવ માયાસંયોગાદીશ્વરત્વં પ્રપદ્યતે ॥ ૧૯.૧૮॥

માયાં તુ પ્રકૃતિં વિદ્યાન્માયિનં તુ મહેશ્વરમ્ ।
પરાઽસ્ય શક્તિર્વિવિધા તા માયાશક્તયોઽખિલાઃ ॥ ૧૯.૧૯॥

માયાભિરીશો બહુધા ભાતિ સર્વેષુ વસ્તુષુ ।
શ્રોત્રશક્તિમુપાદાય શ્રોત્રં સૃષ્ટ્વાઽત્ર ભાત્યસૌ ॥ ૧૯.૨૦॥

યેન શબ્દઃ શ્રૂયતે તચ્છ્રોત્રં શ્રોત્રત્વમસ્ય યત્ ।
તસ્યેશશક્ત્યા સૃષ્ટત્વાચ્છ્રોત્રસ્ય શ્રોત્રમીશ્વરઃ ॥ ૧૯.૨૧॥

વ્યાકૃતાઽવ્યાકૃતાકારૌ યૌ શ્રોત્રસ્ય તયોરિદમ્ ।
શ્રોત્રં વ્યાકૃત આકારઃ શક્તિરવ્યાકૃતામિધા ॥ ૧૯.૨૨॥

તચ્છક્ત્યુપહિતત્વેન બ્રહ્માપિ શ્રોત્રમુચ્યતે ।
શ઼ૃણોત્યકર્ણ ઇત્યુક્તં શ્રોત્રશક્તિયુતત્વતઃ ॥ ૧૯.૨૩॥

ષષ્ઠ્યન્તં કરણં તસ્ય પ્રથમાન્તં પ્રવર્તકમ્ ।
મનસો મન ઇત્યાદાવયં ન્યાયઃ સમીક્ષ્યતામ્ ॥ ૧૯.૨૪॥

એકત્વેઽપીશ્વરસ્યેત્થં તચ્છક્તીનાં બહુત્વતઃ ।
વિલક્ષણાનન્તવસ્તુપ્રેરણં સમ્ભવિષ્યતિ ॥ ૧૯.૨૫॥

અક્ષાધિષ્ઠાતૃદેવેષુ જીવેષ્વક્ષેષુ ચેશ્વરઃ ।
અન્તર્યામિતયા સ્થિત્વા નિયચ્છતિ યથાતથમ્ ॥ ૧૯.૨૬॥

શક્તૌ ચિદાભાસવત્યાં સ્થિતા નિયમનક્રિયા ।
તદધિષ્ઠાનચૈતન્યે નિયન્તૃત્વં પ્રકલ્પિતમ્ ॥ ૧૯.૨૭॥

નિયન્તૃત્વોપાધિના યઃ પરમાત્મોપલક્ષિતઃ ।
તમિન્દ્રિયનિરોધેન ધીરાઃ પશ્યન્તિ યોગિનઃ ॥ ૧૯.૨૮॥

અદર્શને ત્વહઙ્કારતાદાત્મ્યં ચિતિ કલ્પ્યતામ્ ।
તાદાત્મ્યાધ્યાસતો જીવો ભૂત્વાઽસૌ બન્ધમાપ્નુયાત્ ॥ ૧૯.૨૯॥

અધ્યાસવારિકા બુદ્ધિર્યેષાં ધીરાસ્ત ઈરિતાઃ ।
બન્ધાન્મુક્ત્વા વપુસ્ત્યક્ત્વા તે સ્યુર્મરણવર્જિતાઃ ॥ ૧૯.૩૦॥

ઐક્યભ્રાતિર્બન્ધકૃત્સ્યાદહઙ્કારચિદાત્મનોઃ ।
તદ્વિવેકે કુતો બન્ધઃ શરીરં ચાત્મનઃ કુતઃ ॥ ૧૯.૩૧॥

દેહપ્રાણવિયોગઃ સ્યાન્મરણં યસ્ય તૌ ન હિ ।
તદ્વિયોગઃ કથં તસ્ય ચિદેકરસવસ્તુનઃ ॥ ૧૯.૩૨॥

બન્ધો દેહો મૃતિર્બોધમાત્રાચ્ચેત્સન્તિ નો તદા ।
સર્વે બુધ્વા નિજાત્માનં કૃતકૃત્યાઃ કુતો નહિ ॥ ૧૯.૩૩॥

ગુરૂપદેશરહિતા આત્માનં બોદ્ધુમક્ષમાઃ ।

ચક્ષુર્વાગાદયો યસ્માન્ન ગચ્છતિ ચિદાત્મનિ ॥ ૧૯.૩૪॥

ચક્ષુર્ન ગચ્છેન્નીરૂપે વાગવાચ્યં કથં વદેત્ ।
અવિકલ્પમસઙ્કલ્પ ગૃહીતું ન મનોઽર્હતિ ॥ ૧૯.૩૫॥

એવં સતિ કથં યૂયં જાનીથ મનસેતિ ચેત્ ।
આચાર્યનિરપેક્ષેણ ન વિદ્મો મનસા વયમ્ ॥ ૧૯.૩૬॥

આચાર્યોઽપિ કથં બ્રૂયાદવાચ્યામિતિ ચેદ્યથા ।
બોધયેદમિધાવૃત્ત્યા તં પ્રકારં ન વેદ્મ્યહમ્ ॥ ૧૯.૩૭॥

ષષ્ઠીગુણક્રિયાનાતિરૂઢયઃ શબ્દહેતવઃ ।
નાત્મન્યન્યતમોઽમીષાં તેનાત્મા નાભિધીયતે ॥ ૧૯.૩૮॥

ઈદૃશં યૂયમાચાર્યાચ્છ્રુતવન્તઃ કથં ત્વિતિ ।
બ્રૂષે ચેચ્છુશ્રુમાત્માનમતદ્વ્યાવૃત્તિતો વયમ્ ॥ ૧૯.૩૯॥

જ્ઞાતં ચાજ્ઞાતમિત્યેવ જગદ્વૈધાવભાસતે ।
તસ્યોભયસ્ય વ્યાવૃત્ત્યા પરમાત્માવશિષ્યતે ॥ ૧૯.૪૦॥

ધીવૃત્તિવિષયીકૃત્ય યદ્ઘટાદ્યવભાસયેત્ ।
વિદિતં તદ્યત્ર નો ધીસ્તત્સ્યાદવિદિતં ખલુ ॥ ૧૯.૪૧॥

જ્ઞાતાજ્ઞાતે સાક્ષિભાસ્યે સ સાક્ષી ભાસતે સ્વયમ્ ।
જ્ઞાતાજ્ઞાતપરિત્યાગે સાક્ષિશેષો હ્યતિસ્ફુટઃ ॥ ૧૯.૪૨॥

વેદ્મીતિ યદ્બલાદાત્થ ન વેદ્મીત્યપિ યદ્બલાત્ ।
તદન્યનિરપેક્ષં સદ્ભાતીત્યસ્મદ્ગુરોર્વચઃ ॥ ૧૯.૪૩॥

અજ્ઞાતજ્ઞાતયોઃ સાક્ષી બ્રહ્મેત્યેવં વિધાતુ ધીઃ ।
અજ્ઞાનં નાશયત્યેવ ન બ્રહ્મ સ્ફોરયત્યસૌ ॥ ૧૯.૪૪॥

સ્વતઃ સ્ફુરણરૂપેઽસ્મિન્ કિમન્યત્સ્ફુરણં ભવેત્ ।
સ્ફોર્યત્વાભાવતસ્તસ્ય ન મનોગમ્યતા ભવેત્ ॥ ૧૯.૪૫॥

અવાઙ્મનસગમ્યં તદાચાર્યેણોપદિશ્યતે ।
શિષ્યેણ બુધ્યતે ચેત્થં ન કિઞ્ચિન્નોપપદ્યતે ॥ ૧૯.૪૬॥

યન્નાભિધીયતે વાચા વાગ્યેન પ્રેર્યતે સદા ।
બ્રહ્મ વિદ્ધિ તદેવ ત્વં ન ત્વિદં યદુપાસતે ॥ ૧૯.૪૭॥

ઉપાસકાસ્તુ સર્વજ્ઞસર્વશક્ત્યાદિશબ્દતઃ ।
વાચ્યં સ્વભિન્નં ધ્યાયન્તિ ન મુખ્યં બ્રહ્મતદ્ભવેત્ ॥ ૧૯.૪૮॥

સ્ફોર્યતે મનસા યન્ન સ્ફોરકં મનસસ્તુ યત્ ।
તદ્બ્રહ્મ વિદ્ધિ ન ત્વેતદ્યત્તુ સ્ફોર્યમુપાસતે ॥ ૧૯.૪૯॥

ભાવનાજન્યવૃત્ત્યૈવ સ્ફોર્યં ધ્યાયન્ત્યુપાસકાઃ ।
ઉપાસકેન દૃશ્યં તદ્બ્રહ્મ મુખ્યં કથં ભવેત્ ॥ ૧૯.૫૦॥

ન દૃશ્યતે ચક્ષુષા યચ્ચક્ષુષો ભાસકં તુ યત્ ।
તદ્બ્રહ્મ વિષ્ણુમૂર્ત્યાદિર્ન મુખ્યબ્રહ્મતાઽસ્તિ હિ ॥ ૧૯.૫૧॥

ન શ્રૂયતે યચ્છ્રોત્રસ્ય સાક્ષી યદ્બ્રહ્મ તદ્ભવેત્ ।
શ્રુતં પ્રણવનામાદિ ન મુખ્યબ્રહ્મતામિયાત્ ॥ ૧૯.૫૨॥

ન પ્રેર્યતે યત્પ્રાણેન પ્રાણસ્ય પ્રેરકં તુ યત્ ।
તદ્બ્રહ્મ ન તુ હંસાખ્યમન્ત્રઃ પ્રાણપ્રચોદિતઃ ॥ ૧૯.૫૩॥

અન્યૈરપીન્દ્રિયૈર્ગમ્યં કિન્ત્વક્ષભાસકમ્ ।
બ્રહ્મવિદ્ધિ તદેવ ત્વં ન ત્વિદં યદુપાસતે ॥ ૧૯.૫૪॥

સર્વપ્રત્યયવેદ્યં યત્સોપાધિ બ્રહ્મ વિદ્યતે ।
ઉપાસકાત્પૃથગ્ભૂતં તદેવોપાસતે જનાઃ ॥ ૧૯.૫૫॥

બ્રહ્માભાસમિદં રૂપમુપેક્ષ્યાનિદમાત્મકમ્ ।
મુખ્યબ્રહ્મૈવ સાક્ષ્યાખ્યં જ્ઞાત્વા સ્વાનુભવં વદ ॥ ૧૯.૫૬॥

ત્વત્કારુણ્યાત્સુષ્ઠુ વેદ બ્રહ્માહમિતિ વક્ષિ ચેત્ ।
અલ્પં વેત્સિ ન સમ્પૂર્ણં જ્ઞાતૃજ્ઞેયવિભેદતઃ ॥ ૧૯.૫૭॥

અખણ્ડૈકરસે તત્ત્વે જ્ઞાતૃત્વં પ્રત્યગાત્મનઃ ।
દેવસ્ય બ્રહ્મતેત્યેવં ખણ્ડનાદલ્પવેદનમ્ ॥ ૧૯.૫૮॥

મીમાંસ્યમેવ તેઽથાપિ ભેદભ્રમનિવૃત્તયે ।
મીમાંસિત્વા નિશ્ચયં તે વદેત્યુક્તસ્તથાઽકરોત્ ॥ ૧૯.૫૯॥

ભેદભ્રમો નિવૃત્તોઽદ્ય યથાશાસ્ત્રં વિચારતઃ ।
સુવેદેતિ ન વેદેતિ દ્વાભ્યાં હીનં તુ શેષિતમ્ ॥ ૧૯.૬૦॥

સ્વપ્રકાશં તમાત્માનં તથાત્વેનૈવ વેદ્મ્યહમ્ ।
નાન્યથાઽતો યથાશાસ્ત્રં બુદ્ધં બ્રહ્મેતિ નિશ્ચયઃ ॥ ૧૯.૬૧॥

સુવેદેત્યક્ષવિષયે ન વેદેત્યપ્યભાસિતે ।
વક્તું યુક્તં સ્વયં ભાતે કથં તદ્યુજ્યતે દ્વયમ્ ॥ ૧૯.૬૨॥

મધ્યેઽસ્માકં હે સખાયો જ્ઞાતાજ્ઞાતત્વવર્જિતમ્ ।
બ્રહ્મેતિ વેત્તિ યોઽસૌ હિ યથાશાસ્ત્રં વિબુદ્ધવાન્ ॥ ૧૯.૬૩॥

યલ્લૌકિકં વસ્તુ યચ્ચ બ્રહ્મ તદ્ધિ વિલક્ષણમ્ ।
યસ્યામતં તસ્ય મતં મતં યસ્ય ન વેદ સઃ ॥ ૧૯.૬૪॥

લોકે ઘટો મતો યેન સ ઘટજ્ઞ ઇતીર્યતે ।
યેન મન્ત્રા મતં બ્રહ્મ ન ત્વસૌ બ્રહ્મવિદ્ભવેત્ ॥ ૧૯.૬૫॥

મન્તૃમન્તવ્યરૂપેણ વિવિધત્વં વિજાનતા ।
અવિજ્ઞાતં બ્રહ્મતત્ત્વમખણ્ડૈકરસાત્મકમ્ ॥ ૧૯.૬૬॥

વિવિધત્વમવિજ્ઞાય યદખણ્ડત્વવેદનમ્ ।
તદ્ભવેબ્રહ્મવિજ્ઞાનં ધીમદ્ભિર્બુધ્યતાં તથા ॥ ૧૯.૬૭॥

ઈદૃશઃ પ્રતિબોધો યસ્તેન ચેદ્વિદિતં તદા ।
મતં બ્રહ્મ ભવેદ્વિદ્વાનમૃતત્વં હિ વિન્દતે ॥ ૧૯.૬૮॥

નિત્યાનિત્યવિવેકાદિયુક્તે ન મનસા પુમાન્ ।
વેદિતું લભતે વીર્યં વિદ્યયા વિન્દતેઽમૃતમ્ ॥ ૧૯.૬૯॥

દેહે પ્રાણવિયોગાખ્યા મૃતિરાત્મનિ કલ્પિતા ।
અવિદ્યયા વિદ્યયા તુ ભ્રાન્તિઃ સા વિનિવર્તતે ॥ ૧૯.૭૦॥

નૈવ જન્મનિ સર્વસ્મિન્ વિદ્યાસૌ સુલભાઽપિ તુ ।
શિષ્યલક્ષણસમ્પૂર્ણજન્મન્યેવ હિ લક્ષ્યતે ॥ ૧૯.૭૧॥

ઈશ્વરાનુગ્રહાચ્છાન્તિદાન્ત્યાદિગુણસંયુતમ્ ।
જન્મ ચેલ્લભતે તસ્મિન્વિદ્યયા મોક્ષમાપ્નુયાત્ ॥ ૧૯.૭૨॥

નાવેદિ ચેદિહાલસ્યાદ્વિનષ્ટિર્મહતી ભવેત્ ।
કદાચિજ્જન્મ પશ્વાદિરૂપં સ્યાદિતિ વેત્તિ કઃ ॥ ૧૯.૭૩॥

તસ્માચ્છાસ્ત્રાધિકારેણ યુક્તં વિપ્રાદિજન્મ ચેત્ ।
લભ્યમાનસ્ય રહિતો વિદ્યાદાત્માનમદ્વયમ્ ॥ ૧૯.૭૪॥

નાનાત્મત્વભ્રમોચ્છિત્ત્યૈ તત્તદ્દેહેષ્વવસ્થિતમ્ ।

સ્વાત્મત્વેનૈવ નિશ્ચિત્ય ધીરા યાન્તિ કૃતાર્થતામ્ ॥ ૧૯.૭૫॥

માયયા દૃશ્યતે લોકો યેઽસ્માત્પ્રેત્ય સ્થિતાઃ પરે ।
ન તેષાં જન્મમરણે વિદ્યેતે કર્હિચિત્ક્વચિત્ ॥ ૧૯.૭૬॥

ઈશ્વરાનુગ્રહાદેવ ભવેદદ્વૈતવાસના ।
નાન્યથેતિ વિવક્ષિત્વા કાચિદાખ્યાયિકોચ્યતે ॥ ૧૯.૭૭॥

દેવાર્થમીશ્વરો યુદ્ધે વિજયં કુરુતે સદા ।
અજ્ઞાત્વાઽનુગ્રહં દેવા જયગર્વં પ્રપેદિરે ॥ ૧૯.૭૮॥

જયઃ સ્વકીય ઇત્યેવં દેવાભિપ્રાયમીશ્વરઃ ।
જ્ઞાત્વા દેવાન્ બોધયિતું તેષાં પ્રાદુર્બભૌ પુરઃ ॥ ૧૯.૭૯॥

દેવાઃ સભાસદો દૃષ્ટ્વા વપુરૈશમલૌકિકમ્ ।
કિમેતદિતિ વિજ્ઞાતું પ્રૈરયન્તાગ્નિમન્તિકે ॥ ૧૯.૮૦॥

સમાગતં વહ્નિમીશઃ કો ભવાનિતિ પૃષ્ટવાન્ ।
જાતવેદોઽગ્નિનામાહમિતિ ગર્વિતવાનસૌ ॥ ૧૯.૮૧॥

ત્વયિ કિં વીર્યમિત્યાહ ગર્વં ભઙ્ક્તું પરેશ્વરઃ ।
અગ્નિઃ સર્વં દહામીતિ વાક્યં ગર્વાદબોચત ॥ ૧૯.૮૨॥

સ્વદત્તાં શક્તિમાહૃત્ય દહેતિ તૃણમિત્યમુમ્ ।
ઉવાચેશઃ સોઽપિ દગ્ધું ન શશાકૈવ તત્તૃણમ્ ॥ ૧૯.૮૩॥

અગ્નિવત્વાયુરપ્યત્ર ગર્વે ભગ્ને નિવૃત્તવાન્ ।
નિર્ગર્વમિન્દ્રં દૃષ્ટ્વેશઃ પરીક્ષાયૈ તિરોભવત્ ॥ ૧૯.૮૪॥

ઇન્દ્ર ઈશપ્રસાદાર્થી તસ્થાવૂર્ધ્વં વિલોકયન્ ।
અનુગ્રહીતુમિન્દ્રં તમુમારૂપોઽભવદ્ધરઃ ॥ ૧૯.૮૫॥

દેવિ દૃષ્ટં પુરા દેવૈઃ કિં બ્રૂહીતિ પૃષ્ટવાન્ ।
તદ્બ્રહ્માનુગ્રહાત્તસ્ય જયોઽભૂદિત્યુવાચ સા ॥ ૧૯.૮૬॥

ઉત્કૃષ્ટા અભિવાય્વિન્દ્રા ઈષત્સમ્ભાષણાદમી ।
તેષામપીન્દ્રઃ પુણ્યાત્માઽનુગ્રહોઽપ્યધિકો યતઃ ॥ ૧૯.૮૭॥

ઈશાનુગ્રહસિદ્ધ્યર્થં બ્રહ્મોપાસ્યં મુમુક્ષુભિઃ ।
તચ્ચાધિદૈવમધ્યાત્મમધિભૂતમુપાસ્યતામ્ ॥ ૧૯.૮૮॥

આવિર્ભાવતિરોભાવૌ વિદ્યુદ્વદ્બ્રહ્મણિ સ્થિતૌ ।
તતો વિદ્યુદુપાધ્યેતદ્બ્રહ્મ સ્યાદધિદૈવતમ્ ॥ ૧૯.૮૯॥

મનોઽધ્યાત્મમુપાધિઃ સ્યાત્સ્મૃતિસઙ્કલ્પસંયુતમ્ ।
તદ્વનેતિ બ્રહ્મ નામ તન્નામકમુપાસ્યતામ્ ॥ ૧૯.૯૦॥

યત્તૈઃ સમ્ભજનીયં તદ્ભવેત્તદ્વનનામકમ્ ।
તથૈવોપાસિતં બ્રહ્મ દદ્યાદાચાર્યસમ્પદમ્ ॥ ૧૯.૯૧॥

તદુપાસકમીશાનુગૃહીતં બ્રહ્મવેદિનમ્ ।
વાઞ્છન્તિ વિદ્યાં બ્રૂહીતિ ભક્તિમન્તોઽખિલા જનાઃ ॥ ૧૯.૯૨॥

હે શિષ્ય બ્રહ્મવિદ્યા તે કથિતાઽત્યન્તવિસ્તરાત્ ।
શ્રોત્રસ્ય શ્રોત્રમિત્યાદેસ્તદ્વિદ્યાસાધનં શૃણુ ॥ ૧૯.૯૩॥

વેદાઃ ષડઙ્ગસહિતા અગ્નિહોત્રાદિ કર્મ ચ ।
કૃચ્છ્રાદિકં તપો દાન્તિસ્તૈર્વિદ્યા પ્રતિતિષ્ઠતિ ॥ ૧૯.૯૪॥

યત્સત્યં બાધરહિતં તદ્વિદ્યાયતનં ખલુ ।
સાધનૈઃ સાધિતા વિદ્યા સત્યેઽસ્મિન્ પર્યવસ્યતિ ॥ ૧૯.૯૫॥

અજર્યતે સુષ્ઠુ યન્મુક્તિપદં તત્સ્વર્ગ ઉચ્યતે ।
અનન્તો નાશરાહિત્યાજ્જ્યેષ્ઠઃ સર્વોત્તમત્વતઃ ॥ ૧૯.૯૬॥

મુખ્યાધિકારિણઃ પ્રષ્ટુઃ શિષ્યસ્ય બ્રહ્મબોધનમ્ ।
સસાધનં સદાચાર્યઃ એવમત્રોપદિષ્ટવાન્ ॥ ૧૯.૯૭॥

વિદ્યામેતાં વેદ યોઽસૌ પાપ્માનં પ્રતિબન્ધકમ્ ।
અપહત્ય વિમુક્ત્યાખ્યે સ્વર્ગેઽસ્મિન્ પ્રતિતિષ્ઠતિ ॥ ૧૯.૯૮॥

અવાઙ્મનસગમ્યત્વમુપદેશશ્ચ વેદનમ્ ।
અવિરોધેન તત્સર્વં વિસ્પષ્ટમિહ વર્ણિતમ્ ॥ ૧૯.૯૯॥

વિદ્યા તલવકારાણાં શાખાયાં શ્રૂયતે સ્ફુટમ્ ।
તદ્વ્યાખ્યાનેન સન્તુષ્યાદ્વિદ્યાતીર્થમહેશ્વરઃ ॥ ૧૯.૧૦૦॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
તલવકારવિદ્યાપ્રકાશો નામૈકોનવિંશોઽધ્યાયઃ ॥ ૧૯॥

## ૨૦. દેવવિદ્યાખ્યો નૃસિંહતાપિનીવિવરણો નામ વિંશોઽધ્યાયઃ ।

આથર્વણે તાપિનીયે ઉત્તરસ્મિન્ પ્રજાપતિઃ ।
દેવાનબૂબુધન્મન્ત્રરાજપ્રણવમાર્ગતઃ ॥ ૨૦.૧॥

મન્ત્રરાજં પૂર્વતાપનીયં શ્રુત્વા તદા ધિયા ।
ધ્યાયતઃ સગુણં બ્રહ્મ દેવા ધીશુદ્ધિમાપ્નુવન્ ॥ ૨૦.૨॥

તતસ્તે નિર્ગુણં બ્રહ્મ પપ્રચ્છુઃ શુદ્ધબુદ્ધયઃ ।
અણોરણીયાન્યઃ પ્રત્યઙ્ પ્રણવે તં વદ પ્રભો ॥ ૨૦.૩॥

પરમાણોર્યોગિનેત્રગમ્યં રૂપં યદસ્તિ તત્ ।
પ્રતીચો નાસ્ત્યતઃ પ્રત્યઙ્ઙણીયાન્ પરમાણુતઃ ॥ ૨૦.૪॥

ઓઙ્કારો વાચકસ્તસ્ય પ્રતીકં વેતિ હિ શ્રુતમ્ ।
ઓઙ્કારેણાત્મનો ધ્યાનં વદાસ્મભ્યં સવિસ્તરમ્ ॥ ૨૦.૫॥

શ્રૂયતામયમોઙ્કારો નિઃશેષજગદાત્મકઃ ।
ઇતિ ધ્યાત્વા બ્રહ્મ સર્વમાત્મા બ્રહ્મેતિ વૈ સ્મરેત્ ॥ ૨૦.૬॥

યદોઙ્કારસ્ય સાર્વાત્મ્યં ધ્યાનાયૈતન્ન વસ્તુતઃ ।
યદ્બ્રહ્મણસ્તુ સાર્વાત્મ્યં વસ્તુતોઽપ્યેતદીક્ષ્યતામ્ ॥ ૨૦.૭॥

બ્રહ્મ સ્યાત્સચ્ચિદાનન્દરૂપં સર્વેષુ વસ્તુષુ ।
વિદ્યતે સચ્ચિદાનન્દા ઇતિ હ્યૂર્ધ્વં પ્રવક્ષ્યતે ॥ ૨૦.૮॥

દેહેન્દ્રિયાદિસાક્ષી ય આત્માઽસ્મિન્ બ્રહ્મરૂપતામ્ ।
સચ્ચિદાનન્દરૂપત્વાદસંસારિણિ યુજ્યતે ॥ ૨૦.૯॥

દેહાદ્યુપાધિસમ્બન્ધાત્સંસારિત્વં ચિદાત્મનઃ ।
સ્વતઃ સોઽયમસંસારી બ્રહ્મત્વં યુજ્યતે તતઃ ॥ ૨૦.૧૦॥

ઓમિત્યુચ્ચારયન્ધ્યાતા સ્વાત્માનં બ્રહ્મણા સહ ।
એકીકૃત્ય પુનર્બ્રહ્માપ્યેકીકુર્યાત્તથાત્મના ॥ ૨૦.૧૧॥

તથા હંસઃ સોઽહમિતિ વ્યતિહારોઽત્ર લક્ષ્યતે ।
વિચિન્ત્યાન્યોઽન્યતાદાત્મ્યં તથૈવાનુભવેદિદમ્ ॥ ૨૦.૧૨॥

બુદ્ધિસ્તદાકૃતિં કૃત્વા યાવન્નૈશ્ચલ્યમાપ્નુયાત્ ।
તાવદ્ભવેદનુભવો જરામરણવર્જિતે ॥ ૨૦.૧૩॥

ચલિતાનુભવાદ્બુદ્ધિર્બહિશ્ચેદ્ગન્તુમુદ્યતા ।
તદા બાહ્યનિવૃત્ત્યર્થં કુર્યાદારોપસંહૃતી ॥ ૨૦.૧૪॥

સ્થૂલં સૂક્ષ્મં કારણં ચ શરીરત્રયમાત્મનિ ।
માયયાઽઽરોપિતં ધ્યાત્વા બોધાલ્લીનમિતિ સ્મરેત્ ॥ ૨૦.૧૫॥

તદાઽપ્યોઙ્કારમુચ્ચાર્ય નાદાન્તે નિર્વિકલ્પકમ્ ।
ચિત્તં કૃત્વા યથાશક્તિ સ્વાત્મતત્ત્વે સ્થિરો ભવેત્ ॥ ૨૦.૧૬॥

નિર્ગતે તુ પુનશ્ચિત્તેઽધિદૈવાધ્યાત્મભેદતઃ ।
યદ્દેહત્રયમસ્ત્યેતદભેદેનૈવ ચિન્તયેત્ ॥ ૨૦.૧૭॥

અણ્ડસૂત્રાવ્યાકૃતાખ્યા દેહાઃ સ્યુરધિદૈવતમ્ ।
પિણ્ડલિઙ્ગાજ્ઞાનરૂપમધ્યાત્મં વપુષાં ત્રયમ્ ॥ ૨૦.૧૮॥

સ્થૂલસૂક્ષ્મૈક્યરૂપત્વમુભયત્ર ક્રમાત્રિષુ ।
અસ્તિ સામ્યમભેદોઽત ઉભયોરિહ ચિન્ત્યતામ્ ॥ ૨૦.૧૯॥

વિરાડ્ઢિરણ્યગર્ભેશા અધિદૈવં હિ દેહિનઃ ।
વિશ્વશ્ચ તૈજસઃ પ્રાજ્ઞો હ્યધ્યાત્મમપિ દેહિનઃ ॥ ૨૦.૨૦॥

સ્થૂલસૂક્ષ્માનન્દભુજઃ ક્રમાત્તે દેહિનસ્ત્રયઃ ।
એતત્સર્વં સ્ફુટીકર્તું ચતુષ્પાત્પ્રવિવિચ્યતે ॥ ૨૦.૨૧॥

ઇન્દ્રિયૈર્વિષયજ્ઞાનં યત્તજ્જાગરિતં ભવેત્ ।
તત્ર સ્થિત્વા જગત્સ્થૂલં વેત્ત્યાત્મા તત્તદિન્દ્રિયૈઃ ॥ ૨૦.૨૨॥

શિરશ્ચક્ષુર્મુખં પ્રાણો મધ્યં બસ્તિસ્તતોઽપ્યધઃ ।
ઇત્યઙ્ગસપ્તકં વૈશ્વાનરોપાસ્તિશ્રુતૌ શ્રુતમ્ ॥ ૨૦.૨૩॥

જ્ઞાનકર્મેન્દ્રિયપ્રાણભેદાઃ પઞ્ચદશેરિતાઃ ।
ચતુર્વિધાન્તઃકરણં મુખ્યાન્યેકોનવિંશતિઃ ॥ ૨૦.૨૪॥

સ્થૂલમિન્દ્રિયગમ્યં યત્તદ્ભુઙ્ક્તેઽસૌ ચતુર્વિધઃ ।
જાગરે જાગરસ્વપ્નસુપ્તિતુર્યાખ્યભેદતઃ ॥ ૨૦.૨૫॥

જાગરો વ્યવહારોઽક્ષૈઃ સ્વપ્નો માનસચિન્તનમ્ ।
તૂષ્ણીંસ્થિતિઃ સુષુપ્તિઃ સ્યાત્તૃપ્તત્વં તુર્યમુચ્યતે ॥ ૨૦.૨૬॥

અધ્યાત્મમધિદૈવં ચ વિશ્વવૈશ્વાનરાભિધઃ ।
ઈદૃશઃ પ્રથમઃ પાદ આત્મનઃ સ્યાચ્ચતુષ્પદઃ ॥ ૨૦.૨૭॥

ઇન્દ્રિયાણામુપરમે ધિયા જાગવાસનામ્ ।
સૂક્ષ્માં જાનન્વાસનાત્મા સપ્તાઙ્ગાદિયુતો ભવેત્ ॥ ૨૦.૨૮॥

સ્પષ્ટસ્મૃતિરવિસ્પષ્ટસ્મૃતિરિત્યપિ ।
સ્વપ્રભેદાઃ સ્વપ્નમધ્યે જાગ્રત્સ્વપ્નસુષુપ્તયઃ ॥ ૨૦.૨૯॥

સ્વપ્નેઽપિ તુર્યં તૃપ્તત્વં જાગ્રતીવાનુભૂયતે ।
હિરણ્યગર્ભોઽધિદૈવમધ્યાત્મં તૈજસાભિધઃ ॥ ૨૦.૩૦॥

દ્વિતીયઃ પાદ એષ સ્યાદાત્મનોઽસ્ય ચતુષ્પદઃ ।
ધિયો લયે સુષુપ્તિસ્થ એકોઽભૂદ્દ્વૈતલોપનાત્ ॥ ૨૦.૩૧॥

ધીવૃત્તિરૂપાઃ પ્રજ્ઞાસ્તા એકીભાવમુપાગતાઃ ।
દુઃખહાન્યાનન્દમયો ભુઙ્ક્તે બ્રહ્મસુખં તદા ॥ ૨૦.૩૨॥

અવિદ્યાવૃત્ત્યવચ્છિન્નં ચૈતન્યં ભોગસાધનમ્ ।
સુષુપ્તૌ ચતુરાત્મત્વં જાગરાદિવિભેદતઃ ॥ ૨૦.૩૩॥

તન્દ્રામધ્યાપયેદ્વાચા તદા સ્યાત્સુપ્તિજાગરઃ ।
ધ્યાનાભ્યાસસ્તુ યસ્તન્દ્રાં સુપ્તિઃ સ્વપ્નઃ સ ઉચ્યતે ॥ ૨૦.૩૪॥

ગાઢનિદ્રઃ સુપ્તસુપ્તિઃ સુપ્તિતુર્યં સુખોદ્ભવઃ ।
અધ્યાત્મં પ્રાજ્ઞ એવં સ્યાદધિદૈવં તથેશ્વરઃ ॥ ૨૦.૩૫॥

તૃતીયઃ પાદ ઇત્યુક્તઃ આત્મનોઽસ્ય ચતુષ્પદઃ ।
પાદત્રયમિદં માયામાત્રં સ્યાન્ન તુ તાત્ત્વિકમ્ ॥ ૨૦.૩૬॥

સુષુપ્તિસ્વપ્નનામભ્યાં તત્ત્વવિદ્વક્તિ તત્ત્રયમ્ ।
તત્ત્વાવૃતે સુપ્તસુપ્તં સ્વપ્નતા ત્વન્યથેક્ષણાત્ ॥ ૨૦.૩૭॥

પાદત્રયેણાવૃતાઽસૌ ચિદેકરસતાઽઽત્મનઃ ।
અથ પાદશ્ચતુર્થો યશ્ચતુરાત્મા સ પૂર્વવત્ ॥ ૨૦.૩૮॥

તુરીયાઽવસિતત્વં તુ ભવેત્પાદુચતુષ્ટયે ।
ઓતાઽનુજ્ઞાત્રનુજ્ઞાવિકલ્પશબ્દૈરુદીરિતાઃ ॥ ૨૦.૩૯॥

તુરીયપાદગા ભેદાસ્તત્સ્વરૂપં વિવિચ્યતે ।
બ્રહ્મણો ગુરુશાસ્ત્રાભ્યાં બુદ્ધ્વા સર્વાત્મતાં તતઃ ॥ ૨૦.૪૦॥

સર્વવસ્તુષ્વનુસ્યૂતં પશ્યન્નોતા ભવેદયમ્ ।

ઇન્દ્રિયાણિ નિરુધ્યાહં બ્રહ્મેતિ બ્રહ્મતાત્મનિ ॥ ૨૦.૪૧॥

યેનાનુજ્ઞાયતે સોઽયમનુજ્ઞાતેતિ કથ્યતે ।
જ્ઞાતૃત્વં તુ નિરાકૃત્ય ચિદેકરસશેષતા ॥ ૨૦.૪૨॥

અનુજ્ઞેત્યુચ્યતે મુક્તિરવિકલ્પ ઇતીર્યતે ।
વિદ્વજ્જાગરણસ્વપ્નસુપ્તિતુર્યાઽભિધા ઇમાઃ ॥ ૨૦.૪૩॥

અવસ્થાસ્તિસ્ર એતાસ્તુ માયાલેશેન સંયુતાઃ ।
નિઃશેષમાયાહીનોઽયમવિકલ્પો ભવત્યથ ॥ ૨૦.૪૪॥

અતદ્વ્યાવૃત્તિરૂપેણ તસ્યાદેશોઽત્ર વર્ણ્યતે ।
જાગ્રત્સ્વપ્નાન્તરાલાનિ વિદ્યાઽવિદ્યે સુષુપ્તકમ્ ॥ ૨૦.૪૫॥

ન સ્થૂલપ્રજ્ઞમિત્યાદ્યૈઃ ક્રમાત્ષડ્ભિર્નિવાર્ય્યતે ।
ન ચક્ષુરાદિમિર્દૃશ્યૈર્ન પ્રાણૈર્વ્યવહારભાક્ ॥ ૨૦.૪૬॥

નાપિ કર્મેન્દ્રિયૈર્ગ્રાહ્યં નાનુમેયં ચ લક્ષણાત્ ।
ન ચિત્યં મનસા નૈવ શબ્દૈશ્ચ વ્યપદિશ્યતે ॥ ૨૦.૪૭॥

સ્વપ્રકાશાત્મસારત્વાન્નાપિ શક્યાઽસ્ય શૂન્યતા ।
સ્થૂલપ્રજ્ઞાદિરૂપો યઃ પ્રપઞ્ચઃ સ્વાત્મનઃ પૃથક્ ॥ ૨૦.૪૮॥

તત્કૃતૈર્બહુવિક્ષેપૈરાત્મનો દુઃખિતેતિ ચેત્ ।
પ્રપઞ્ચઃ કલ્પિતસ્તત્ત્વબોધેનૈવોપશામ્યતિ ॥ ૨૦.૪૯॥

તતઃ શિવં દુઃખહીનં સર્વવિક્ષેપશાન્તિતઃ ।
પાદં ચતુર્થં મન્યન્તે વસ્ત્વદ્વૈતમિહોચ્યતે ॥ ૨૦.૫૦॥

મતિરેવ બુભુત્સૂનાં ન ત્વદ્વૈતે ચતુર્થતા ।
યદદ્વૈતં સ એવાત્મા જ્ઞેયો જિજ્ઞાસુના સ હિ ॥ ૨૦.૫૧॥

તુર્યપાદે ત્રયં ત્યક્ત્વા તુર્યે તુર્યોઽવબુધ્યતામ્ ।
માયિત્વાદીશ્વરોઽપ્યત્ર ગ્રસ્તઃ સ્યાદુવબોધતઃ ॥ ૨૦.૫૨॥

ઇત્થં યોગવિવેકૌ દ્વૌ પ્રથમે ખણ્ડ ઈરિતૌ ।
ચિત્તભ્રમણરૂપસ્ય સંસારસ્ય પ્રશાન્તયે ॥ ૨૦.૫૩॥

યોગો વિવેક ઇત્યુક્તૌ પ્રકારૌ શ્રુતિસમ્મતૌ ।
અસાધ્યઃ કસ્યચિદ્યોગઃ કસ્યચિજ્જ્ઞાનનિશ્ચયઃ ॥ ૨૦.૫૪॥

પ્રકારૌ દ્વૌ તતઃ પ્રોક્તૌ સર્વાનુગ્રહકામ્યયા ।
આદૌ દ્વિતીયખણ્ડસ્ય સચ્ચિદાનન્દતાત્મનઃ ॥ ૨૦.૫૫॥

વિવિચ્યતે નિત્યસત્તા ગમ્યતે હ્યનુવૃત્તિતઃ ।
વ્યભિચારે જાગરાદેર્યત્સદવ્યભિચારિ તત્ ॥ ૨૦.૫૬॥

આનન્દૈકરસં નિત્યમિતિ સત્ત્વં વિવેચિતમ્ ।
ચક્ષુઃશ્રોત્રાદયઃ સર્વે મદીયા ઇતિ ભાસિતાઃ ॥ ૨૦.૫૭॥

ભાતાઽસૌ ચક્ષુરાદિભ્યો દ્રષ્ટાઽન્યશ્ચેતનો ભવેત્ ।
દ્રષ્ટેતિ દૃષ્ટિકર્તૃત્વમહઙ્કારેણ કલ્પિતમ્ ॥ ૨૦.૫૮॥

દૃઙ્માત્રત્વેન સાક્ષ્યાત્મા વિકારરહિતત્વતઃ ।
આનન્દઘન આત્માઽસૌ પરપ્રેમાસ્પદત્વતઃ ॥ ૨૦.૫૯॥

મા ન ભૂવં સદા સમ્યગ્ભૂયાસમિતિ હીક્ષ્યતે ।
સચ્ચિદાનન્દૈકરસો ભાત્યસ્માદ્દૃશ્યતઃ પુરા ॥ ૨૦.૬૦॥

સર્વેષુ વ્યવહારેષુ નિર્વિકલ્પં સ્ફુરેત્પુરઃ ।
તમેવ ભાન્તમન્વેતિ તદ્ભાસા ભાસ્યતે જગત્ ॥ ૨૦.૬૧॥

ઇતિ શ્રુત્યન્તરે પ્રોક્તઃ પરમાત્મા પરિસ્ફુરન્ (પુરા સ્ફુરન્) ।
અખણ્ડૈકરસઃ સોઽયં જરામરણવર્જિતઃ ॥ ૨૦.૬૨॥

ઇત્યાત્માનં વિવિચ્યાથ યુઞ્જીત પ્રણવેન તમ્ ।
ચતુર્ણાં જાગરાદીનાં પ્રત્યેકં ચતુરાત્મતા ॥ ૨૦.૬૩॥

પૂર્વમુક્તા યથા તદ્વદકારાદિષુ કલ્પયેત્ ।
આધારાદુત્થિતો વાયુર્નાભિહૃત્કણ્ઠગો બહિઃ ॥ ૨૦.૬૪॥

નિર્ગચ્છન્ જનયેચ્છબ્દં સોઽપિ સ્થાનૈશ્ચતુર્વિધઃ ।
સંજ્ઞાઃ પરેતિ પશ્યન્તી મધ્યમા વૈખરીતિ ચ ॥ ૨૦.૬૫॥

આગમોક્તા વૈખરી તુ શ્રૂયતે મુખનિર્ગતા ।
વાચઃ પદાનિ ચત્વારિ ત્રીણિ ગૂઢાનિ વિગ્રહે ॥ ૨૦.૬૬॥

તુર્યં મર્ત્યા વદન્તીતિ પ્રાહ મન્ત્રોઽપ્યતિસ્ફુટમ્ ।
વૈખર્યાદ્યાઃ પરાન્તાસ્તુ શબ્દભેદાઃ ક્રમાદમી ॥ ૨૦.૬૭॥

સ્થૂલસૂક્ષ્મૌ બીજસાક્ષિણાવિત્યેવ શ્રુતીરિતાઃ ।
નિવૃત્તિશ્ચ પ્રતિષ્ઠા ચ વિદ્યા શાન્તિશ્ચ વૈ કલાઃ ॥ ૨૦.૬૮॥

અકારેઽસ્મિંશ્ચતુર્ભેદે જાગરં તુ ચતુર્વિધમ્ ।
ધ્યાયેત્સામ્યં તયોરાપ્તિરાદિત્વં ચેતિ ચિન્તયેત્ ॥ ૨૦.૬૯ ॥

જાગરેઽક્ષૈર્વ્યાપ્તિરસ્તિ વ્યાપ્તોઽકારઃ કખાદિષુ ।
આદિત્વં લોકતઃ સિદ્ધં જાગરાકારયોર્દ્વયોઃ ॥ ૨૦.૭૦ ॥

સ્થૂલસૂક્ષ્મત્વાદિસામ્યં તદ્ભેદાનાં ક્રમાદ્ભવેત્ ।
ફલં યથાગુણં ધ્યાને ભવેત્સર્વત્ર કામિનઃ ॥ ૨૦.૭૧ ॥

અકારં જાગરોઽપ્યેતમુકારે સંહરેત્તથા ।
ઉકારં ચ મકારે તમોઙ્કારે નાદરૂપિણિ ॥ ૨૦.૭૨ ॥

અથ તુર્યં ચતુર્ભેદમીશગ્રાસાદિનામકમ્ ।
ધ્યાયેન્મહેશ્વરોઽમાયી યસ્તમોંઽતો ગ્રસત્યયમ્ ॥ ૨૦.૭૩ ॥

કાલાગ્નિસૂર્યઃ સંહારકાલે સ્વૈસ્તીવ્રરશ્મિભિઃ ।
તિરસ્કુર્યાજ્જગત્તત્તુ લેશાદ્ભાતિ યથા તથા ॥ ૨૦.૭૪ ॥

ઓતોઽયં સચ્ચિદાનન્દૈર્નામરૂપે જગદ્ગતે ।
તિરસ્કુર્યાત્તે તુ લેશમાત્રે ભાતઃ ક્વચિત્ક્વચિત્ ॥ ૨૦.૭૫ ॥

યથા સૂર્યસ્તમઃ સર્વં પ્રકાશીકુરુતે તથા ।
અનુજ્ઞાતા જગત્સર્વં સ્વાત્મમાત્રં કરોતિ હિ ॥ ૨૦.૭૬ ॥

દાહ્યં દગ્ધ્વા યથા વહ્નિર્નિર્વ્યાપારોઽવશિષ્યતે ।
અનુજ્ઞૈકરસસ્તદ્વચ્ચિન્માત્રઃ પરિશિષ્યતે ॥ ૨૦.૭૭ ॥

અવાઙ્મનસગમ્યોઽયમવિકલ્પશ્ચતુર્વિધઃ ।
તુર્યપાદં ચતુર્ભેદે નાદે સઞ્ચિન્તયેત્ક્રમાત્ ॥ ૨૦.૭૮ ॥

સર્વસ્ય જગતો વસ્તુતત્ત્વં યન્નિર્વિકલ્પકમ્ ।
તદાત્મેતિ સમાધાય ચિત્તં તસ્મિન્ ભવેદ્ધિ તત્ ॥ ૨૦.૭૯ ॥

અથવા મન્ત્રરાજે ધીઃ સમાધેયાત્મવાચિનિ ।
સર્વસંહારશક્ત્યાદ્યા અર્થા ઉગ્રાદિશબ્દગાઃ ॥ ૨૦.૮૦ ॥

આત્માનં મન્ત્રરાજેન ધ્યાયન્ બ્રહ્મતયા પુમાન્ ।
બ્રહ્મરૂપો નૃસિંહઃ સ્યાદ્યોગઃ શુદ્ધધિયો હ્યયમ્ ॥ ૨૦.૮૧ ॥

વિવેકયોગૌ સમ્પ્રોક્તૌ દ્વિતીયે ખણ્ડ આત્મનઃ ।

પ્રણવે મન્ત્રરાજે ચ દ્વિવિધો યોગ ઈરિતઃ ॥ ૨૦.૮૨॥

તૃતીયમન્ત્રરાજસ્ય પ્રણવસ્યાત્મનોઽપિ ચ ।
એકીકારેણ યદ્ધ્યાનં તત્સમ્યગભિધીયતે ॥ ૨૦.૮૩॥

પૃથિવ્યાદ્યાત્મકોઙ્કારઃ પાદ ઉગ્રાદિકોઽપિ ચ ।
પરાપશ્યન્ત્યાદિરૂપઃ સોઽયં વિશ્વશ્ચતુર્વિધઃ ॥ ૨૦.૮૪॥

તૈજસપ્રાજ્ઞતુર્યાશ્ચ તથા ધ્યાત્વોપસંહરેત્ ।
અસૌ પ્રપઞ્ચહીનઃ સ્યાદવિકલ્પે સ્થિરઃ પુમાન્ ॥ ૨૦.૮૫॥

જ્ઞપ્તિમાત્રોઽમૃતો નિત્યો હુતસંવિદવૃત્તિકઃ ।
શુદ્ધો ભ્રાન્તિવિહીનત્વાત્સંવિષ્ટોઽયમવિક્રિયઃ ॥ ૨૦.૮૬॥

પ્રાણાયામેન નિર્વિઘ્નોઽનુભવેદીદૃશાત્મતામ્ ।
પ્રાણાધીનાં મનોવૃત્તિઃ પ્રાણરોધેન શામ્યતિ ॥ ૨૦.૮૭॥

નિર્વિકલ્પધિયા પશ્યેજ્જગત્સ્વાત્મતયા તા ।
યાને પ્રપઞ્ચં સન્ત્યજ્ય બ્રહ્મરૂપેણ તિષ્ઠતિ ॥ ૨૦.૮૮॥

અન્યો દંવોઽહમપ્યન્ય ઇતિ દ્વૈતસ્ય વાસના ।
દૃઢા ચેત્તાદૃશી દેવપૂજોપાસ્તિરથોચ્યતે ॥ ૨૦.૮૯॥

યોઽસ્મિન્ ખણ્ડે વર્ણિતોઽસૌ સઙ્કલ્પઃ પૂજ્ય ઇષ્યતે ।
ષટ્ તુ સ્થાનાનિ દેહેઽસ્મિન્ પૂજાધારાઃ પ્રકીર્તિતાઃ ॥ ૨૦.૯૦॥

આધારનાભિહૃદયભ્રૂમધ્યદ્વાદશાન્તકાઃ ।
ષોડશાન્તશ્ચ તેષ્વગ્નિબ્રહ્માદ્યાનર્ચયેત્ક્રમાત્ ॥ ૨૦.૯૧॥

યશ્ચતુર્ભેદ ઓતાદ્યૈઃ સોઽમૃતો નિરુપાધિકઃ ।
ઉપાધીનાં બોધબાધાદવિકલ્પોઽવશેષણાત્ ॥ ૨૦.૯૨॥

સોઽવિકલ્પઃ સર્વમયસ્તસ્મિન્સર્વાધિરોપણાત્ ।
યે જાગરાદયો ભેદાશ્ચત્વારસ્તેઽત્ર કલ્પિતાઃ ॥ ૨૦.૯૩॥

પરિવારા મન્ત્રરાજે માહાચક્રે પ્રકીર્તિતાઃ ।
પૃથિવ્યાદ્યાઃ સપ્ત સપ્ત ભેદા માત્રાસ્ત્વિહ શ્રુતાઃ ॥ ૨૦.૯૪॥

પરિવારેણ સંયુક્તં ચતુઃ સપ્તાત્મકં પ્રભુમ્ ।
નૃસિંહમગ્નિરૂપં તં મૂલાધારે વિચિન્તયેત્ ॥ ૨૦.૯૫॥

ભૂમ્યાદિભિઃ સપ્તવિધં સ્થૂલાદ્યૈશ્ચ ચતુર્વિધમ્ ।
અકારરૂપં બ્રહ્માણમેતં નાભૌ વિચિન્તયેત્ ॥ ૨૦.૯૬॥

હૃદિ વિષ્ણુમુકારેણ ભ્રૂમધ્યે ચ મકારતઃ ।
રુદ્રં નાદેન સર્વેશં દ્વાદશાન્તેઽગ્નિવત્સ્મરેત્ ॥ ૨૦.૯૭॥

ચતુઃસપ્તાત્મકોઽમાયી સર્વેશો હ્યનુપાધિકઃ ।
ષોડશાન્તે સુખં ધ્યાયેચ્ચતુઃસપ્તાત્મલક્ષિતમ્ ॥ ૨૦.૯૮॥

તેનાનન્દામૃતેનાધઃસ્થિતાસ્તાઃ પઞ્ચદેવતાઃ ।
વ્યાપ્તાશ્ચતુર્વિધાઃ સ્થૂલાદિભિરિત્યેવ ચિન્તયેત્ ॥ ૨૦.૯૯॥

ઉપચારૈરાગમોક્તૈર્દેવાંસ્તાન્મનસાર્ચયેત્ ।
બ્રહ્માદિમૂર્તિભેદેન તથૈક્યેનાપિ પૂજયેત્ ॥ ૨૦.૧૦૦॥

ભક્ષ્યભોજ્યૈર્લેહ્યચોષ્યૈરિત્યેતૈરુપહારયેત્ ।
ગુરુશ્રુત્યુક્તમાર્ગેણ પૂજયિત્વા યથાવિધિ ॥ ૨૦.૧૦૧॥

મૂર્તિં તેજસિ સંહૃત્ય તેજશ્ચાત્મનિ સંહરેત્ ।
સૂત્રે વિરાજં સંહૃત્ય સૂત્રમવ્યાકૃતે ચ તત્ ॥ ૨૦.૧૦૨॥

અવિકલ્પે તત્ર ચિત્તં સમાધાય સ્થિરો ભવેત્ ।
પૂજ્યપૂજકયોર્ભેદવાસના યસ્ય હીયતે ॥ ૨૦.૧૦૩॥

ચતુર્થખણ્ડે યોગોઽસ્ય ધીવિશ્રાન્ત્યૈ નિગદ્યતે ।
નાદસ્તુરીય ઓઙ્કારસ્તસ્યાન્તે સ્ફુરદદ્વયમ્ ॥ ૨૦.૧૦૪॥

મન્ત્રરાજેન સામ્યં તૈઃ પાદૈર્નત્વા પ્રસાદયેત્ ।
પ્રણવાત્મતયા ધ્યાત્વાઽહમિત્યાત્મતયા સ્મરેત્ ॥ ૨૦.૧૦૫॥

યાવન્નિશ્ચલતા તાવત્સ્થિત્વોર્ધ્વં ચિન્તયેત્પુનઃ ।
કૃત્સ્નમન્ત્રેણ નત્વોમિત્યુચ્ચાર્યાન્તે સ્થિરો ભવેત્ ॥ ૨૦.૧૦૬॥

ધ્યાત્વોઙ્કારં પુનર્મન્ત્રાન્મહાવાક્યાદનુસ્મરેત્ ।
મન્ત્રેણ વા કેવલેન નૃસિંહેતિ પદેન વા ॥ ૨૦.૧૦૭॥

સંસ્મૃત્યાખણ્ડવાક્યાર્થં યુઞ્જીતોઙ્કારમન્ત્રયોઃ ।
સંસ્તભ્ય ચિત્તે સ્વાત્માનં ગુણત્રયવિવર્જિતમ્ ॥ ૨૦.૧૦૮॥

બ્રહ્માદિકાનકારાદ્યૈઃ સંયોજ્યાત્મનિ સંહરેત્ ।
તેષાં તુ કારણાવિદ્યાં બાધિત્વા વસ્તુતોઽસતીમ્ ॥ ૨૦.૧૦૯॥

કૃત્વા ચિદ્ભક્ષિતાં વીરઃ સંસ્મરન્નિર્ભયો ભવેત્ ।
બ્રહ્માદીન્મન્ત્રરાજસ્ય પાદૈશ્ચિદ્રૂપતાં નયેત્ ॥ ૨૦.૧૧૦॥

અવિદ્યાં વિનિવૃત્ત્યૈષ નૃસિંહઃ સ્વયમુદ્બભૌ ।
યોગાન્તરં પઞ્ચમેઽસ્મિન્ ખણ્ડે સ્પષ્ટમુદીર્યતે ॥ ૨૦.૧૧૧॥

અકારાર્થં મન્ત્રરાજપદાર્થૈર્યોજયેત્ક્રમાત્ ।
ચતુર્મૂર્ત્યાત્મકૈર્યોગૈરવિકલ્પાન્તકૈરપિ ॥ ૨૦.૧૧૨॥

ચતુર્દશભિરેકેનાપ્યજસ્રં પ્રયતો વસેત્ ।
ઉગ્રે વીરે મહાવિષ્ણાવુજ્જ્વલે સર્વતોમુખે ॥ ૨૦.૧૧૩॥

નૃસિંહે ભીષણે ભદ્રે મૃત્યુમૃત્યૌ ન મય્યજા ।
ભાતિ હિંસાકરી માયા ન મય્યસ્તિ ચિદાત્મનિ ॥ ૨૦.૧૧૪॥

નમામીતિ પદાદ્બ્રહ્માભિન્નતામનુચિન્તયેત્ ।
ઈદૃગ્યોગી સ્યાદકામઃ કામ્યમસ્ય ન સમ્ભવેત્ ॥ ૨૦.૧૧૫॥

નિષ્કામોઽસૌ લૌકિકાનાં કામાનાં વિનિવૃત્તિતઃ ।
કામ્ય આત્માઽપિ બોધાપ્તઃ કિમન્યત્કામ્યતે પુનઃ ॥ ૨૦.૧૧૬॥

ઉત્ક્રામતિ ન તત્પ્રાણા લીયન્તે તુ પરાત્મનિ ।
બ્રહ્મૈવ સન્ પુરાપ્યેષ બ્રહ્માપ્નોત્યવબોધતઃ ॥ ૨૦.૧૧૭॥

તથોકારમકારૌ ચ યોજ્યૌ મન્ત્રપદેષ્વતઃ ।
અસ્મિન્ ખણ્ડે ત્રયો યોગા ધીવિશ્રાન્ત્યૈ પ્રકીર્તિતાઃ ॥ ૨૦.૧૧૮॥

ષષ્ઠે ખણ્ડેઽથ વિદ્યાયાઃ સાધનાન્યખિલાન્યપિ ।
જીવન્મુક્ત્યવસાયીનિ સઙ્ગૃહ્યન્તે હ્યતિસ્ફુટમ્ ॥ ૨૦.૧૧૯॥

વિષયાસઙ્ગરૂપો યઃ પાપ્માસાવાસુરત્વતઃ ।
વિદ્યેચ્છાં પ્રતિબધ્નાતિ સોઽયમાદૌ નિવર્ત્યતામ્ ॥ ૨૦.૧૨૦॥

રજસ્તમો વૃત્તયો યા લોભમોહાદયો હૃદિ ।
ક્રૂરત્વાદસુરાસ્તે સ્યુર્દેવાઃ સ્યુઃ સત્ત્વવૃત્તયઃ ॥ ૨૦.૧૨૧॥

સત્ત્વાત્સઞ્જાયતે જ્ઞાનં રજસો લોભ એવ ચ ।
પ્રમાદમોહૌ તમસો ભવતોઽજ્ઞાનમેવ ચ ॥ ૨૦.૧૨૨॥

અર્થાવુગ્રાદિશબ્દાનાં યૌ પ્રોક્તૌ તાપનીયયોઃ ।

સગુણાગુણભેદેન તદ્ધ્યાનાદસુરાન્ જયેત્ ॥ ૨૦.૧૨૩॥

ત્યક્ત્વા રજસ્તમોવૃત્તી સાત્ત્વિકીં વૃત્તિમાશ્રિતા ।
ધીશ્ચિદાનન્દમાત્માનં ધ્યાયન્તી તન્મયી ભવેત્ ॥ ૨૦.૧૨૪॥

તતો ધ્યાતૃધ્યેયભેદનિવૃત્ત્યૈ મન્ત્રરાજતઃ ।
તુર્યાતુર્યમનુસ્મૃત્ય સમાધિઃ પ્રણવે ભવેત્ ॥ ૨૦.૧૨૫॥

મન્ત્રાર્થે પ્રણવં દીર્ઘમુક્ત્વા ચિત્તં વિલાપયેત્ ।
અમૂર્તમદ્વયં બ્રહ્માનુભવન્ વર્તતે તદા ॥ ૨૦.૧૨૬॥

ઈદૃક્ સમાધિવિઘ્નાનાં શાન્ત્યૈ પુત્રૈષણાદિકમ્ ।
ત્યક્ત્વા ચિત્તં સમાધાય જીવન્મુક્તઃ સુખી ભવેત્ ॥ ૨૦.૧૨૭॥

અકારાદિષડઙ્ગેષુ સંયોજ્યાસઙ્ગમદ્વયમ્ ।
મન્ત્રાર્થમપિ સંયોજ્ય હ્યકારાદીનુપેક્ષતે ॥ ૨૦.૧૨૮॥

ખણ્ડેઽથ સપ્તમે યોગાઃ પ્રવક્ષ્યન્તે પુનસ્ત્રયઃ ।
તેષામન્યતમેનાઽસૌ વિદ્વાન્ કાલં નયેત્પુમાન્ ॥ ૨૦.૧૨૯॥

અકારાર્થમજત્વાદ્યૈશ્ચિન્તયેદ્બુદ્ધિસાક્ષિણમ્ ॥ ।
ઉત્કર્ષાદ્યૈરુકારાર્થં મન્ત્રદેવં વિચિતયેત્ ॥ ૨૦.૧૩૦॥

અનૂદ્ય સાક્ષિણં પ્રોક્તં મન્ત્રદેવત્વમસ્ય તત્ ।
ઉત્કૃષ્ટત્વાદિભિઃ શબ્દઃ પઞ્ચભિશ્ચિન્તયેત્તથા ॥ ૨૦.૧૩૧॥

ઉત્તરૈઃ પઞ્ચભિર્દેવમનૂદ્ય પરમાત્મતામ્ ।
મહત્વાદ્યૈર્મકારાર્થરૂપં તસ્ય વિચિન્તયેત્ ॥ ૨૦.૧૩૨॥

શરીરત્રયહીનો યઃ સચ્ચિદાનન્દલક્ષણઃ ।
સ એવ ભવતિ ધ્યાનાદ્યોગોઽયં પ્રથમો ભવેત્ ॥ ૨૦.૧૩૩॥

અન્યેન કસ્ત્વમિત્યેવં પૃષ્ટાઃ સર્વેઽપિ માનવાઃ ।
અહમિત્યાહુરેતેષામહમિત્યભિધાનતઃ ॥ ૨૦.૧૩૪॥

અહંશબ્દે પ્રત્યગાત્મવાચિન્યાદેરકારતઃ ।
પ્રથમે પ્રથમાદ્વર્ણાદાત્માનમનુચિન્તયેત્ ॥ ૨૦.૧૩૫॥

બ્રહ્મણઃ સચ્ચિદાનન્દા વીક્ષ્યન્તે સર્વવસ્તુષુ ।
તસ્માત્સર્વાત્મકં બ્રહ્મ મકારો બ્રહ્મશબ્દગઃ ॥ ૨૦.૧૩૬॥

મકારઃ પ્રણવસ્યાન્તે યસ્તેન બ્રહ્મ ચિન્તયેત્ ।
આત્મનો બ્રહ્મણૈકત્વમુકારેણ વિચિન્તયેત્ ॥ ૨૦.૧૩૭॥

આત્મા બ્રહ્મેતિ વાક્યાર્થે યોગોઽયં પ્રણવે શ્રુતઃ ।
અર્થે તત્ત્વમસીત્યસ્ય યોગોઽથ પ્રણવે ભવેત્ ॥ ૨૦.૧૩૮॥

સર્વાત્મકમ્બ્રહ્મ યત્સ્યાદુગ્રાદિપદભાષિતમ્ ।
સંહારે જગદત્તૃત્વાત્તસ્યોકારાર્થતોચિતા ॥ ૨૦.૧૩૯॥

સંહૃતે જગતિ બ્રહ્મ સતતં હ્યવતિષ્ઠતે ।
પુનરુગ્રાદિશબ્દૈસ્તદખણ્ડત્વેન સંસ્મરેત્ ॥ ૨૦.૧૪૦॥

સાક્ષિણં મન આદીનામાત્માનં તુ મકારતઃ ।
ધ્યાત્વા બ્રહ્મત્વસમ્પત્ત્યૈ દૃષ્ટિસૃષ્ટિમનુસ્મરેત્ ॥ ૨૦.૧૪૧॥

બ્રહ્માત્મનોસ્તુ સમયોરૈક્યં ધ્યાયેદુકારતઃ ।
ફલં તુ પૂર્વવદ્વિદ્યાત્રયો યોગા ઇતીરિતાઃ ॥ ૨૦.૧૪૨॥

ચત્વારો હ્યષ્ટમે ખણ્ડે યોગાસ્તુર્યસ્ય ભાસકાઃ ।
ઓઙ્કારનામા પ્રણવે નાદો યસ્તત્ર વર્ણિતઃ ॥ ૨૦.૧૪૩॥

ઓતાનુજ્ઞાત્રનુજ્ઞાતૈરવિકલ્પ ઇતીરિતૈઃ ।
ભેદૈર્યોગા વિભિન્નાઃ સ્યુરભયં બ્રહ્મ તૈર્ભવેત્ ॥ ૨૦.૧૪૪॥

ઓઙ્કારમન્ત્રયોર્ધ્યેયં વસ્તુ યદ્બહુધેરિતમ્ ।
તત્તત્ત્વં નવમે ખણ્ડે વિસ્પષ્ટં પ્રવિવિચ્યતે ॥ ૨૦.૧૪૫॥

ય આત્મા ધ્યાતૃદેહેષુ યશ્ચ ધ્યેયેષુ ભાસતે ।
એક એષ સ ચિદ્રૂપો માયયા ભાત્યનેકવત્ ॥ ૨૦.૧૪૬॥

સુષુપ્તૌ જીવચૈતન્યમદ્વૈતં બ્રહ્મતાં વ્રજેત્ ।
જગત્સર્વમવિદ્યેતિ સર્વૈરપ્યનુભૂયતે ॥ ૨૦.૧૪૭॥

સૃષ્ટેઃ પ્રાગપ્યેવમાસીત્સા માયા વટબીજવત્ ।
અનેકરૂપતાં પ્રાપ્ય જીવેશાવપિ નિર્મમે ॥ ૨૦.૧૪૮॥

કાર્યોપાધિરયં જીવઃ કારણોપાધિરીશ્વરઃ ।
ઉપાધ્યોર્યૌ ચિદાભાસૌ તૌ જીવેશાવુદીરિતૌ ॥ ૨૦.૧૪૯॥

નિયન્તેશોઽનુમન્તા તુ જીવઃ સોઽપિ દ્વિધા ભવેત્ ।
સમષ્ટિવ્યષ્ટિરિત્યાદ્યૈસ્તયોઃ સર્વાભિમાનવાન્ ॥ ૨૦.૧૫૦॥

હિરણ્યગર્ભઃ સૂત્રાત્મા ત્રિમૂર્તિશ્ચેત્યુદીર્યતે ।
બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ મૂર્તયો ગુણભેદતઃ ॥ ૨૦.૧૫૧॥

લિઙ્ગોપાધિત્વતો જીવા અપીશાઃ સર્વવિત્ત્વતઃ ।
સમષ્ટિઃ સમુદાયાત્મા વ્યષ્ટિસ્તુ પૃથગાત્મવાન્ ॥ ૨૦.૧૫૨॥

સમષ્ટિઃ સૂત્રવજ્જ્ઞેયો બ્રહ્માણ્ડાખ્યવપુર્વિરાટ્ ।
દેવતિર્યઙ્મનુષ્યાદિદેહો વ્યષ્ટિરિતીર્યતે ॥ ૨૦.૧૫૩॥

પરઃ પ્રવિશ્યં દેહેષુ માયયા ગૂઢવત્સ્થિતઃ ।
દ્વૈતસ્ય માયિકત્વેન તત્ત્વમદ્વૈતમિષ્યતામ્ ॥ ૨૦.૧૫૪॥

સન્માત્રો નિત્ય ઇત્યાદિ શ્રુત્યા તત્તુ સ્ફુટીકૃતમ્ ।
આથર્વણે તુ કૈવલ્યપ્રમુખાઃ શ્રુતયઃ સ્ફુટાઃ ॥ ૨૦.૧૫૫॥

શ્રુતિસ્મૃતીતિહાસાનામભિપ્રાયવિદવ્યયઃ ।
શ્રુતિવ્યાખ્યાનતસ્તુષ્યાદ્વિદ્યાતીર્થમહેશ્વરઃ ॥ ૨૦.૧૫૬॥

ઇતિ શ્રીમદ્વિદ્યારણ્યમુનિવિરચિતે અનુભૂતિપ્રકાશે
દેવવિદ્યાખ્યો નૃસિંહતાપિનીવિવરણો નામ વિંશોઽધ્યાયઃ ॥ ૨૦॥

॥ ૐતત્સદ્બ્રહ્માર્પણમસ્તુ । શ્રીરસ્તુ ॥

Proofread by Rama Sivaraman, Suvarna Sudagoni, Preeti Bhandare

---

*Shrimad VidyaranyasvAmivirachitah Anubhutiprakashah*

pdf was typeset on February 19, 2026

Please send corrections to *sanskrit@cheerful.com*